TANJORE SARASWATI MAHAL LIBRARY SERIES No 70.

॥ धर्माकूतम् ॥

(आरण्यकाण्डः)

DHARMĀKŪTAM

AN ENCYCLOPAEDIC COMMENTARY ON
SRIMAD RAMAYANA

(ĀRAṆYA KĀṆḌA)

MADRAS GOVERNMENT ORIENTAL SERIES

1955

Rs. 4/-

Thanjavur Sarasvati Mahal Series No. 70

॥ धर्माकूतम् ॥

(आरण्यकाण्डः)

श्रीमत्त्र्यम्बकरायाध्वरीन्द्रेण विरचितम्

DHARMAKUTAM

(ARANYA KANDA)

AN ENCYCLOPAEDIC COMMENTARY ON
SRIMAD RAMAYANA

By

TRYAMBAKARAYA MAKHIN

Critically Edited with an Introduction and notes
By

Sri K.S. Subrahmanya Sastry
Pandit (Retd.)
Sarasvati Mahal Library, Thanjavur.

THANJAVUR MAHARAJA SERFOJI'S

**SARASVATI MAHAL LIBRARY
AND RESEARCH CENTRE**

THANJAVUR

2016 **Price: Rs.150-00**

BIBLIOGRAPHICAL DATA

Title of the Book	: Dharmakutam - Aranyakanda
Edited	: K.S. Subrahmanya Sastry
Publisher	: Director, Sarasvati Mahal Library & Research Centre, Thanjavur.
Publication	: 70
Language	: Sanskrit
Edition	: Second Edition
Date of Publication	: 2016
Paper used	: T.NP.L. 18.6 kgs.
Size of the Book	: 21 x 14 c.m.
Printing Type used	: 16 pt.
Number of pages	: 260
No. of copies	: 500
Printer	: Sarasvati Mahal Library Press
Binding	: Cardboard
Subject	: Kavya
Price	: Rs. 150-00

PUBLISHER'S PREFACE

The Sarasvati Mahal Library is a renowned institution of manuscripts, maps, paintings and old books. The Library Manuscripts are in palm leaf and paper and they deal with various subjects on Philosophy, Medicine, Astrology, Grammar, Folklore and Mythology. The Publication of books from manuscripts is being done with the help of eminent scholars and Pandits of the Library. Now published the second Edition of **DHARMAKUTAM-ARANYAKANDAM.**

This publication is the part relating to aranya kandam of the commentary on Srimad Ramayana of Valmiki by Sri Trayambakarayamakhi, the versatile scholar and minister of King Shahaji (1684-1710) and King Serfoji II (1711-1728) of Tanjore. There are many commentaries on Srimad Ramayana, but this commentary is unique among them. It has been written with a special purpose, namely to show that Rama's life is intended to serve as an example of how every individual has to conduct himself in this world of perennial conflict of duties and desires. The author therefore takes up every situation in which a question relating to Dharma Sastra or the Science of Life presents itself for solution, and attempts to show that the conduct of the hero satisfies the considered views of the texts of Dharma found in the Vedas, the Smritis,

Puranas and Sutras. as subjects allied to Dharma, questions relating to the several arts and sciences that form part of a cultured man's make-up are also taken up for consideration. Our Thanks are due to Editor Sri K.S. Subrahmanya Sastry for his valuable services.

I am thankful to Government for sanctioning funds for publishing the book.

I thank Administrative Officer Thirumathi A. Poongothai, M.A., Librarian Dr. S.Sudarshan, M.A.,B.Lit.,M.L.I.S.,.Ph.D., and Library staff for having taken sincere efforts to bring out this reprint.

I hope that this book willbe usefull to the readers, research scholars and students.

Thanjavur
19.09.2016

A. ANNADURAI, I.A.S.,
District Collector and Director,
Sarasvati Mahal Library.

PREFACE.

The present publication, namely, DHARMĀ KŪTAM-ĀRANYAKĀNḌAM is the part relating to Āranya kānḍam of the commentary on Srīmad Rāmāyana of Vālmiki by Sri Tryambakarāyamakhi, the versatile scholar and minister of King Shāhji (1684-1710) and King Serfoji II (1711-1728) of Tanjore. There are many commentaries on Srīmad Rāmāyana, but this commentary is unique among them. It has been written with a special purpose, namely to show that Rama's life is intended to serve as an example of how every individual has to conduct himself in this world of perennial conflict of duties and desires. The author therefore takes up every situation in which a question relating to Dharma S'āstra or the 'Science of Life' presents itself for solution, and attempts to show that the conduct of the hero satisfies the considered views of the texts of Dharma found in the Vēdas, the Smṛitis, Purānas and Sūtras. As subjects allied to Dharma, questions relating to the several arts and sciences that form part of a cultured man's make-up are also taken up for consideration. One notable feature of the discussions in this commentary is that they are always exhaustive of the subject dealt with, and entitle it to be called 'an Encyclopaedia of Indian Culture'.

The Bāla and Ayōdhya Kānḍas of this commentary were published by S'ri Vāni Vilās Press, Srīrangam some 30 years ago. The Manuscript of this commen-

tary is to be found only in this library, and we have a special obligation and privilege to bring out all the other Kāṇḍas. We have already published in 1952 the Sundara Kāṇḍa. Āranya Kānda is now presented in this volume. The other Kāṇḍas will soon be taken up for publication.

The Editor, Mantramūrti Sri K. S. Subramanya Sastri, Sanskrit Pandit of our Library, has spared no pains in editing this work. He has a very intimate acquaintance with the text of Mahābhārata. When about the year 1925, the B. O. R. Institute, Poona, began their magnum opus, the critical edition of Mahābhārata, it was found that our Library had the full text of 6 rescensions of the great epic represented by a number of manuscripts ranging from 7 to 20 for the various portions. The huge task of collating all the manuscripts was undertaken by Sri K. S. Subramanya Sastri and he completed the collation by working continuously over the task for 14 years. He has thus acquired a rare familiarity with the several parts of Sri Mahābhārata, the store-house of our Dharma literature, which specially fits him for editing Dharmakūtam dealing exhaustively with the pros and cons of DHARMA. He has brought to bear his deep knowledge of the several subjects dealt with in the encyclopaedic Epic on the editing of the text of this commentary, and has with great labour picked out all the references from the seventy and odd works cited in the work, and given them as foot notes. A list of the authorities cited, and analysis of the subjects discussed in the commentary are given in the introductory part of the

work. Our thanks are due to the learned editor for his highly valuable services.

It is hoped that this publication will be found useful by all students of our culture and by research-scholars in the field of Dharma-S'āstra.

Our thanks are due to the Government of Madras for their timely and liberal grants which have enabled us to publish this and other valuable manuscripts of the Library.

Sarasvati Mahal,
Tanjore.
21—11—1955.

S. GOPALAN,
Honorary Secretary.

AN APPEAL

Manuscripts on Palmleaf or Paper of the ancient works of the wise men of the past, are the great treasures, solely inherited by the Nation and it is the moral obligation of persons who possess them to preserve them safely for the future generations of mankind.

Probably you have some of these in your possession or you know friends or neighbours who possess them. You can make a great contribution to the cause of the preservation not only of our National Culture but also to the Culture of Humanity as a whole by arranging to present such manuscripts to the famous T. M. S. S. M. Library, Thanjavur.

The Manuscripts so presented will be accepted and acknowledged with pleasure and gratitude by the authorities of the Library, preserved with meticulous care and made available to successive generations of readers and scholars for study and research. The hitherto unpublished works found among them, will be printed and published in due course, as facilities occur, with the expression of the Library's gratitude for your gift.

The great Scholar King of Tanjore, **Rajah Serfoji,** has attained immortal fame by dedicating enormous time and wealth to the expansion and firm establishment of this world famous **"Sarasvati Mahal Library"**. It is open to you to share the honour of Serfoji, in your own measure by contributing your manuscripts to the great institution built by him.

This great Honour is beckoning to you to accept it. Will you hasten to take it up? The Library waits for your answer.

DISTRICT COLLECTOR AND DIRECTOR
Sarasvati Mahal Library,
Thanjavur.

॥ श्रीः ॥

॥ प्रस्तावना ॥

यो नरो मृगतृष्णातो वञ्चितस्तस्य तु स्वयम् ।
वञ्चितो मृगतृष्णातो यस्तं नरमुपास्महे ॥

अयि भो भारतभूमिजनुषो विदुषामग्रेसराः! पश्यत यूयं भारतधरणिमहिमगरिमाणं; यदनितरधरणिसाधारणमियं निरीक्षते निखिलमपि भुवनं धर्मैकतानेतिहासद्वयचक्षुःप्रकाशेनोपहसन्ती सुधर्मामपि । रामायणभारताख्यस्य तदीयचक्षुर्द्वयस्य च धर्मैकतानत्वं विदितचरमेव विपश्चिदपश्चिमानाम् । इयांस्तु भेदो, यद्भारतेन बहुकथाप्रस्तावेन बहवो धर्माः प्रकाशिताः, रामायणेनैकचरित्रालम्बनेन सर्वेऽपि धर्मा इति । किञ्च भारते परमपुरुषसाहाय्येन धर्माः प्रकाशिताः, रामायणे तु परमपुरुषेणैव स्वयं धर्माः प्रकाशिता इति च 'दक्षिणेऽक्षन्पुरुषः' इति श्रुतिप्रामाण्यात्सिद्धं रामायणस्य दक्षिणाक्षित्वं । तादृशस्य महाकाव्यस्य रामायणस्य परमपुरुषाचरितनिखिलधर्मप्रकाशकस्य नाकारि कैश्चिदपि धर्मैकतानत्वमवष्टभ्य व्याख्यानमिति मन्वानाः किल भगवन्तो व्याख्यानमिदमकुर्वन्धर्माकूतमिति श्रीत्र्यंबकमखिनः; यत्र तु प्रकाशन्ते राजस्त्रीपुरुषवर्णाश्रमादिनिखिलधर्मा अपि ॥

तस्य च व्याख्यानस्य बालायोध्यासुन्दरकाण्डानां मुद्रापितत्वादिदमारण्यकाण्डीयं मया यथामति संशोध्य मुद्रापितं भवति । काण्डे चास्मिन् व्याख्यात्रा प्रमाणीकृता ग्रन्थाः षट्सप्ततिः । तेषां नामानि तु पुरस्तात्पट्टिकायां सूचितानि भवन्ति । रसिकतज्ज्ञकृते च कृततत्तत्स्थलनिर्देशं तत्तद्ग्रन्थगतवाक्यानुपूर्वी विमृश्य सपरिश्रमं निर्दिष्टा भवति तत्तत्पुटाधोभागे । एतद्व्याख्याकोशभूतश्च पत्रनिचयः 1048 संख्यांकितो

भवति। यदत्र भवति शोधितमुद्रापितेपि पौरुषेयमतिसंभवो मन्तुस्तच्च क्षन्तुमर्हन्ति सन्तः सुहृत्तमा इति सप्रश्रयमहमभ्यर्थये ॥

श्रीगणेशार्पणमस्तु

क्षे. शं. सुब्रह्मण्यशास्त्री.
गाणेशाद्वैती।

॥ धर्माकूते प्रमाणतया आदृतग्रन्थानां सूचिका ॥

१. अर्णवः
२. अष्टाङ्गहृदयम्
३. आपस्तम्बगृह्यसूत्रम्
४. आपस्तम्बधर्मसूत्रम्
५. आपस्तम्बश्रौतसूत्रम्
६. आश्वलायनगृह्यसूत्रम्
७. आश्वलायनश्रौतसूत्रम्
८. ईशावास्योपनिषत्
९. उत्तररामचरितम्
१०. उत्पलपरिमळः
११. ऐतरेयब्राह्मणम्
१२. ऐतरेयोपनिषत्
१३. काठकोपनिषत्
१४. कात्यायनस्मृतिः
१५. कामन्दकनीतिसारः
१६. कूर्मपुराणम्
१७. कौषीतकिब्राह्मणोपनिषत्
१८. खादिरगृह्यसूत्रम्
१९. गृह्यपरिभाषा
२०. गौतमधर्मसूत्रम्
२१. चतुर्विंशतिमतम्
२२. छागलेयस्मृतिः
२३. छान्दोग्योपनिषत्
२४. जामदग्न्यस्मृतिः
२५. ज्योतिर्निबन्धः
२६. तैत्तिरीयब्राह्मणम्
२७. तैत्तिरीयसंहिता
२८. तैत्तिरीयारण्यकम्
२९. दक्षस्मृतिः
३०. नारदस्मृतिः
३१. नीतिसारः
३२. नैषधम्
३३. पराशरस्मृतिः
३४. पातञ्जलयोगसूत्रम्
३५. पुराणसारः
३६. प्रपदब्राह्मणम्
३७. प्राजापत्यस्मृतिः
३८. बोधायनगृह्यसूत्रम्
३९. बोधायनश्रौतसूत्रम्
४०. बोधायनस्मृतिः
४१. बृहदारण्यकोपनिषत्, भाष्यं च
४२. बृहस्पतिस्मृतिः
४३. ब्रह्मसूत्रं, भाष्यं च
४४. भारद्वाजसंहिता

४५. भृगुस्मृतिः
४६. मनुस्मृतिः
४७. महाभारतम्
४८. मार्कण्डेयपुराणम्
४९. मुण्डकोपनिषत्
५०. मुहूर्तमार्ताण्डः
५१. यमस्मृतिः
५२. याज्ञवल्क्यस्मृतिः
५३. रघुवंशः
५४. रत्नमाला
५५. रामायणतात्पर्यनिर्णयः
५६. वराहसंहिता
५७. वसिष्ठस्मृतिः
५८. वाजसनेयिब्राह्मणम्
५९. वामनकारिका
६०. विष्णुपुराणम्
६१. वृद्धपराशरस्मृतिः
६२. वृद्धवसिष्ठस्मृतिः
६३. व्यासस्मृतिः
६४. शङ्खस्मृतिः
६५. शाकटायनस्मृतिः
६६. शाकुन्तळम्
६७. शातातपस्मृतिः
६८. शास्त्रदीपिका
६९. षड्विंशब्राह्मणम्
७०. संग्रहः
७१. संवर्तस्मृतिः
७२. सर्वसिद्धान्तसारसमुच्चयः
७३. सांख्यायनपरिशिष्टम्
७४. स्कान्दम्
७५. स्मृत्यर्थसारः
७६. हारीतस्मृतिः

॥ श्रीः ॥

श्रीगणेशाय नमः ।

श्रीधर्माकूते आरण्यकाण्डे प्रतिपाद्यमानविषयाः ॥

सर्गः		पुटानि
प्रथम सर्गे.	दुष्टनिग्रहशिष्टपरिपालनधर्मप्रतिपादनार्थमारण्य-काण्डारंभः	१
	वानप्रस्थधर्मप्रतिपादनम्	२– ६
	सहेतुकं रामस्य राजत्वप्रतिपादनम्	७– १३
	मुनिभिः न्यस्तदण्डैर्भवितव्यमिति प्रतिपादनम्	,,
२. सर्गे.	भार्यापहरणस्य अतिक्लेशकरत्वप्रतिपादनम्	१४– १५
४. सर्गे.	स्त्रिया भर्तृहितं कर्तव्यमिति प्रतिपादनम्	१६
५. सर्गे.	देवतालक्षणप्रतिपादनम्	१८
	मनुष्याणां लोकान्तरनयने कर्मानुगुणदेवताभेद-कथनम्	१९– २२
	महत्सन्दर्शनस्य अनतिक्रमणीयत्वप्रतिपादनम्	,,
	क्षत्रियाणां प्रतिग्रहप्रतिषेधकथनम्	२३
	विधिवत्कृताग्निप्रवेशादेः पुण्यलोकप्रापकत्वकथनम्	२४
६. सर्गे.	राज्ञां प्रजारक्षणारक्षणयोः सदसत्फलप्रतिपादनम्	२५– २६
	राज्ञां तपस्विरक्षणस्य अवश्यकर्तव्यत्वप्रतिपादनम्	२७– २८
८. सर्गे.	असत ऐश्वर्यं सकलजनोपद्रवकरमिति प्रतिपादनम्	३०
९. सर्गे.	विविधदोषतत्फलप्रतिपादनम्	३१
	भर्तृहितकारिण्या भार्यायाः श्रेयःप्राप्तिकथनम्	,,

	शस्त्रसम्बन्धस्य बलाभिवृद्धिकरत्वप्रतिपादनम्	३२
	न्यासधर्मप्रतिपादनम्	३३– ४२
	तपस्विनां शस्त्रसम्बन्धस्य निषेधकथनम्	४३
	निकृष्टेन महतां शिक्षणं न कर्तव्यमिति कथनम्	,,
	अपकारिणां वधे दोषाभावकथनम्	,,
	क्षत्रियाणामायुधधारणं आर्तत्राणायेति कथनम्	४४
	कृत्स्नस्य जगतो धर्ममूलकत्वप्रतिपादनम्	,,
१०. सर्गः	प्रतिज्ञातार्थस्य अवश्यकर्तव्यत्वप्रतिपादनम्	४६– ४७
	श्रेयोर्थिना अपृष्टेनापि हितोपदेशः कर्तव्य इति कथनम्	४८
११. सर्गः	महापुरुषदर्शनं सुदूरमपि गत्वा कर्तव्यमिति कथनम्	४९
	देवपूजाद्युपयुक्तकुशपुष्पादेः स्वयमेवाहरणीयत्व-कथनम्	५०
	जगदुपकाराय दुष्करमपि कर्म कर्तव्यमिति कथनम्	५१
	महतां सन्निधौ राक्षसाद्युपद्रवो न भवतीति कथनम्	,,
	महतामाज्ञाया अनतिक्रमणीयत्वकथनम्	५२
	महत्समागमस्य श्रेयःप्रापकत्वकथनम्	,,
	देवानां कर्मण्यधिकारोऽस्ति न वेति विचारः	५३– ७०
	महतां निकटे अनुष्ठितस्य धर्मस्य झटिति फलदातृत्वकथनम्	७१
१२. सर्गः	क्षत्रियवैश्ययोरपि अभ्युत्थानादिभि-रभ्यर्हणीयत्वकथनम्	७२
१३. सर्गः	पञ्चयज्ञवैश्वदेवस्वरूपकथनम्	७३– ८३

	स्त्रीणां सकलदोषाकरत्वकथनम्	८४
१५. सर्ग.	पितुरनन्तरं ज्येष्ठस्यैव स्वातन्त्र्यप्रतिपादनम्	८६
१६. सर्ग.	हेमन्तस्य प्राशस्त्यप्रतिपादनम्	८८– ९७
	ऋतुषु कर्तव्यानां कर्मणां प्रतिपादनम्	९७– ९८
	ज्येष्ठधर्मानुवर्तनस्य स्वर्गादिफलसाधकत्वकथनम्	९९
१७. सर्ग.	नियमवतां अनृतस्य विशेषतो वर्जनीयत्वकथनम्	१०१
१८. सर्ग.	स्त्रीणां सापत्न्यस्य अतिक्लेशकरत्वप्रतिपादनम्	१०४
	अधर्माधायकसंभाषणप्रतिषेधकथनम्	१०५
	गुर्वाज्ञाया अविचार्यकर्तव्यत्वकथनम्	,,
२०. सर्ग.	युद्धार्थी शत्रुः सान्त्वेनैव निवर्तनीय इति कथनम्	१०७
२३. सर्ग.	निमित्त, शकुनादिफलकथनम्	१११–१२८
	दुष्टनिग्रहप्रवृत्तस्य धार्मिकस्य सर्वेपि जयं प्रार्थयन्तीति कथनम्	१२८–१२९
२४. सर्ग.	अनागतविधानस्य श्रेयस्साधकत्वकथनम्	,,
	युद्धाभिमुखानां महापुरुषाणां दुर्निरीक्ष्यरूपत्वप्रतिपादनम्	१३१
२७. सर्ग.	युद्धाय प्रवृत्तं प्रभुं निवर्त्य भृत्यैः युद्धं कर्तव्यमिति प्रतिपादनम्	१३५
२९. सर्ग.	लोकोद्वेगकरस्य पापिनः क्षिप्रं नाशो भवतीति प्रतिपादनम्	१३७
	लोकविरुद्धं कर्म न कर्तव्यमिति प्रतिपादनम्	,,
	कामलोभौ पापाधायकौ वर्जनीयाविति प्रतिपादनम्	१३८
	लोकजुगुप्सितानां पापिष्ठानां ऐश्वर्यस्य नाशो भवतीति कथनम्	,,

	पापं कर्म परिपाके दुःखमेव प्रयच्छतीति कथनम्	१३९
	महतः पापस्य अचिरेण फलं भवतीति कथनम्	,,
	लोकोपद्रवकरः राजा शिक्षणीय इति कथनम्	,,
	गर्वेण आत्मस्तुतेरेव निषेधकथनम्	१४०
३०. सर्गे.	मरणसमये जनानां बुद्धिभ्रंशो भवतीति कथनम्	१४२
	युद्धे भीत्या पलायनस्य दोषत्वं न अपसर्पणस्येति प्रतिपादनम्	१४३
३१. सर्गे.	पापिष्ठैः स्वर्गः अप्राप्य इति कथनम्	१४७
३३. सर्गे.	कामभोगप्रवृत्तो भयं न जानातीति कथनम्	१४९
	ग्राम्यसुखासक्तं प्रजा न बहुमन्यन्त इति कथनम्	१५०
	अविचारस्य सकलराज्यनाशकत्वकथनम्	,,
	प्रयुक्तचारः सुदर्शनो भवतीति प्रतिपादनम्	,,
	बलवद्विरोधो न कर्तव्य इति कथनम्	१५१
	बुद्धिहीनो राजा न भवतीति कथनम्	१५२
	चारेण व्यवहिता अप्यर्था अवश्यं विचारणीया इति कथनम्	,,
	तीक्ष्णादीनां सहायाभावकथनम्	,,
	ऐश्वर्यदशायां क्रोधनं समये स्वजनोपि प्रहरतीति कथनम्	१५३
	धार्मिकस्य राज्यं चिरं तिष्ठतीति कथनम्	,,
	नयचक्षुषा जाग्रतो राज्ञः पूज्यत्वकथनम्	,,
	तीक्ष्णादिदोषयुतो राजा राज्यभ्रष्टो भवतीति कथनम्	१५४

३४. सर्गे. जयार्थिनां दक्षिणपादन्यासस्य कर्तव्यत्व-
कथनम् १५५

३७. सर्गे. सर्वानर्थकारणबलवद्विरोधस्य अकर्तव्यत्वकथनम् १५७
स्वबलपरबलयोः गुणदोषविचारपूर्वकं समीहित-
मारभेतेति कथनम् १५८

३८. सर्गे. निखिलपापापेक्षया परदारगमनस्य वर्जनीयत्व-
प्रतिपादनम् १५९

४०. सर्गे. पृष्टैरेव राजोपजीविभिः वक्तव्यमिति कथनम् १६०
सहेतुकं राजा पूज्यो मान्यश्चेति कथनम् १६२
राजद्वेषिणां सौख्याभावकथनम् १६३
अयुद्धे युद्धे च जीवितसंशये युद्धे प्रवर्तितव्यमिति
कथनम् ,,

४१. सर्गे. उत्पथप्रवृत्तस्य राज्ञः निग्राह्यत्वकथनम् १६४
तीक्ष्णदण्डो राजा क्षिप्रं विनश्यतीति प्रतिपादनम् १६५
क्रूरैर्मन्त्रिभिः राज्यनाशो भवतीति कथनम् ,,
दुष्टसहवासेन राजा नश्यतीति कथनम् १६६
दुष्टराजरक्षिताः प्रजा नश्यन्तीति कथनम् ,,

४२. सर्गे. स्त्रीभिः कौतुके दृष्टिः न कर्तव्येति प्रतिपादनम् १६७

४३. सर्गे. महापुरुषाणामपि बुद्धिव्यामोहो भवतीति
प्रतिपादनम् १६९
राज्ञां मृगया न दोषायेति प्रतिपादनम् ,,

४५. सर्गे. स्त्रीणां बन्धुभेदकरत्वप्रतिपादनम् १७२

४७. सर्गे. स्त्रीणां परपुरुषाभिभाषणस्य निषिद्धत्वकथनम् १७५

४९. सर्गे. केशग्रहणस्य वधापेक्षयापि अवमतिकरत्व-
प्रतिपादनम् १७९
कृतं कर्म कालमपेक्ष्यैव फलतीति कथनम् १८२
५०. सर्गे. परदाराणामग्राह्यत्वप्रतिपादनम् १८३
पापिष्ठस्य ऐश्वर्यं चिरं न तिष्ठतीति कथनम् १८४
५२. सर्गे. श्रुतिप्रतिपन्नोर्थः आभासैस्तर्कैः बाधितुं न शक्यत
इति प्रतिपादनम् १८५
स्त्रीणां आतुरवृद्धादिस्पर्शे दोषाभावप्रतिपादनम् १८८
५३. सर्गे. परदारापहरणं अधर्म्यमयशस्करं चेति कथनम् १८९
परदारापहर्तुः अचिरात् मृत्युर्भवतीति
प्रतिपादनम् १९२
५४. सर्गे. बलवद्विरोधिनो निद्रा न भवतीति कथनम् १९४
५६. सर्गे. पतिव्रताकोपः अनर्थाधायक इति प्रतिपादनम् १९५
प्राणत्यागेनापि यशसो रक्षणीयत्वकथनम् १९६
५७–६३. सर्गेषु. शकुननिमित्तादिफलकथनम् १९७–१९९
पतिव्रताः कौतुकार्थमपि नातिहसन्तीति कथनम् २००
ऋजोः कीर्तिः अनृजोरपकीर्तिश्च भवतीति
कथनम् ,,
जन्मान्तरपापानुरूपं फलं भवतीति कथनम् ,,
धैर्योत्साहौ शोकमपनुद्य कार्यसाधकाविति
कथनम् २०१
परित्यागापहरणयोः अपहरणस्य दुःखोत्पाद-
कत्वकथनम् २०३
६४. सर्गे. मृत्युजरादयोऽशक्यप्रतीकारा इति प्रतिपादनम् २०५

		प्रबलः शोकेन न सीदतीति कथनम्	२०५
६५.	सर्गः	महापुरुषः दुःखं सोढ्वैव तिष्ठतीति कथनम्	२०७
		अनपराधिषु दण्डस्य अप्रयोक्तव्यत्वकथनम्	२०८
		प्रक्रान्तयज्ञस्य अहिताचरणं न कर्तव्यमिति कथनं	,,
		सामादीनां क्रमशः प्रयोक्तव्यत्वकथनम्	,,
६६.	सर्गः	आपदि महद्भिः क्लेशः सोढव्य इति कथनम्	२०९
		विचार्यैव कर्म आरंभणीयमिति कथनम्	,,
		प्राप्तं सुखं दुःखं वा पूर्वकर्माधीनमिति कथनम्	२१०
६८.	सर्गः	विन्दमुहूर्तप्रतिपादनम्	२१२
		महदनुज्ञाया उत्तमगतिप्रापकत्वकथनम्	,,
		तिरश्चां कर्मण्यधिकारविचारः	२१५
७०.	सर्गः	युद्धेन विना क्षत्रियमरणस्य कुत्सितत्वकथनम्	२२८
७२.	सर्गः	सन्धिविग्रहादीनां प्रभेदकथनम्	२३०
७४.	सर्गः	अन्यमुखेनापि अतिथयः पूजनीया इति कथनम्	२४६
७५.	सर्गः	समुद्रस्नानस्य सर्वपापक्षयकरत्वकथनम्	२४७

धर्माकूते आरण्यकाण्डे शुद्धाशुद्धपाठः ॥

पुटसंख्या	पंक्तिसंख्या	शुद्धपाठः	अशुद्धपाठः
१०	२६	5. ११२ सर्गे	५.
४६	१२	निग्रहणे	ग्रहणे
६२	२७	८३.	४३
६३	२	सोमश्च	सामश्च
९१	२	सस्यं	सस्य
९२	८	त्स्विष्ट	स्विष्ट
९४	१४	श्वासान्ध	श्वसान्ध
९७	११	पर्व	पर्य
१०९	१९	त्रयोविंशचतुर्विंशसर्गौ	त्रयोविंशसर्गः
११४	१०	भङ्गः	भङ्ग
११५	१५	भुतानि	भूतानि
११९	६	शशः	शश
१२४	२१	लिप्स	लित्स
१२५	६	विद्युतः	विद्यतः
१३३	४	त्रयोविंशचतुर्विंशसर्गौ	चतुर्विंशः सर्गः
१६९	६	आमादयो	ओमादया
१६९	१७	मयं	मय
१९८	१६	न्यवस्थातुं	न्यवस्थातुं
२०७	१६	सोढ्वैव	सौढ्वैव
२३०	६	चतुस्सप्ततितमाः सर्गाः	तमौ सर्गौ
२३१	१७	उपग्रहः	उपग्रह
१४६	२३	द्वित्रिचतुस्सप्ततितमाः सर्गाः	चतुस्सप्ततितमः सर्गः

|| श्रीः ||

|| श्रीगणेशाय नमः ||

|| श्रीरामचन्द्राय नमः ||

|| धर्माकूतम् ||

|| आरण्यकाण्डः ||

अथ भगवान् वाल्मीकिः अयोध्याकाण्डे पित्राज्ञापरिपालनादिरामचरितवर्णनमुखेन सर्ववर्णसाधारणधर्मान् प्रतिपाद्य विराधादिराक्षसनिग्रहशरभङ्गादिमुनिजनपरिपालनादिरामचरितवर्णनमुखेन दुष्टनिग्रहशिष्टपरिपालनात्मकक्षत्रियासाधारणधर्मप्रतिपादनार्थं आरण्यकाण्डमारभते —

प्रविश्य तु महारण्यं दण्डकारण्यमात्मवान् ।
ददर्श रामो दुर्धर्षस्तापसाश्रममण्डलम् ॥ १ ॥

शरण्यं सर्वभूतानां सुसंमृष्टाजिरं सदा ।
मृगैर्बहुभिराकीर्णं पक्षिसंघैस्समाकुलम् ॥ ३ ॥

पूजितं चोपनृत्तं च नित्यमप्सरसां गणैः ।
विशालैरग्निशरणैः स्रुग्भाण्डैरजिनैः कुशैः ॥ ४ ॥

समिद्भिस्तोयकलशैः फलमूलैश्च शोभितम् ॥ ४= ॥

फलमूलाशनैर्दान्तैश्चीरकृष्णाजिनाम्बरैः ॥
सूर्यवैश्वानराभैश्च पुराणैर्मुनिभिर्वृतम् ॥ ७ ॥

पुण्यैश्च नियताहारैः शोभितं परमर्षिभिः ।
तद्ब्रह्मभुवनप्रख्यं ब्रह्मघोषनिनादितम् ।
ब्रह्मविद्भिर्महाभागैः ब्राह्मणैरुपशोभितम् ॥ ८ ॥

D A, 1

तथाऽग्रे षष्ठे सर्गेऽपि—

वैखानसा वालखिल्याः संप्रक्षाला मरीचिपाः ।
अश्मकुट्टाश्च बहवः पत्राहाराश्च तापसाः ॥ २ ॥

दन्तोलूखलिनश्चैव तथैवोन्मज्जकाः परे ।
गात्रशय्या अशय्याश्च तथैवाभ्रावकाशकाः ॥ ३ ॥

मुनयस्सलिलाहारा वायुभक्षास्तथाऽपरे ।
आकाशनिलयाश्चैव तथा स्थण्डिलशायिनः ॥ ४ ॥

तथो[व्रतो]पशामिनो दान्तास्तथार्द्रपटवाससः ।
सजपाश्च तपोनित्याः तथा पंचतपोन्विताः ॥ ५ ॥

सर्वे ब्राह्मया श्रिया जुष्टा दृढयोगास्समाहिताः ॥ ५= ॥
सोऽयं ब्राह्मणभूयिष्ठो वानप्रस्थगणो महान् ॥ १४= ॥

इत्यनेन वानप्रस्थैर्वनवासिभिः मुनिभिः फलमूलाशनभूशयनादिनियमवद्भिः स्थेयमिति सूचितम् ॥

तथा च *मनुः—'ग्रामादरण्यं निष्क्रम्य निवसेन्नियतेन्द्रियः । मुन्यन्नैर्विविधैर्मेध्यैः शाकमूलफलेन वा ॥ एतानेव महायज्ञान् निर्वपेद्विधिपूर्वकम् । वसीत चर्म चीरं वा सायं स्नायात् प्रगे तथा ॥ जटाश्च बिभृयान्नित्यं श्मश्रुलोमनखानि च । यद्भक्षयेत्ततो दद्यात् बलिं भिक्षां च शक्तितः ॥ अम्मूलफलभिक्षाभिरर्चयेदाश्रमागतान् । स्वाध्याये नित्ययुक्तः स्यात् दान्तो मैत्रः समाहितः ॥ दाता नित्यमनादाता सर्वभूतानुकम्पनः । वैतानिकं च जुहुयादग्निहोत्रं यथाविधि ॥ दर्शमस्कन्दयन्पूर्वं [पर्व] पौर्णमासं च योगतः । ऋक्षेष्ट्याग्रयणं चैव चातुर्मास्यानि चाहरेत् ॥ तुरायणं च क्रमशः

---

* षष्ठेऽध्याये ४—३२ श्लोकाः ।

दाक्षस्यायनमेव च । वासन्तशारदैर्मेध्यैर्मुन्यन्नैः स्वयमाहृतैः ॥ पुरोडाशां-श्चरूंश्चैव निर्वपेद्विधिपूर्वकम् । देवताभ्यश्च तद्धुत्वा वन्यं मेध्यतरं हविः ॥ शेषमात्मनि युञ्जीत लवणं च स्वयं कृतम् । स्थलजौदकशाकानि पुष्पमूल-फलानि च ॥ मेध्यवृक्षोद्भवान्यद्यात् स्नेहांश्च फलसंभवान् । वर्जयेन्मधु-मांसानि भौमानि कवकानि च ॥ भूस्तृणं शिग्रुकं चैव श्लेष्मातकफलानि च। त्यजे-दाश्वयुजे मासे मुन्यन्नं पूर्वसंचितम् ॥ जीर्णानि चैव वासांसि शाकमूलफलानि च। न फालकृष्टमश्नीयात् उत्सृष्टमपि केनचित् ॥ न ग्रामजातान्यार्तोऽपि पुष्पाणि च फलानि च । अग्निपक्वाशनो वा स्यात् कालपक्वभुगेव वा ॥ अश्मकुट्टो भवेद्वाथ दन्तोलूखलिकोऽपि वा । सद्यः प्रक्षालको वा स्यात्स्याद्वा षष्ठाष्ट-कालिकः ॥ चान्द्रायणविधानैर्वा शुक्लकृष्णे च वर्तयेत् । पक्षान्तयोर्वा-ऽप्यश्नीयाद्यवागूं क्वथितां सकृत् ॥ पुष्पमूलफलैर्वापि केवलैर्वर्तयेत्सदा । काल-पक्वैः स्वयं शीर्णैः वैखानसमते स्थितः ॥ भूमौ विपरिवर्तेत तिष्ठेद्वा प्रपदैर्दिनम् । स्थानासनाभ्यां विहरेत्सवनेषूपयन्नपः ॥ ग्रीष्मे पंचतपास्तु स्यात् वर्षास्वभ्रावकाशकः । आर्द्रवासास्तु हेमन्ते क्रमशो वर्धयंस्तपः ॥ उपस्पृशंस्त्रिषवणं पितृन् देवांश्च तर्पयेत् । तपश्चरंश्चोग्रतरं शोषयेद्देहमात्मनः ॥ अग्नीन्स्वात्मनि वैतानान्समारोप्य यथाविधि । अनग्निरनिकेतः स्यान्मुनिर्मूल-फलाशनः ॥ अप्रयत्नः सुखार्थेषु ब्रह्मचारी धराशयः । शरणेष्वममश्चैव वृक्षमूलनिकेतनः ॥ तापसेष्वपि विप्रेषु यात्रिकं भैक्षमाचरेत् । गृहमेधिषु चान्येषु द्विजेषु वनवासिषु ॥ ग्रामादाहृत्य वाऽश्नीयात् अष्टौ ग्रासान्वने वसन् । प्रतिगृह्य पुटेनैव पाणिना शकलेन वा ॥ एताश्चान्याश्च सेवेत दीक्षा विप्रो वने वसन् । विविधाश्चौपनिषदीरात्मसंसिद्धये श्रुतीः ॥ ऋषिभिर्ब्राह्मणैश्चैव गृहस्थैरेव सेविताः । विद्यातपोविवृद्ध्यर्थं शरीरस्य च [शु]सिद्धये ॥ अपराजितां वाऽऽस्थाय व्रजेद्दिशमजिह्मगः। आ निपाताच्छरीरस्य युक्तो वार्यनिलाशनः ॥ आसां महर्षिचर्याणां त्यक्त्वाऽन्यतमया तनुम् । वीतशोकभयो विप्रो ब्रह्मलोके महीयते ॥' इति ॥

1 विष्णुपुराणे — 'पर्णमूलफलाहारः केशश्मश्रुजटाधरः । भूमिशायी भवेत्तत्र मुनिः सर्वातिथिर्नृप ॥ चर्मकाशकुशैः कुर्यात् परिधानोत्तरीयके । तद्वत्त्रिषवणं स्नानं शस्तमस्य नरेश्वर ॥ देवताभ्यर्चनं होमः सर्वाभ्यागतपूजनम् । भिक्षाबलिप्रदानं च शस्तमस्य नरेश्वर ॥ वन्यस्नेहेन गात्राणामभ्यङ्गस्तस्य शस्यते । तपस्यतश्च राजेन्द्र शीतोष्णादिसहिष्णुता ॥ यस्त्वेतां नियतश्चर्यां वानप्रस्थश्चरेन्मुनिः । स दहत्यग्निवद्दोषान् जयेल्लोकांश्च शाश्वतान् ॥' इति ॥

2 बोधायनोऽपि — 'अथ वानप्रस्थस्य द्वैविध्यम् — पचमानका अपचमानकाश्चेति । तत्र पचमानकाः पंचविधाः—सर्वारण्यकाः, वैतुषिकाः, कन्दमूलभक्षाः, फलभक्षाः, शाकभक्षाश्चेति । तत्र सर्वारण्यका [नाम] द्विविधाः द्विविधमरण्यमाश्रयन्तः इन्द्रावसिक्ताः रेतोवसिक्ताश्चेति । तत्रेन्द्रावसिक्ता नाम वल्लीगुल्मलतावृक्षाणामानयित्वा श्रपयित्वा सायंप्रातरग्निहोत्रं हुत्वा यत्यतिथिव्रतिभ्यश्च दत्वाथेतरच्छेषभक्षाः । रेतोवसिक्ता नाम मांसं व्याघ्रवृकश्येनानां अन्यतमेन हतमानयित्वा श्रपयित्वा सायंप्रातरग्निहोत्रं हुत्वा यत्यतिथिव्रतिभ्यश्च दत्वाथेतरच्छेषभक्षाः ॥

वैतुषिकास्तुषधान्यवर्जं तण्डुलानानयित्वा श्रपयित्वा सायंप्रातरग्निहोत्रं हुत्वा यत्यतिथिव्रतिभ्यश्च दत्वा अथेतरच्छेषभक्षाः । कन्दमूलफलशाकभक्षाणामप्येवमेव ॥

पंचैवापचमानकाः— उन्मज्जकाः, प्रवृत्ताशिनः, मुखेनादायिनः, तोयाहाराः, वायुभक्षाश्चेति । तत्रोन्मज्जका नाम लोहाश्मकरणवर्जम् । हस्तेनादाय प्रवृत्ताशिनः । मुखेनादायिनः मुखेनाददते । तोयाहाराः [केवलं तोयाहाराः] । वायुभक्षाः निराहाराश्चेति ॥

---

1 तृतीये अंशे नवमाध्याये १९—२३ श्लोकाः ।

2 तृतीयप्रश्ने तृतीयखण्डे १-२३ सूत्राणि ।

शास्त्रपरिग्रहः सर्वेषां ब्रह्मवैखानसानाम् । न द्रुह्येत [1] दंशमशकादीनामहिंसकः तापसो भवेत् । वनप्रतिष्ठस्सन्तुष्टश्चीरचर्मजलप्रियः । अतिथीन् पूजयेत्पूर्वं काले त्वाश्रममागतान् । देवविप्राग्निहोत्रे च युक्तस्तपसि तापसः ॥ कृच्छ्रां वृत्तिमसंहार्यां सामान्यां मृगपक्षिभिः । तदर्हजनसंहा[भा]र्यां काषायकटुकाश्रयाम् ॥ परिगृह्य शुभां वृत्तिमेतां दुर्जनवर्जिताम् । वनवासमुपाश्रित्य ब्राह्मणो नावसीदति ॥ मृगैस्सह परिस्पन्दस्संवासस्तेभिरेव च । तैरेव सदृशी वृत्तिः प्रत्यक्षं स्वर्गलक्षणम् ॥' इति ॥

[2] याज्ञवल्क्यः—'सुतविन्यस्तपत्नीकस्तया वानुगतो वनम् । वानप्रस्थो ब्रह्मचारी साग्निः सोपासनो व्रजेत् ॥'

छागलेयः—'सपत्नीकस्समारोप्य ब्राह्मणः प्रव्रजेद्गृहात् ।'

[3] कूर्मपुराणेऽपि—'एकपादेन तिष्ठेत मरीचीन्वा पिबेत्तदा । पंचाग्निर्धूमपो वा स्यादूष्मपः सोमपोऽपि वा ॥ पयः पिबेच्छुक्लपक्षे कृष्णपक्षे च गोमयम् । शीर्णपर्णाशनो वा स्यात् कृच्छ्रैर्वा वर्तयेत्सदा ॥ अथर्वशिरसोऽध्येता वेदान्ताभ्यासतत्परः । यमान् सेवेत सततं नियमांश्चाप्यतंद्रितः ॥ जितेन्द्रियो जितक्रोधः तत्वज्ञानविचिन्तकः । ब्रह्मचारी भवेन्नित्यं न पत्नीं प्रतिसंश्रयेत् ॥ यस्तु पत्न्या वनं गत्वा मैथुनं कामतश्चरेत् । तद्व्रतं तस्य लुप्येत प्रायश्चित्तीयते द्विजः । नक्तं चान्नं समश्नीयात् दिवा वाश्नीत शक्तितः'॥ इति ॥

[4] श्रीमदानुशासनिके उमामहेश्वरसंवादे उमां प्रति महेश्वरवचनम्—'वानप्रस्थेषु यो धर्मस्तं मे शृणु समाहिता । श्रुत्वा चैकमना

---

1. 'दंशमशकान् हिमवान् तापस:' इति मुद्रितपाठ: ।
2. प्रायश्चित्ताध्याये 45 श्लोकः ।
3. उत्तरार्धे 28 अध्याये 30—33 श्लोका:15—17 श्लोकाश्च ।
4. 142 अध्याये 4--19 श्लोका: ।

देवि धर्मबुद्धिधरा भव ॥ संसिद्धैर्नियतैः सद्भिः वनवासमुपागतैः । वान-प्रस्थैरिदं कर्म कर्तव्यं शृणु यादृशम् ॥ त्रिकालमभिषेकं च पितृदेवार्चनं तथा । अग्निहोत्रपरिस्यन्दद्दष्टिहोमविधिस्तथा ॥ नीवारग्रहणं चैव फलमूल-निषेवणम् । इङ्गुदैरण्डतैलानां स्नेहार्थे च निषेवणम् ॥ योगचर्याकृतैस्सिद्धैः कामक्रोधविवर्जितैः । वीरशय्यामुपासद्भिः वीरस्थानोपसेविभिः ॥ युक्तैर्योग-वहैस्सद्भिः ग्रीष्मे पंचतपैस्तथा । मण्डूकयोगनियतैर्यथान्यायं निषेविभिः ॥ वीरासनरतैर्नित्यं स्थण्डिले शयनं तथा । शीततोयाग्नियोगश्च कर्तव्यो धर्म-बुद्धिभिः ॥ अब्भक्षैर्वायुभक्षैश्च शैवलोत्तरभोजनैः । अश्मकुट्टैस्तथा दान्तैः संप्र-क्षालैस्तथा परैः॥ चीरवल्कलसंवीतैर्मृगचर्मनिवासिभिः । कार्या यात्रा यथाकालं यथाधर्मं यथाविधि ॥ वने नित्यैर्वनचरैर्वनजैर्वनगोचरैः । वनं गुरुमिवासाद्य वस्तव्यं वनजीविभिः ॥ तेषां होमक्रिया धर्मः पंचयज्ञनिषेवणम् । भागं च पंचयज्ञस्य वेदोक्तस्यानुपालनम् ॥ अष्टमीयज्ञपरता चातुर्मास्यनिषेवणम् । पौर्णमासादयो यज्ञा नित्ययज्ञस्तथैव च ॥ विमुक्ता दारसंयोगैर्विमुक्तास्सर्व-संकरैः । विमुक्तास्सर्वपापैश्च चरन्ति मुनयो वने ॥ स्रुग्भाण्डपरमा नित्यं त्रेताग्निशरणास्सदा । सन्तस्सत्पथनित्या ये ते यान्ति परमां गतिम् ॥ ब्रह्म-लोकं महापुण्यं सोमलोकं च शाश्वतम् । गच्छन्ति मुनयस्सिद्धाः सत्यधर्म-व्यपाश्रयाः ॥ एष धर्मो मया देवि वानप्रस्थाश्रितः शुभः । विस्तरेणाथ संपन्नो यथास्थूलमुदाहृतः ॥ ' इति ॥

तथा *तत्रैव स्थलान्तरे —— 'निवृत्तिरुपभोगेषु गोरसानां शमे रतिः । स्थण्डिले शयने योगः शाकपर्णनिषेवणम् ॥ फलमूलाशनं वायुरापः शैवलभक्षणम् । ऋषीणां नियमा ह्येते यैर्जयन्त्यजितां गतिम् ॥ ' इति ।

एवमन्येऽपि वानप्रस्थधर्माः केचन अयोध्याकाण्डेऽपि प्रसङ्गा-ल्लिखिताः ॥

---

* आनुशासनिके पर्वणि 141 अध्याये 111, 112 श्लोकौ ।

तद्दृष्ट्वा राघवः श्रीमान् तापसाश्रममण्डलम् ।
अभ्यगच्छन्महातेजा विज्यं कृत्वा महद्धनुः ॥ ९ ॥

अनेन राज्ञा विनीतवेषेणैवाश्रमे प्रवेष्टव्यमिति सूचितम् । तच्च प्राक् भरतस्य भरद्वाजाश्रमप्रवेशे प्रपंचितम् ॥

अथ सकलकलासहितं सुधाकरमिव सकलजनानन्दकरं रामचन्द्रमवलोक्य दिव्येन चक्षुषा परिकलिततदीयवृत्तान्ताः महर्षयः,

पुष्पं मूलं फलं वन्यं आश्रमं च महात्मनः ।
निवेदयित्वा धर्मज्ञास्ततः प्रांजलयोऽब्रुवन् ॥ १६ ॥

धर्मपालो जनस्यास्य शरण्यस्त्वं महायशाः ।
पूजनीयश्च मान्यश्च राजा दण्डधरो गुरुः ॥ १७ ॥

इन्द्रस्यैव चतुर्भागः प्रजा रक्षति राघव ।
राजा तस्माद्वरान् भोगान् भुङ्क्ते लोकनमस्कृतः ॥ १८ ॥

ते वयं भवता रक्ष्या भवद्विषयवासिनः ।
नगरस्थो वनस्थो वा त्वं नो राजा नरेश्वरः ॥ १९ ॥

नन्वत्र 'भवद्विषयवासिनः', 'त्वं नो राजा' इति मुनिगणवचनाद्रामस्य राष्ट्रस्वामित्वमवगम्यते । तदसंगतम् । दशरथं प्रति '[1]पुरं च राष्ट्रं च मही सकानना मया निसृष्टा भरताय दीयताम् । अहं निदेशं भवतोऽनुपालयन्नन्वग्गमिष्यामि चिराय सेवितुम् ॥' इति रामवाक्येन सशैलवनकाननस्य राज्यस्य भरताय दत्तत्वावगमेन 'इक्ष्वाकूणामियं भूमिः सशैलवनकानना । मृगपक्षिमनुष्याणां निग्रहप्रग्रहावपि ॥ तां पालयति धर्मात्मा भरतः सत्यवागृजुः । तस्य धर्मकृतादेशा वयमन्ये च पार्थिवाः । चरामो वसुधां कृत्स्नां धर्मसन्तानमिच्छवः ॥ तस्मिन्नृपतिशार्दूले भरते धर्मवत्सले ।

---

1. अयोध्या का. स. ३४. श्लो. ५५

पालयत्यखिलां भूमिं कश्चरेद्धर्मनिग्रहम् ॥ ते वयं धर्मविभ्रष्टं स्वधर्मे परमे स्थिताः । भरताज्ञां पुरस्कृत्य निगृह्णीमो यथाविधि ॥ भरतस्तु महीपालो वयं चादेशवर्तिनः । त्वं तु धर्मादतिक्रान्तः कथं शक्य उपेक्षितुम् ॥' इति [1]किष्किन्धाकाण्डस्थरामवचनपर्यालोचनया भरतप्रेष्यत्वावगमेन च रामस्य राज्यस्वामित्वाभावात् । न च 'त्वं नो राजा' इति ऋषिवचनमुपचरितार्थमिति वाच्यम् । सत्यवचनानामृषीणां वचनस्योपचरितार्थत्वकल्पनायोगात् ॥

तथा '[2]तपस्विनां रणे शत्रून् हन्तुमिच्छामि राक्षसान् । पश्यन्तु वीर्यमृषयः सभ्रातुर्मे तपोधनाः ॥ नैवमर्हथ मां वक्तुमाज्ञाप्योऽहं तपस्विनाम् ।' इत्यादिवचनावगतं राज्यस्वामित्वांगीकारपूर्वकं मुनिजनसंरक्षणप्रतिज्ञाकरणमप्यसंगतं स्यात्, रामस्य राज्याभावादेव रक्षणस्याकर्तव्यत्वात् इति चेन्न । उपभोगार्हग्रामनगरवन्यादिराज्यांशस्य कैकेय्या प्रार्थितस्य भरताय दत्तत्वेऽपि उपभोगानुपयुक्तवनाद्यंशे रामस्य स्वामित्वेन राज्यत्वोक्तौ विरोधाभावात् ॥

तथा **चायोध्याकाण्डे** भरतं प्रति रामवाक्यम्—[3]' स च प्रमाणं धर्मात्मा राजा लोकगुरुस्तव । पित्रा दत्तं यथाभागमुपभोक्तुं त्वमर्हसि ॥ चतुर्दश समाः सौम्य दण्डकारण्यमाश्रितः । उपभोक्ष्ये तु यद्दत्तं भागं पित्रा महात्मना ॥ [4]त्वं राजा भव भरत स्वयं नराणां वन्यानामहमपि राजराण्मृगाणाम् । गच्छ त्वं पुरवरमद्य संप्रहृष्टः संहृष्टस्त्वहमपि दण्डकान् प्रवेक्ष्ये ॥ छायां ते दिनकरभाप्रबाधमानं वर्षत्रं भरत करोतु मूर्ध्नि शीताम् । एतेषामहमपि काननद्रुमाणां छायां तामतिशयनीं सुखं श्रयिष्ये ॥ शत्रुघ्नः कुशलमतिश्च ते सहायः सौमित्रिर्मम विदितः प्रधानमित्रम् । चत्वारस्तनयवरा वयं नरेन्द्रं सत्यस्थं भरत चराम मा विषादम् ॥' इति ॥

---

1. १८ सर्गे ६, ६½, ९-११½, २४ श्लोकाः । 2. आरण्यकाण्डे षष्ठे सर्गे २५ श्लोकः २१ श्लोकस्य प्रथमार्धं च । 3. १०४ सर्गे २५, २६ श्लोकौ । 4. १०७ सर्गे १७-१९ श्लोकाः ।

कैकेयीवरस्य उपभोगोपयोगिराज्यविषयत्वमपि, '[1]सूत रत्नसुसंपूर्णा चतुर्विधबला चमूः । राघवस्यानुयात्रार्थं क्षिप्रं प्रतिविधीयताम् ॥ धनकोशश्च यः कश्चित् धान्यकोशश्च मामकः । तौ राममनुगच्छेतां वसन्तं निर्जने वने ॥ यजन्पुण्येषु देशेषु विसृजंश्चाप्तदक्षिणाः । ऋषिभिश्च समागम्य प्रवत्स्यति सुखं वने ॥ भरतश्च महाबाहुरयोध्यां पालयिष्यति । सर्वकामैः पुनः श्रीमान् रामः संसाध्यतामिति ॥' इति दशरथवचनात् भीतायाः कैकेय्याः '[2]राज्यं गतजनं साधो पीतमण्डां सुरामिव । निरास्वाद्यतमं शून्यं भरतो नाभिपत्स्यते ॥' इत्यादिवचनैरवगम्यते । तस्माद्वनांशराजत्वमविरुद्धम् ॥

किं च रामभद्रस्योपद्रवकरणं कैकेय्या अभिप्रेतम् । तथा च विराधेन नीयमानां सीतां पश्यतो रामस्य वाक्यम्— '[3]यदभिप्रेतमस्मासु प्रियं वरवृतं च यत् । कैकेय्यास्तत्सुसंवृत्तं क्षिप्रमद्यैव लक्ष्मण ॥ या न तुष्यति राज्येन पुत्रार्थे दीर्घदर्शिनी । ययाऽहं सर्वभूतानां हितः प्रस्थापितो वनम् ॥ अद्येदानीं सकामा सा या माता मम मध्यमा ।' इति । एवं च तादृशोपद्रवो वनांशपरिपालनेनापि भवतीति तदंशे राजत्वमविरुद्धमेव ॥

किंच रामस्य राजत्वाभावे लवणासुरोपद्रुता ऋषिजना यथा राज्यस्थं रामं शरणं गतास्तथा राज्यस्थं भरतं राजानमेव शरणं गच्छेयुः । रामं चात्र शरणं गताः । अतोऽपि राम एव वनांशे राजा भवति ॥

न च 'पुरं च राष्ट्रं च मही सकानना' इत्यादिवचनैः सकाननाया भूम्याः भरताय दत्तत्वप्रतिपादनाविरोध इति वाच्यम् । तस्य दण्डकारण्यव्यतिरिक्तभोगोपयोगिकाननविषयत्वात् । अत एव [4]'सप्त सप्त च वर्षाणि दण्डकारण्यमाश्रितः । अभिषेकमिमं त्यक्त्वा जटाजिनधरो वशी' ॥

1. अयोध्याकाण्डे ३६ सर्गे २, ७, ८, ९ श्लोकाः । 2. सर्गे १२ श्लोकः ।
3. आरण्यकाण्डे २ सर्गे १७, १८ श्लोकौ ।
4. अयोध्याकाण्डे १८ सर्गे ३७ श्लोकः ।

इति, '[1] त्वयाऽरण्यं प्रवेष्टव्यं नव वर्षाणि पंच च' इति च कैकेयीवचनं संगच्छते । तस्मादुपभोगानुपयुक्तवनांशाधिपत्यमादाय सकललोकवृत्तान्ताभिज्ञैः ऋषिभिरुक्तं राज्यस्वामित्वं, तदङ्गीकृत्य मुनिजनरक्षणप्रतिज्ञाकरणं च रामस्य उपपन्नमेव ॥

न चैवं '[2] तां पालयति धर्मात्मा भरतः सत्यवागृजुः'। 'तस्य धर्मकृतादेशा वयमन्ये च पार्थिवाः ।' इत्यादिकिष्किन्धाकाण्डस्थरामवचनविरोध इति वाच्यम् । 'त्वं नो राजा' इति ऋषिवचनविरोधेन तेषामन्यार्थपरत्वात् । न च तद्विरोधेन ऋषिवचनान्यथाभाव एव किं न स्यादिति वाच्यम् । '[3] लौकिकानां हि साधूनामर्थं वागनुवर्तते । ऋषीणां पुनराद्यानां वाचमर्थोऽनुधावति ॥' इति न्यायेन ऋषिवाक्यान्यथाकरणस्य निषेधात् ॥

किं च उभयोर्विरोधेन अन्यथा [तस्य] उपचरितार्थत्वकल्पनाप्रसक्तौ यस्यान्यथाकरणे पूर्वोत्तरविरोधो न भवति तस्यैवान्यथाकरणं [यु]उक्तम् । तत्र 'ते वयं भवता रक्ष्याः' इति ऋषिवचनं उपचरितार्थमिति स्वीकृत्य किष्किन्धाकाण्डवचनस्य यथाश्रुतार्थकत्वस्वीकारे भरतः प्रेरकः इति स्यात् । तच्च पूर्वोत्तरविरुद्धम् ॥

तथाहि—अयोध्याकाण्डे तावत् भरतः पितृमातृभ्रात्रादिभिः दत्तं, मन्त्रिपुरोहितादिभिश्चानुज्ञातं धर्मतः प्राप्तमपि राज्यं भ्रातृभक्त्या उपेक्ष्य रामानयनाय वने प्रवृत्तः तदनागमननिर्णये सति [4] 'अधिरोहार्य पादाभ्यां पादुके हेमभूषिते । एते हि सर्वलोकस्य योगक्षेमं विधास्यतः ॥' इति प्रार्थनापूर्वकं श्रीरामचन्द्रचरणारविन्दसंस्पृष्टां, रामेण च दत्तां पादुकां संप्राप्य, '[5] चतुर्दश हि वर्षाणि जटाचीरधरो ह्यहम् । फलमूलाशनो वीर भवेयं रघुनन्दन ॥ तवागमनमाकांक्षन् वसंश्च नगराद्बहिः । तव पादुकयो-

---

1. अयो. स. १८ श्लो. ३५ उ. । 2. ७, ९ श्लोकयोः पूर्वार्धे ।
3. उत्तररामचरिते प्रथमे अङ्के दशमः श्लोकः । 4. ११२ सर्गे २१ श्लोकः ।
5. २३–२५ श्लोकाः ।

न्यस्तराज्यतन्त्रः परन्तप ।। चतुर्दशे हि संपूर्णे वर्षेऽहनि नृपनन्दन । न द्रक्ष्यामि यदि त्वां तु प्रवेक्ष्यामि हुताशनम् ।।' इति प्रतिज्ञां कृतवानिति प्रतिपादितम् । न चैतत्प्रेषकस्य कृत्यमिति वक्तुं शक्यम् ।।

तथा अरण्यकाण्डेऽपि प्रतिज्ञाकरणे भरतस्तिष्ठतीत्यपि प्रतिपादितम् । '[1] अस्मिंस्तु पुरुषव्याघ्रः काले दुःखसमन्वितः । तपश्चरति धर्मात्मा त्वद्भक्त्या भरतः पुरे ।। त्यक्त्वा राज्यं च मानं च भोगांश्च विविधान् बहून् । तपस्वी नियताहारः शेते शीते महीतले ।। संत्यज्य विविधान् भोगान् आर्यं सर्वात्मना श्रितः ।। जितः स्वर्गस्तव भ्रात्रा भरतेन महात्मना । वनस्थमपि तापस्ये यस्त्वामनुविधीयते ।।' इति ।।

तथा **युद्धकाण्डेऽपि** — '[2] पादुके ते तु रामस्य गृहीत्वा भरतः स्वयम् । चरणाभ्यां नरेन्द्रस्य योजयामास धर्मवित् ।। अब्रवीच्च तदा रामं भरतः स कृताञ्जलिः । एतत्ते रक्षितं राजन्राज्यं निर्यातितं मया ।। अद्य जन्म कृतार्थं मे संवृत्तश्च मनोरथः । यस्त्वां पश्यामि राजानमयोध्यां पुनरागतम् ।। अवेक्षतां भवान् कोशं कोष्ठागारं पुरं बलम् । भवतस्तेजसा सर्वं कृतं दशगुणं मया ।।' इति स्वस्यैव प्रेष्यभावः प्रतिपादितः । प्रत्युत भरतोपि स्वस्य रामदासत्वं स्वयमेव वदत्य**योध्याकाण्डे**—'[3] यो मे भ्राता पिता बन्धुः यस्य दासोस्मि धीमतः ।' इति । अत उक्तरीत्या भरतस्य रामप्रेरकत्वं पूर्वोत्तरविरुद्धम् ।।

धर्मशास्त्रविरुद्धं चेदम् । तथा [4] **चापस्तम्बः** — 'व्युपतोदव्युपजापव्यभिहासोदामन्त्रणनामधेयग्रहणप्रेषणानीति गुरोर्वर्जयेत्' इति । **अत्रो-ज्ज्वला**—व्युपतोदः अङ्गुल्यादिना घट्टनं यदाभिमुख्यार्थं क्रियते । व्युपजापः कर्णयोर्मुहुर्मुहुर्जल्पनं । व्यभिहासः आभिमुख्येन हसनम् । सर्वत्र वकारश्छान्दसः अपपाठो वा । उदामन्त्रणं उच्चैस्संबोधनं, यथा बधिरं प्रति । नामधेय-

---

1. १६ सर्गे श्लो. २७, २८, ३२ व ३३ । 2. १३० सर्गे ५१-५३ श्लोकाः ।
3. ७१ सर्गे ३१½ श्लोकः । 4. धर्मसूत्रे प्र. १ पट. ८ सू. १४ ।

ग्रहणं दशम्यां पितृविहितस्य नाम्नो ग्रहणम्, न पूज्यनाम्नो भगवदादेः। प्रेषण-माज्ञापनं इदमित्थं कुर्विति। एतानि गुरुविषये न कर्तव्यानि' इति॥

अतः पूर्वोत्तरविरोधात् धर्मशास्त्रविरोधाच्च भरतस्य रामप्रेरकत्वमनुपपन्नमेव। एवं रामोपि भरतप्रेषणमंगीकृतवानित्यप्यसङ्गतम्। अधर्मिष्ठ-जाबालिवचनश्रवणसंजातकोपवशे[न]ब्राह्मणोत्तमं जाबालिमधिक्षिप्तवतः रामस्य अधर्मिष्ठप्रेषणरूपभरतवचनांगीकारेण प्रवृत्त्यसंभवात्। अतो ऋषिवचनबाधेन **किष्किन्धाकाण्ड**वचनानां स्वार्थपरत्वे बहुविरोधापत्त्या तत्परिहाराय मुनि-वचनमेव मुख्यार्थमिति स्वीकृत्य किष्किन्धाकाण्डवचनान्येव अनुजेषु वात्स-ल्यातिशयेन स्वापेक्षया अनुजानां अतिशयप्रदापनपराणीति योजनीयम्॥

एतदभिप्रायेणैव स्वकृतजनस्थाननिधनं लक्ष्मणकृतमिति व्यवहरति रामः—

युद्धकाण्डे – [1] 'यश्चैव शक्त्याभिहतस्त्वयाद्य इच्छान्विषादं सहसा-भ्युपेतः। स एष रक्षोगणराजमृत्युः सपुत्रदारस्य तवाद्य युद्धे॥ एतेन चात्यद्भुतदर्शनानि शरैर्जनस्थानकृतालयानि। चतुर्दशान्यात्तवरायुधानि रक्षस्सहस्राणि निषूदितानि॥' इति।

आरण्यकाण्डेपि — [2] 'भावज्ञेन कृतज्ञेन धर्मज्ञेन च लक्ष्मण। त्वया पुत्रेण धर्मात्मा न संवृत्तः पिता मम॥' इति।

एवमुत्तरकाण्डे — [3] 'भवन्तो मम सर्वस्वं भवन्तो मम जीवितम्। भवद्भिश्च कृतं राज्यं पालयामि नरेश्वराः॥' इति।

काचित्कभरतप्रेष्यत्वानुरोधेन रामस्वातन्त्र्यपराणां बहूनामन्यथाकरणं चायुक्तमेव। 'तस्य धर्मकृतादेशाः' इत्यादिकिष्किन्धाकाण्डवचनानि भरत-

---

1. ५९ सर्गे १३१, १३२ श्लोकौ। 2. स, १५, श्लो २८.
3. ४४ सर्गे २० श्लोकः।

प्रेष्यत्वं यथा न भवति तथा योजयितुं शक्यानि । तस्य भरतस्य राज्यं दातुं धर्मेण परिपालनरूपधर्मेण पित्रा कृतादेशा इति योजनीयम् ॥

एवं 'तस्मिन्नृपतिशार्दूले' इत्यादिकमपि मयि च पालयति सती-त्यध्याहृत्य योजनीयम् । 'भरताज्ञां पुरस्कृत्य' इत्यादिकमपि भरताय राज्यं दातुं पित्रा कृतामाज्ञां पुरस्कृत्येति योजनीयम् । [1]'भरतश्च महीपालो वयं चादेशवर्तिनः' इत्यपि भरतो वयं च पित्रादेशे वर्तनीया इति योजनीयम् ॥

स्वयमपि रामः राजत्वं स्वस्य वदति खरयुद्धप्रकरणे—[2]'पापमाचरतां घोरं लोकस्याप्रियमिच्छताम् । अहमासादितो राजा प्राणान् हन्तुं निशाचर ॥' इति । तस्मादृषिवचनं रामस्य राज्यप्रतिपादकं न केनापि विरुद्ध्यत इति श्लिष्टतरम् ॥

न्यस्तदण्डा वयं राजन् जितक्रोधा जितेन्द्रियाः ।
रक्षितव्यास्त्वया शश्वद्गर्भभूतास्तपोधनाः ॥ २० ॥

अनेन मुनिभिर्जितेन्द्रियैरपराधिष्वपि दण्डो न कर्तव्य इति सूचितम् । तथा च **राजधर्मे**—'[3]आत्मौपम्यस्तु भूतेषु यो वै भवति मानवः । न्यस्तदण्डो जितक्रोधः प्रेत्य चेह लभेत्सुखम् ॥' इति ।

एवमुक्त्वा फलैर्मूलैः पुष्पैर्वन्यैश्च राघवम् । २०1/2
न्यायवृत्ता यथान्यायं तर्पयामासुरीश्वरम् ॥ २२ ॥

अनेन सकलजनेश्वरो राजा मुनिभिरपि पूजनीय इति सूचितम् । अयमर्थः प्राक् प्रपञ्चितः ॥

इति प्रथमः सर्गः ॥

---

1. किष्किन्धाकाण्डे १८ सर्गे २३½ श्लो० ।
2. आरण्यकाण्डे स. २९. श्लो. १० ।
3. राजधर्मे ६६ अध्याये ३६ श्लोकः ।

अथ द्वितीयः सर्गः ॥

द्वितीये — तदनु मुनिजनकृतसपर्यामुदितान्तरङ्गो रामभद्रस्समुदिते भगवति सवितरि, समामन्त्र्य सर्वानपि मुनिजनान्, अतिगहनं वनमेवान्वगाहत । अथ मृगवनवराहशार्दूलसमाकुले कानने वसता सकलजनविरोधिना विराधनाम्ना रक्षसा सत्वरमभिगम्य समाहृतां जनकनन्दिनीं अवलोक्य, किञ्चिदिव संभ्रान्तहृदयो रामभद्रो लक्ष्मणमिदमवादीत् ॥

> यदभिप्रेतमस्मासु प्रियं वरवृतं च यत् ।
> कैकेय्यास्तत्सुसंवृत्तं क्षिप्रमद्यैव लक्ष्मण ॥ १७ ॥
>
> परस्पर्शात्तु वैदेह्या न दुःखतरमस्ति मे ।
> पितुर्वियोगात्सौमित्रे स्वराज्यहरणात्तथा ॥ १९ ॥

ननु अत्र पितृवियोगाद्राज्यभ्रंशाच्च भार्यापहरणमतिक्लेशकरमित्युक्तम् । तदनुपपन्नम् । अन्नपानादिसंप्रदानेन विशिष्य स्वरक्षकस्य पितुर्वियोगस्य स्वमुख्यधर्मराज्यपरिपालनभ्रंशस्य च महाक्लेशकरत्वौचित्यात्, परित्यक्तुं परिग्रहीतुं च शक्याया भार्याया अपहरणं कथं तदपेक्षया अतिक्लेशकरमित्युक्तमिति चेन्न । पितुर्वियोगस्याधर्माधायकत्वाभावात् । पित्राज्ञया भरताय राज्यप्रदानस्यापि धर्मत्वेन भरतसात्कृतभोगोपयुक्तग्रामनगरादिराज्यांशभिन्नदण्डकारण्यादिरूपवनांशपरिपालनेनापि परिपालनप्रयुक्तधर्मसंपादनसंभवात् न ताभ्यामतिक्लेशः । अनन्यशरणायाः परित्यक्तुमयोग्याया भार्यायाः संरक्षणस्य मुख्यधर्मतया तस्याः परिभवे स्वधर्मलोप एव भवितेति पितृवियोगराज्यापहरणाभ्यामपि भार्यापहरणस्यातिदुःखकरत्वोक्तिर्युक्तैव ॥

भार्यापहरणं सर्वस्मादतिक्लेशकरमित्यर्थः, **उद्योगपर्वणि** कृष्णं प्रति कुन्तीवाक्येन प्रतिपादितः —[1] ‘न राज्यहरणं दुःखं द्यूते चात्मपराजयः ।

---

1. ९० अध्याये ८५, ८६ श्लोकौ ।

प्रव्राजनं सुतानां वा न मे तद्दुःखकारणम् ॥ यत्र सा तरुणी श्यामा सभायां रुदती तदा । अश्रौषीत्परुषा वाचस्तन्मे दुःखतरं महत् ॥' इति ।

[1]वनपर्वणि मार्कण्डेयं प्रति युधिष्ठिरवाक्येनापि— 'नात्मानमनुशोचामि नेमान् भ्रातॄन् महामुने । हरणं चापि राज्यस्य यथेमां द्रुपदात्मजाम् ॥' इति ॥

भार्या रक्षणीयेत्यत्र [2] **मनुः**— 'सूक्ष्मेभ्योऽपि प्रसङ्गेभ्यः स्त्रियो रक्ष्या विशेषतः । द्वयोर्हि कुलयोः शोकमावहेयुररक्षिताः ॥ इमं हि सर्ववर्णानां पश्यन्तो धर्ममुत्तमम् । यतन्ते रक्षितुं भार्यां भर्तारो दुर्बला अपि ॥ स्वां प्रसूतिं चरित्रं च कुलमात्मानमेव च । स्वं च धर्मं प्रजाश्चैव जायां रक्षन्हि रक्षति ॥' इति ।

सगद्गदपदमतिकृपणवचनमुदाहरन्तं राममवलोक्य क्रुद्धो लक्ष्मणो रुद्धो नाग इव निश्वसन् तमिदमाह—

अनाथ इव लोकानां नाथस्त्वं वासवोपमः ।
मया प्रेष्येण काकुत्स्थ किमर्थं परितप्यसे ॥ २१ ॥

तदहं राज्यलाभरते भरते समुज्जृंभितं कार्यं [कोपं] अधुना समरचितसकलमुनिजनतपश्चर्याविरोधे विराधे समुत्स्रक्ष्यामि ॥

इति द्वितीयः सर्गः ॥

---

1 नोपलभ्यते मुद्रितपुस्तके. T R. K पुस्तके १३० अध्याये द्रष्टव्यः ।

2. नवमेऽध्याये 5-7 श्लोकाः ।

अथ तृतीयः सर्गः ॥

तृतीये — इति बलावलेपसमुदीरितसौमित्रिवचनश्रवणसंजातकोपेन 'कौ युवां क गमिष्यथः, किंनिमित्तं च वनागमनम्' इति पृच्छते विराधाय, 'दाशरथी, पित्राज्ञया वनगोचरौ क्षत्रियौ नौ विद्धि, त्वं तु कः? किंनिमित्तश्च तावद्दण्डकारण्यसंचारः' इति पृच्छन्तौ रामलक्ष्मणौ विराधः समभाषत । 'जयेन शतह्रदायामुत्पन्नं तपश्चर्याप्रसादितपितामहवरलब्धाशस्त्रवध्यभावं विराधनामानं मां निगृह्य जनकनन्दिनीप्रत्याहरणं युवयोरशक्यतरम् । तदुत्सृज्य प्रमदां सत्वरं पलायेथां' इति तद्वचनसमाकर्णनसमनन्तरमेव सज्जेन धनुषा सुपर्णानिलतुल्यवेगान् रुक्मपुंखान् विशिखान् प्रमुंचन्तं रामभद्रं अवलोक्य अतिकोपेन समाकुलितहृदयो विराधोऽपहाय च जनकनन्दिनीं आदाय च वज्रसमानसारं निशितं शूलं कालान्तक इव व्यात्ताननस्तमभिप्रदुद्राव ॥

अथ विराधः करधृतविमलतरकृपाणौ रामलक्ष्मणौ तूर्णमभिगृह्य समारोप्य च स्कन्धयोः स्वाभिमतां दिशं प्रतस्थे ॥

इति तृतीयः सर्गः ॥

अथ चतुर्थपञ्चमौ ॥

चतुर्थपञ्चमयोः — तदनु सीता क्रूरकर्मणा बलिना रक्षसा नीयमानौ रामलक्ष्मणावभिवीक्ष्य;

मां हरोत्सृज्य काकुत्स्थौ नमस्ते राक्षसोत्तम ॥ ३ ॥

इति विराधं प्रार्थयामास । अनेन स्त्रिया स्वप्राणव्ययेनापि स्वभर्तृहितं कर्तव्यमिति सूचितम् । तथा **चादिपर्वणि** बकवधे ब्राह्मणीवाक्यं—[1] 'एतद्धि परमं नार्याः कार्यं लोके सनातनम् । प्राणानपि परित्यज्य यद्भर्तुर्हितमाचरेत् ॥' इति ।

---

1. आदिपर्वणि बकवधपर्वणि १५८ अध्याये ४ श्लोकः ।

ततः सानुजं भर्तारं मुञ्चेति निशाचरं कृपणतरमभियाचमानां जनकनन्दिनीं तत्प्रार्थनामनादृत्यैव प्रस्थितं निशाचरं चावलोक्य विराधे वधकृतत्वरौ रामलक्ष्मणौ स्वभुजबलेन रक्षोभुजयुगलमाभज्य, तच्च भूमौ निपात्य नितरां निष्पिपिषतुः। तत्कर्मविस्मयस्तिमितमानसो राक्षसो राममित्थमाचचक्षे—

कौसल्यासुप्रजास्तात रामस्त्वं विदितो मया।
वैदेही च महाभागा लक्ष्मणश्च महायशाः॥ १५॥
अभिशापादहं घोरां प्रविष्टो राक्षसीं तनुम्।
तुम्बुरुर्नाम गन्धर्वः शप्तो वैश्रवणेन ह॥ १६॥

तदनु शापमोचनाय प्रसाद्यमानो वैश्रवणो 'दाशरथिना रामचन्द्रेण संयुगे हतस्य तव शापमोचनं भवेत्। ततश्च तत्प्रभावेनाचिरादेव स्वर्गं गमिष्यसि' इति व्याजहार। सोऽहमधुना तव प्रसादमाहिम्ना महतरशापात् प्रमुक्तः स्वभवनं गच्छेयम्।

अवटे चापि मां राम प्रक्षिप्य कुशली व्रज॥
रक्षसां गतसत्वानामेष धर्मः सनातनः॥ २१॥

इत्येवमभिधाय स्वर्गमार्गमलंचकार। तदनु लक्ष्मणेन खनित्रखातेऽवटे निष्पिष्टकंधरं निशाचरं निखाय, परिष्वज्य जनकनन्दिनीं मुदितान्तरङ्गो रामभद्रः—

कष्टं वनमिदं दुर्गं न च स्म वनगोचराः।
अभिगच्छामहे शीघ्रं शरभंगं तपोधनम्॥ २॥

इति लक्ष्मणमभिधाय तदाश्रमपरिसरमभिसरन्—

समीपे शरभंगस्य ददर्श महदद्भुतम्।
विभ्राजमानं वपुषा सूर्यवैश्वानरोपमम्॥ ४॥

अवरुह्य रथोत्संगादाकाशे विबुधानुगम् ।
असंस्पृशन्तं वसुधां ददर्श विबुधेश्वरम् ॥ ५ ॥
सुप्रभाभरणं देवं विरजोम्बरधारिणम् ॥ ५½ ॥

अनेन अम्लानस्रक्त्वादिकं देवानां लक्षणमुक्तम् । तथा च वनपर्वणि नलोपाख्याने—

[1]'साऽपश्यद्विबुधान् सर्वानस्वेदान् स्तब्धलोचनान् । हृषितस्रग्रजोहीनान् हृष्टानस्पृशतः क्षितिम् ॥ छायाद्वितीयो म्लानस्रग्रजस्स्वेदसमन्वितः । भूमिष्ठो नैषधश्चैव निमेषेण च सूचितः ॥ सा समीक्ष्य च तान् सर्वान् पुण्यश्लोकं च भारत । नैषधं वरयामास भैमी धर्मेण पाण्डव ॥' इति ।

हरिभिर्वाजिभिर्युक्तमन्तरिक्षगतं रथम् ।

अनेनेन्द्रस्य हर्यश्वत्वमुक्तम् । तथा च श्रुतिः—[2]'इन्द्र जुषाणो हर्यश्व याहि' इति ॥

ददर्शादूरतस्तस्य तरुणादित्यसन्निभम् ॥ ७ ॥
पाण्डराभ्रघनप्रख्यं चन्द्रमण्डलसन्निभम् ।
अपश्यद्विमलं छत्रं चित्रमाल्योपशोभितम् ॥ ८ ॥
गन्धर्वामरसिद्धाश्च बहवः परमर्षयः ।
अन्तरिक्षगतं देवं वाग्भिरग्र्याभिरीडिरे ॥ ९ ॥

अथ गगनतलगतमेव दुर्निवारशासनं पाकशासनं तेन च सह किमपि वदन्तं शरभंगं चावलोक्य रामभद्रो लक्ष्मणमवादीत्—

1. ५७ अध्याये २४—२६ श्लोकाः ।
2. द्वितीयाष्टके ४ प्रश्ने ३ अनुवाके ।

ये हयाः पुरुहूतस्य पुरा शक्रस्य नः श्रुताः ।
अन्तरिक्षगता दिव्यास्त इमे हरयो ध्रुवम् ॥ १३ ॥
इमे च पुरुषव्याघ्रा ये तिष्ठन्त्यभितो रथम् ।
शतं शतं कुण्डलिनो युवानः खड्गपाणयः ॥ १४ ॥
रूपं बिभ्रति सौमित्रे पंचविंशतिवार्षिकम् ।
एतद्धि किल देवानां वयो भवति नित्यदा ॥ १७ ॥ इति

अनेन देवानां नित्ययौवनत्वमुक्तम् । तथा च (निघंटुः) 'अमरा निर्जराः' इति ॥

तदनु दूरत एव जनकनन्दिनीं लक्ष्मणं चावस्थाप्य महर्षिसन्दर्शनाय समागच्छन्तं रामभद्रमवलोक्य पाकशासनस्तं मुनिमिदमभाषत । अयमसौ दाशरथिः रामभद्रः त्वद्दर्शनकुतूहली समायाति ।

कर्म ह्यनेन कर्तव्यं महदन्यैस्सुदुष्करम् ।
निष्पादयित्वा तत्कर्म ततो मां द्रष्टुमर्हति ॥ २३ ॥

तदहमधुनैव भगवन्तमनुज्ञायागच्छामीत्यभिधाय गगनतलसंचारचतुरतुरगयुक्तेन रथेन गगनमार्गमलंचकार । शक्रापक्रमणसमनन्तरं रामलक्ष्मणौ जनकनन्दिनी च कृताग्निहोत्रं शरभंगं मुनिमभिवाद्य तदाज्ञया समुपाविशन् । तदनु किंनिमित्तं बलभिदागमनमिति पृच्छते रामाय तत्रभवान् मुनिरखिलमपि तदागमनवृत्तान्तमाचख्यौ ॥

मामेष वरदो राम ब्रह्मलोकं निनीषति ।
जितमुग्रेण तपसा दुष्प्रापमजितात्मभिः ॥ २८ ॥

नन्वत्र शरभंगं मुनिं ब्रह्मलोकं नेतुमिन्द्रः समागत इति प्रतीयते । तदसंगतम् । मनुष्याणां लोकान्तरनयनस्य यमदूताधीनत्वावगमात् ।

तथा च **सावित्र्युपाख्याने** यमं प्रति सावित्रीवाक्यं—

[1]'श्रूयते भगवन् दूतास्तवागच्छन्ति मानुषान्। नेतुं किन्तु भवान् कस्मादागतोऽसि स्वयं प्रभो ॥'

यम उवाच— [2]अयं च धर्मसंयुक्तो रूपवान् गुणसागरः। नार्हो मत्पुरुषैर्नेतुं अतोऽस्मि स्वयमागतः ॥' इति।

एवं च सति मनुष्याणामिन्द्रेण नयनं कथमिति चेन्न। सावित्रीवचनावगतयमकिंकरकर्तृकनयनस्य पापिष्ठजनविषयत्वात्, यमकर्तृकनयनस्य साधारणपुण्यवद्विषयत्वात्। यथोक्तवर्णाश्रमधर्मशालिनां तु न यमवश्यता, न वा तत्किंकरवश्यता।

तथा च **विष्णुपुराणे**— [3]'स्वपुरुषमभिवीक्ष्य पाशहस्तं वदति यमः किल तस्य कर्णमूले। परिहर मधुसूदनप्रपन्नान् प्रभुरहमन्यनृणां न वैष्णवानाम् ॥ अहममरवरार्चितेन धात्रा यम इति लोकहिताहिते नियुक्तः। हरिगुरुवशगोऽस्मि न स्वतन्त्रः प्रभवति संयमने ममापि विष्णुः ॥ कटकमकुटकर्णिकादिभेदैः कनकमभेदमपीष्यते यथैकम्। सुरपशुमनुजादिकल्पनाभिः हरिरखिलाभिरुदीर्यते तथैकः ॥ क्षितितलपरमाणवोऽनिलान्ते पुनरपि यान्ति यथैकतां धरित्र्याम्। सुरपशुमनुजादयस्तथान्ते गुणकलुषेण सनातनेन तेन ॥ हरिममरवरार्चिताङ्घ्रिपद्मं प्रणमति यः परमार्थतो हि मर्त्यः। तमपगतसमस्तपापबन्धं व्रज परिहृत्य यथाग्निमाज्यसिक्तम् ॥ इति यमवचनं निशम्य पाशी यमपुरुषस्तमुवाच धर्मराजम्। कथय मम विभो समस्तधातुर्भवति हरेः खलु यादृशोऽस्य भक्तः ॥

---

1. वनपर्वणि पतिव्रतामाहात्म्यपर्वणि २९७ अध्याये १४ श्लोकः।
2. वनपर्वणि पतिव्रतामाहात्म्यपर्वणि २९७ अध्याये १६ श्लोकः।
3. तृतीयेंशे ७ अध्याये १४--३५ श्लोकाः।

यमः — न चलति निजवर्णधर्मतो यः सममतिरात्मसुहृद्विपक्षपक्षे । न हरति न च हन्ति किञ्चिदुच्चैः सितमनसं तमवेहि विष्णुभक्तम् ॥ कलिकलुषमलेन यस्य नात्मा विमलमतेर्मलिनीकृतस्तमेनम् । मनसि कृतजनार्दनं मनुष्यं सततमवेहि हरेरतीव भक्तम् ॥ कनकमपि रहस्यवेक्ष्य बुद्ध्या तृणमिव यः समवैति वै परस्वम् । भवति च भगवत्यनन्यचेताः पुरुषवरं तमवेहि विष्णुभक्तम् ॥ स्फटिकगिरिशिलामलः क विष्णुः मनसि नृणां क च मत्सरादिदोषः । नहि तुहिनमरीचिरश्मिपुञ्जे भवति हुताशनदीप्तिजः प्रतापः ॥ विमलमतिरमत्सरः प्रशान्तः शुचिचरितोऽखिलसत्वमित्रभूतः । प्रियहितवचनोऽस्तमानमायो वसति सदा हृदि तस्य वासुदेवः ॥ वसति हृदि सनातने च तस्मिन् भवति पुमान् जगतोऽस्य सौम्यरूपः । क्षितिरसमतिरम्यमात्मनोन्तः कथयति चारुतयैव सालपोतः ॥ यमनियमविधूतकल्मषाणामनुदिनमच्युतसक्तमानसानाम् । अपगतमदमानमत्सराणां व्रज भट दूरतरेण मानवानाम् ॥ हृदि यदि भगवाननादिरास्ते हरिरसिशङ्खगदाधरोऽव्ययात्मा । तदघमघविघातकर्तृभिन्नं भवति कथं सति चान्धकारमर्के ॥ हरति परधनं निहन्ति जन्तून् वदति तथाऽनृतनिष्ठुराणि यश्च । अशुभजनितदुर्मदस्य पुंसः कलुषमतेर्हृदि तस्य नास्त्यनन्तः ॥ न सहति परसंपदं विनिन्दां कलुषमतिः कुरुते सतामसाधुः । न यजति न ददाति यश्च सन्तं मनसि न तस्य जनार्दनोऽधमस्य ॥ परमसुहृदि बान्धवे कलत्रे सुततनयापितृमातृभृत्यवर्गे । शठमतिरुपयाति योऽर्थतृष्णां तमधमचेष्टमवेहि नास्य भक्तम् ॥ अशुभमतिरसत्प्रवृत्तिसक्तः सततमनार्यकुशीलसंगमत्तः । अनुदिनकृतपापबन्धयुक्तः पुरुषपशुर्न हि वासुदेवभक्तः ॥ सकलमिदमहं च वासुदेवः परमपुमान्परमेश्वरः स एकः । इति मतिरचला भवत्यनन्ते हृदयगते व्रज तान्विहाय दूरात् ॥ कमलनयन वासुदेव विष्णो धरणिधराच्युत शङ्खचक्रपाणे । भव शरणमितीरयन्ति ये वै त्यज भट दूरतरेण तानपापान् ॥ वसति मनसि यस्य सोऽव्ययात्मा पुरुषवरस्य न तस्य दृष्टिपाते । तव गतिरथवा ममास्ति

चक्रप्रतिहतवीर्यबलस्य सोन्यलोक्यः ॥ इति निजभटशासनाय देवो रवितनयस्स किलाह धर्मराजः । मम कथितमिदं च तेन गुह्यं कुरुवर सम्यगिदं मयापि चोक्तम् ॥' इति ॥

तस्माद्वर्णाश्रमधर्मयुक्तस्य परमेश्वरभक्तस्य महर्षेः शरभंगस्य यमतत्किंकरादिवश्यत्वाभावात् इन्द्रेण स्वयमागत्य नयनं युक्तमेव । अत एव तादृशगुणयुक्तस्य धर्मपुत्रस्य इन्द्रेण नयनं प्रतिपादितं **महाप्रस्थानिके**— [1]'ततः सन्नादयन् शक्रो दिवं भूमिं च सर्वशः । रथेनोपययौ पार्थं आरोहेत्यब्रवीच्च तम् ॥ अनेन त्वं शरीरेण स्वर्गं गन्ता न संशयः ॥' इति ॥

अहं ज्ञात्वा नरव्याघ्र वर्तमानमदूरतः ।
ब्रह्मलोकं गमिष्यामि त्रिदिवं देवसेवितम् ॥ २९ ॥

अनेन महतां सन्दर्शनं तत्समागमश्च महाफलत्वेन नातिक्रमणीय इति सूचितम् । तथा च **वनपर्वणि**— [2]सतां सन्दर्शनात्स्पर्शात्संजल्पाच्च सहासनात् । धर्माचाराः प्रवर्धन्ते सिद्ध्यन्त्यपि च मानवाः । अहन्यहनि धर्मस्य योनिस्साधुसमागमः । तस्मात् प्राज्ञैश्च वृद्धैश्च सुस्वभावैस्तपस्विभिः ॥ सद्भिश्च सह संसर्गः कार्यः शमपरायणैः ॥ येषां त्रीण्यवदातानि विद्या योनिश्च कर्म च । तान्सेवेत्तैः सहास्था हि शास्त्रेभ्योपि गरीयसी ॥ इति ॥

'मदीयचिरन्तनसुकृतपरिपाकसमार्जितान् शुभतरात् लोकान् पात्रभूताय प्रियातिथये भवते प्रयच्छामि' इति सहृदयानन्दजननीमतिमधुरां गिरमुदाहरन्तं तमृषिं, अत्युदारचरितो रघुवीरः सविनयमिदमवादीत्—

---

1. तृतीयेऽध्याये १, ६ श्लोकौ.

2. प्रथमेध्याये २५-२७ श्लोका: । 'सतां सन्दर्शनात्' इत्यादिक: प्रथम: श्लोकस्तु मुद्रितपुस्तके न दृश्यते । अथापि तद्विपरीतार्थबोधक 'असतां दर्शनात्' इत्यादिक: २९ तम: श्लोको दृश्यत एव । अत: ''सतां सन्दर्शनात्'' इत्यादिकेन श्लोकेनापि भाव्यमेवेत्यवधेयम् ।

अहमेवाहरिष्यामि सर्वलोकान् महामुने ।
आवासं त्वहमिच्छामि प्रदिष्टमिह कानने ॥ ३३ ॥

अनेन क्षत्रियैः प्रतिग्रहो न कर्तव्य इति सूचितम् । तथा च **मनुः**— [1]त्रयो धर्मा निवर्तन्ते ब्राह्मणात् क्षत्रियं प्रति । अध्यापनं याजनं च तृतीयश्च प्रतिग्रहः ॥ इति । **मोक्षधर्मे जापकोपाख्यानेऽपि**— [2]योद्धव्यं रक्षितव्यं च क्षत्रधर्मः किल द्विज । दातारः क्षत्रियाः प्रोक्ताः गृह्णीयां भवतः कथम् । द्विजाः प्रतिग्रहे युक्ता दातारो राजवंशजाः । इति ।

तदनु निखिलयातुधाननिधनाय धरणीतलमवतीर्णस्य दाशरथेः सुतीक्ष्णदर्शनमेव शुभोदर्कं मन्वानो महर्षिस्तदाश्रमगमनमार्गमादिश्य,

एष पन्था नरव्याघ्र मुहूर्तं पश्य तात माम् ।
यावज्जहामि गात्राणि जीर्णां त्वचमिवोरगः ॥ ३८ ॥

इत्यभिहितवान् ॥

ततोऽग्निं सुसमाधाय हुत्वा चाज्येन मन्त्रवित् ।
शरभंगो महातेजाः प्रविवेश हुताशनम् ॥ ३९ ॥
तस्य रोमाणि केशांश्च ददाहाग्निर्महात्मनः ।
जीर्णां त्वचं तथास्थीनि यच्च मांसं सशोणितम् ॥ ४० ॥
स च पावकसंकाशः कुमारः समपद्यत ॥ ४१ ॥
स लोकानाहिताग्नीनां ऋषीणां च महात्मनाम् ।
देवानां च व्यतिक्रम्य ब्रह्मलोकं व्यरोहत ॥ ४२ ॥
स पुण्यकर्मा भवने द्विजर्षभः
पितामहं सानुचरं ददर्श ह ।

---

1. दशमाध्याये ७७ श्लोकः

2. 'योद्धव्यं' इत्यादिश्लोकः जापकोपाख्याने मुद्रिते पुस्तके न दृश्यते । 'द्विजाः प्रतिग्रहे' इत्यादिकमन्तिममर्धं तु १७९ अध्याये ८२ श्लोके दृश्यते ॥

पितामहश्चापि समीक्ष्य तं द्विजं
ननन्द सुस्वागतमित्युवाच ॥ ४४ ॥

नन्वत्राग्निं प्रविष्टस्य शरभंगस्य ब्रह्मलोकगमनादिप्रतिपादनमसंगतम् । प्राया[ण]नाशकशस्त्राग्निविषोदकोद्बन्धनप्रपतनैश्च मरणमिच्छतां पिण्डनिवृत्तिरिति अग्नौ मृतानामात्महन्तृणां उत्तरक्रियाधिकारनिषेधावगमात् । [1]'अनन्दा नाम ते लोका अन्धेन तमसा वृताः । तांस्ते प्रेत्याभिगच्छन्ति ये के चात्महनो जनाः ॥' इत्यात्महन्तृणां तमोलोकप्राप्त्यवगमाच्च बुद्धिपूर्वकमग्निं प्रविष्टस्य शरभंगस्य कथं ब्रह्मलोकावाप्तिरिति चेन्न । उदाहृतवचनानां क्रोधादिना अविधानेन देहत्यागिविषयत्वात्, 'अनुष्ठानासमर्थस्य वानप्रस्थस्य जीर्यतः । भृग्वग्निजलपातेन देहत्यागो विधीयते' ॥ इत्यादिस्मृत्युक्तप्रकारेण देहत्यागं कृतवतां नायं दोषः । प्रत्युत उत्कृष्टमेव फलं भवति ॥

तथा च **कूर्मपुराणे तटाकमाहात्म्ये** — [2]'अग्निप्रवेशं यः कुर्यात्सोमतीर्थे नराधिप । जलेनानशनेनापि नासौ मर्त्योऽभिजायते ॥' इति । तत्रैव **प्रयागमाहात्म्ये** — [3]गङ्गायमुनयोर्मध्ये कारीषाग्निं विशेत्तु यः । अहीनांगो ह्यरोगश्च पञ्चेन्द्रियसमन्वितः ॥ यावन्ति रोमकूपाणि तस्य गात्रेषु मानवाः । तावद्वर्षसहस्राणि स्वर्गे लोके महीयते ॥ इति ।

आनुशासनिकेऽपि — [4]आत्मानमुपजीवन्यो दीक्षां द्वादशवार्षिकीम् । हुत्वाग्नौ देहमुत्सृज्य वह्निलोके महीयते ॥ इति ॥

इति पञ्चमः सर्गः ॥

---

1. ईशावास्योपनिषदि ३ ऋक् । अनन्दा इत्यत्र असुर्या इति भेदः ।
2. उत्तरभागे ४१ अध्याये ५० श्लोकः ।
3. पूर्वार्धे ३७ अध्याये ३, ४, श्लोकौ
4. १४२ अध्याये ५२ श्लोकः

अथ षष्ठः सर्गः ॥

षष्ठे— तदनु नानाविधनियमनियमितान्तःकरणा मुनिजनाः समेत्य रामभद्रमहमहमिकया सप्रश्रयमेवमवोचन्—

त्वमिक्ष्वाकुकुलस्यास्य पृथिव्याश्च महीधरः ।
प्रधानश्चासि नाथश्च देवानां मघवानिव ॥ ८ ॥

विश्रुतस्त्रिषु लोकेषु यशसा विक्रमेण च ।
पितृभक्तिश्च सत्यं च त्वयि धर्माश्च पुष्कलाः ॥ ९ ॥

अधर्मस्तु महांस्तात भवेत्तस्य महीपतेः ।
यो हरेद्बलिषड्भागं न च रक्षति पुत्रवत् ॥ ११ ॥

युञ्जानः स्वानिव प्राणान् प्राणैरिष्टान्सुतानिव ।
नित्ययुक्तः सदा रक्षन् सर्वान्विषयवासिनः ॥ १२ ॥

प्राप्नोति शाश्वतीं राम कीर्तिं स बहुवार्षिकीम् ।
ब्रह्मणः स्थानमासाद्य तत्र चापि महीयते ॥ १३ ॥

अत्र अप्रमादेन प्रजास्संरक्षणीयाः, रक्षणादुत्तमलोकावाप्तिः, अरक्षणे दोषश्च भवतीति सूचितम् । तथा च रक्षणं कर्तव्यमित्यत्र **मनुः**—[1] 'युक्तश्चैवाप्रमत्तश्च परिरक्षेदिमाः प्रजाः' । इति ।

राजधर्मेऽपि—[2] 'वेदाध्ययनशीलानां विप्राणां साधुकर्मणाम् । पालने यत्नमातिष्ठ सर्वलोकस्य चानघ ॥' इति ।

रक्षणात्फलमित्यत्र **मनुः**— '[3] रक्षणादार्यवृत्तानां कण्टकानां च शोधनात् । नरेन्द्रास्त्रिदिवं यान्ति प्रजापालनतत्पराः ॥' इति । **राजधर्मेऽपि**—

---

1. सप्तमे अध्याये १४२ श्लोकः
2. ६६ अध्याये ४० श्लोकः
3. नवमाध्याये २५३ श्लोकः ।

'[1]यो भूतानि धनात्क्रान्त्या वधात्क्लेशाच्च रक्षति । दस्युभ्यः प्राणदानात्स धनदः सुखदो विराट् ॥ स सर्वयज्ञैरीजानो राजाथाभयदक्षिणैः । अनुभूयेह भद्राणि प्राप्नोतीन्द्रसलोकताम् ॥ ब्राह्मणार्थे समुत्पन्ने योऽभिनिस्सृत्य युद्धयति । आत्मानं यूपमुत्सृज्य स यज्ञोऽनन्तदक्षिणः ॥ यं वने विचरेद्धर्मं तपसा वापि पाण्डव । रक्षया तच्छतगुणं धर्मं प्राप्नोति पार्थिवः ॥' इति ।

अरक्षणे दोषमाह **मनुः**—[2]'अरक्षितारं राजानं बलिषड्भागहारिणम् । तमाहुः सर्वलोकस्य समग्रमलहारिणम् ॥' इति ॥

राजधर्मेऽपि—[3]'धर्मारामान्धर्मपरान् ये न रक्षन्ति मानवान् । पार्थिवाः पुरुषव्याघ्र तेषां पापं हरन्ति ते ॥' इति ।

[4]'यः करोति परं धर्मं मुनिर्मूलफलाशनः । तत्र राज्ञश्चतुर्भागः प्रजा धर्मेण रक्षितुः' ॥

अनेन धर्मेण प्रजाः परिपालयतो राज्ञस्तत्कृतसुकृतचतुर्थांशप्राप्तिरिति सूचितम् । तथा च **मनुः**—[5]'यं हि धर्मं चरन्तीह प्रजा राज्ञा सुरक्षिताः । चतुर्थं तस्य धर्मस्य राजा भागमुपाश्नुते ॥' इति ।

सोऽयमधुना निखिलमुनिगणस्त्वया सनाथोऽप्यनाथ इव क्रूरतरैर्निशाचरैः वध्यमानो न क्वचिदपि क्रियाकलापे निश्चलमन्तःकरणमाबध्नाति ।

अतस्त्वां शरणार्थं च शरण्यं समुपागताः ।
परिपालय नो राम वध्यमानान्निशाचरैः ॥ १९ ॥

---

1. शान्तिपर्वणि ९७ अध्याये ८ — १० श्लोकाः । यं वने + पार्थिवः इत्यन्तिमश्लोकस्तु मुद्रिते भारते न दृश्यते ।

2. अष्टमाध्याये ३०८ श्लोकः

3. शान्तौ ६६ अध्याये ३३ श्लोकः

4. ६७ अध्याये २७ श्लोकः, ७५ अध्याये ६ श्लोकश्च एवमर्थबोधकौ स्तः ॥

5. अयं श्लोकः मनुस्मृतौ न दृश्यते । भारते शान्तिपर्वणि ७५ अध्याये ६ श्लोकः तु इत्थमेव दृश्यते । ४ पादे पुनः राजा भारत विन्दति इति भेदो दृश्यते ॥

इति सकरुणमभियाचमानेषु तपस्विजनेषु परमकारुणिको रघुकुलतिलकस्तानेवमवोचत् ॥

नैवमर्हथ मां वक्तुं आज्ञाप्योऽहं तपस्विनाम् ॥ २१½ ॥

अनेन तपस्विनामपेक्षितं अप्रार्थितेनैव प्रह्वेन राज्ञा साधनीयमिति सूचितम् । तथा च **राजधर्मे**—'[1] आश्रमेषु यथाकालं चेलं भोजनभाजनम् । स्वयमेव हरेद्राजा सत्कृत्य विधिपूर्वकम् ॥ आत्मानं सर्वकार्याणि तापसे राज्यमेव च । निवेदयेत्प्रयत्नेन तिष्ठेत्प्रह्वश्च नित्यशः ॥ आहवे च महीं लब्ध्वा श्रोत्रियायोपपादयेत् ॥' इति ।

तपस्विनां रणे शत्रून् हन्तुमिच्छामि राक्षसान् ।
पश्यन्तु वीर्यमृषयः सभ्रातुर्मे तपोधनाः ॥ २५ ॥

अत्र क्षत्रियेण तपस्विनां ब्राह्मणानां शत्रुर्हन्तव्य इति सूचितम् । तथा च **मनुः**—

'[2] ब्राह्मणान्बाधमानं तु कामादवरवर्णजम् । हन्याच्छित्रैर्वधोपायैरुद्वेजनकरैर्नृपः ॥' इति ।

दत्वा वरं चापि तपोधनानां
धर्मे धृतात्मा सह लक्ष्मणेन ।
तपोधनैश्चापि सभाज्यवृत्तः
सुतीक्ष्णमेवाभिजगाम वीरः ॥ २६ ॥

अनेन राज्ञा भीत्या शरणमागतानां अभयवरदानपूर्वकं संरक्षणं कर्तव्यमिति सूचितम् ।

तथा चाभयप्रदानविषये **मनुः**—

---

1. ८६ अध्याये २५-२७ श्लोकाः । अन्तिमार्धं तु न दृश्यते ।

2. ९ अध्याये २४८ श्लोकः ।

'[1] अभयस्य हि यो दाता स पूज्यस्सततं नृपः । सत्रं हि वर्तते तस्य सदैवाभयदक्षिणम् ॥' इति ।

राजधर्मेऽपि —

'[2] स सर्वयज्ञैरीजानो राजाथाभयदक्षिणैः । अनुभूयेह भद्राणि प्राप्नोतीन्द्रसलोकताम् ॥' इति । शरणागतसंरक्षणे **शान्तिपर्वण्यपि** —

'[3] बालातुरेषु भूतेषु परित्राणं कुरूद्वह । शरणागतेषु कारुण्यं कुर्यास्तत्र समाहितम् ॥' इति । **वनपर्वण्यपि** श्येनं प्रति शिबिः —

'[4] संत्रस्तरूपस्त्राणार्थः त्वत्तो भीतो महाद्विजः । मत्सकाशमनुप्राप्तः प्राणगृध्नुरयं द्विजः ॥ एवमभ्यागतस्येह कपोतस्याभयार्थिनः । अप्रदाने परं धर्मं कथं श्येन न पश्यसि ॥ प्रस्पन्दमानः संभ्रान्तः कपोतः श्येन लक्ष्यते । मत्सकाशे जीवितार्थी तस्य त्यागोऽतिगर्हितः ॥ एकतः क्रतवस्सर्वे एकतः परिवासराः । एकतो भयभीतस्य प्राणिनः प्राणरक्षणम् ॥' इति ॥

॥ इति षष्ठः सर्गः ॥

अथ सप्तमः सर्गः ॥

सप्तमे—इति तपस्विजनसमक्षमभिधाय तैस्सह अतितीक्ष्णतपसं सुतीक्ष्णमभिगम्य संश्रावयन् स्वकीयं नाम तमभिवादयामास । ततस्तद्दर्शनजनितानन्दस्स मुनिः स्वागतादिसपर्यया पर्यायेणापूर्वातिथिं तमभिनन्द्य सहर्षमेव-

---

1. अष्टमाध्याये ३०३ श्लोकः

2. ९७ अध्याये ९ श्लोकः

3. ६६ अध्याये २१ श्लोकः

4. १३१ अध्याये ३—६ श्लोकाः । अन्तिमः श्लोकस्तु अन्यथा भवति ।

मभाषत । त्वद्दर्शनमभिलषन् सुरेश्वरसमादिष्टानिष्टानपि लोकान्नारूढवानस्मि । सांप्रतमखिलतपस्विजनसंरक्षणाय निखिलमुनिजनसमक्षं बद्धदीक्षं भवन्तमवलोक्य परिपूरिताभिलाषस्तपोनिर्जितेष्वशेषेषु लोकेषु विहर्तुमिच्छामि ॥

तेषु देवर्षिजुष्टेषु जितेषु तपसा मया ।
मत्प्रसादात्सभार्यस्त्वं विहरस्व सलक्ष्मणः ॥ १२ ॥

इति वदन्तं मुनिं,

प्रत्युवाचात्मवान्रामो ब्रह्माणमिव कश्यपः ॥ १३ ॥
अहमेवाहरिष्यामि स्वयं लोकान्महामुने ।
आवासं त्वहमिच्छामि प्रदिष्टमिह कानने ॥ १४ ॥ इति ।

पुनश्च ततोऽतिरमणीयोऽयमाश्रमः समुचितो भवति वासाय । किन्तु अकुतोभया मृगगणा मुनिगणकदनाय नित्यमटवीं पर्यटन्ति । नातोऽन्यः कश्चिद्विशेषोऽस्ति । तद्भवान्सभार्यश्चिरमत्रैव विहरत्विति मुनेर्वचनमाकर्ण्य हिंस्रमृगगणनियमनसमर्थोऽपि रामभद्रश्चिरकालावासयोग्यो नायं प्रदेश इति तमभिधाय, पश्चिमाचलाधिरूढं भगवन्तमादित्यं चावलोक्य, समुपास्य च सन्ध्यां, उपभुज्य च तापसभोज्यं मुनिदत्तमन्नं, रम्ये सुतीक्ष्णाश्रमे तां रात्रिमत्यवाहयत् ॥

इति सप्तमः सर्गः ॥

अथ अष्टमः सर्गः ॥

अष्टमे — अथ समुत्थाय यथाकालं, उपस्पृश्य च महोत्पलसुगन्धि जलं, अभ्यर्च्य चाग्न्यादीष्टदेवताः, समुपस्थाय च समुदितं भगवन्तं दिनमणिं सुतीक्ष्णमहर्षिमुपगम्य मुनिजनाश्रममण्डलावलोकने कृतत्वरं मां दण्डकारण्यवासिनो मुनिजना अपि स्वाश्रमावलोकनाय त्वरयन्ति ।

अविषह्यातपो यावत्सूर्यो नातिविराजते ।

अमार्गेणागतां लक्ष्मीं प्राप्येवान्वयवर्जितः ॥ ८ ॥

तावदिच्छामहे गन्तुमित्युक्त्वा चरणौ मुनेः ।
ववन्दे सहसौमित्रिः सीतया सह राघवः ॥ ९ ॥

अत्र अमार्गेणागतामित्यनेन दुष्कुलोत्पन्नस्य असत ऐश्वर्यं सकलजनोपद्रवकरमिति सूचितम् ॥

तथा च **राजधर्मे** ऋषिसंवादे — '[1]अकुलीनस्तु पुरुषः प्राकृतः साधुसंश्रयाम् । दुर्लभैश्वर्यतां प्राप्तो निन्दितः शत्रुतां व्रजेत् ॥' इति ।

अथ मुनिः कृतनमस्कारौ रामलक्ष्मणावुत्थाप्य सस्नेहमालिङ्ग्य—

गम्यतां वत्स सौमित्रे भवानपि च गच्छतु ।
आगन्तव्यं त्वया तात पुनरेवाश्रमं मम ॥ १६ ॥

इति समुदाजहार । तदनु तदाज्ञामादाय समाबध्य कक्षां, आदाय च विमलतरौ कृपाणौ प्रतिगृह्य च रौद्रे धनुषी, अवसज्य च शुभतरौ तूणीरौ,

निष्क्रान्तावाश्रमाद्गन्तुमुभौ तौ रामलक्ष्मणौ ॥ १९ ॥
श्रीमन्तौ रूपसंपन्नौ दीप्यमानौ स्वतेजसा ॥ १९½ ॥

इति अष्टमः सर्गः ॥

अथ नवमः सर्गः ॥

नवमे — तदनु जनकराजतनया दण्डकारण्ये रक्षोवधाय समावद्धकक्ष्यं भर्तारमवलोक्य, प्रणयातिशयेन हृदयानन्दकरीं अतिमधुरां गिरमेवं उदाजहार—

अयं धर्मः सुसूक्ष्मेण विधिना प्राप्यते महान् ।
निवृत्तेन तु शक्योऽयं व्यसनात्कामजादिह ॥ २ ॥

---

1. ११८ अध्याये ६ श्लोक;

त्रीण्येव व्यसनान्यत्र कामजानि भवन्त्युत ।
मिथ्यावाक्यं गुरुतरं तस्माद्गुरुतरे उभे ॥
परदाराभिगमनं विना वैरं च रौद्रता ॥ ३ ॥

अत्र वाचिकस्य मिथ्यावाक्यस्य गुरुतरत्वं मानसिकपरद्रव्याभिध्यानाद्यपेक्षं । वाचिकादपि मिथ्यावचनात् कायिकयोः परदाराभिगमनपरहिंसनयोर्गुरुतरत्वं बोध्यम् ॥

परद्रव्याभिध्यानादेर्मानसिकादिदोषत्वं **मनुराह** —[1]"परद्रव्येष्वभिध्यानं मनसाऽनिष्टचिन्तनम् । वितथाभिनिवेशं च त्रिविधं कर्म मानसम् ॥ पारुष्यमनृतं चैव पैशुन्यं चैव सर्वशः । अनिबद्धप्रलापश्च वाङ्मयं स्याच्चतुर्विधम् ॥ अदत्तानामुपादानं हिंसा चैव विधानतः । परदारोपसेवा च शारीरं त्रिविधं स्मृतम् ॥' इति । गुरुतरत्वं च फलतारतम्येन बोध्यम् ।

फलतारतम्यञ्च याज्ञवल्क्य आह —[2]"अन्त्यपक्षिस्थावरतां मनोवाक्कायकर्मभिः । दोषैः प्रयाति जीवोऽयं भवं योनिशतेषु च ॥' इति ।

मनुरपि —[3]'मानसं मनसैवायमुपभुङ्क्ते शुभाशुभम् । वाचैव वाक्कृतं कर्म कायेनैव तु कायिकम् ॥ शरीरजैः कर्मदोषैः याति स्थावरतां नरः । वाचिकैः पक्षिमृगतां मानसैरन्त्यजातिताम् ॥' इति । अत्राधिकप्रज्ञायुक्तत्वात् मनुजजन्म श्रेष्ठम् । तदपेक्षया हीनप्रज्ञत्वात् पक्षिजन्म निकृष्टम् । तदपेक्षया निकृष्टं स्थावरत्वम्, अप्रज्ञत्वादिति विवेक इति ॥

ततस्त्वां प्रस्थितं दृष्ट्वा मम चिन्ताकुलं मनः ।
त्वद्वृत्तं चिन्तयन्त्या वै भवेन्निःश्रेयसं महत् ॥ १२ ॥

अनेन भर्तृहितकारिण्या भार्यायाः श्रेयो भवतीति सूचितम् । तथा

---

1. द्वादशाध्याये ५—७ श्लोकाः
2. १२१ श्लोकः
3. द्वादशाध्याये ८, ९ श्लोकौ

च याज्ञवल्क्यः — [1]'पतिप्रियहिते युक्ता स्वाचारा विजितेन्द्रिया । इह कीर्तिमवाप्नोति प्रेत्य चानुत्तमां गतिम् ॥ प्रहृष्टमानसा नित्यं स्थानमानविचक्षणा । भर्तुः प्रियहिता या तु सा भार्या इति राजरा ? ॥' इति ।

विष्णुपुराणेऽपि — [2]'या स्त्री शुश्रूषणाद्भर्तुः कर्मणा मनसा गिरा । तद्धिता सा समाप्नोति तत्सालोक्यं यतो द्विज ॥' इति ।

बोधायनोऽपि— [3]'भर्तृहिते यतमानाः स्वर्गं लोकं जयेरन्' इति ।

न हि मे रोचते वीर गमनं दण्डकान्प्रति ॥ १२½ ॥

क्षत्रियाणां च हि धनुर्हुताशस्येन्धनानि च ।
समीपतः स्थितं तेजो बलमुच्छ्रयते भृशम् ॥ १५ ॥

अनेन शस्त्रसंबन्धो बलाभिवृद्धिकर इति सूचितम् ॥

तथा च यजुरारण्यके एकस्यापि धनुष्मतो बहुभिरधनुष्मद्भिरप्रधृष्यत्वमुक्तम् – [4]'तस्मादेकमिषुधन्विनं बहवोऽनिषुधन्वानोऽभिधृष्णुवंति सोऽस्मयत एकं मासं तं बहवो नाभ्यधर्षिषुः' इति ॥

आख्यायिकापि — पुरा खलु तपस्विनो ब्राह्मणस्य तपोविघ्नमाचरितुं शक्रो गृहीतभटवेषो न्यासविधिना ब्राह्मणे खड्गं स्थापितवान् ।

स तच्छस्त्रमनुप्राप्य न्यासरक्षणतत्परः ।
वने तु विचरत्येव रक्षन्प्रत्ययमात्मनः ॥ १९ ॥
यत्र गच्छत्युपादातुं मूलानि च फलानि च ।
न विना याति तं खड्गं न्यासरक्षणतत्परः ॥ २० ॥

---

1. आचाराध्याये ८८ श्लोकः । प्रहृष्टमानसा इत्यादिकः द्वितीयः श्लोकः न विद्यते ।
2. या स्त्री इत्यादिश्लोकोपि विष्णुपुराणे मुद्रिते न दृश्यते ।
3. द्वितीयाध्याये तृतीयखण्डे ४८ सूत्रं ।
4. तैत्तिरीयारण्यके ५ प्रश्ने प्रथमानुवाके तृतीयपञ्चाशति प्रवर्ग्यब्राह्मणे ॥

अत्र न्यासो निक्षेपविशेषः । निक्षेपलक्षणं **नारद** आह—'[1] स्वद्रव्यं यत्र विस्रंभान्निक्षिपत्यविशंकितः । निक्षेपो नाम तत्प्रोक्तं व्यवहारपदं बुधैः ॥' इति ॥

निक्षेपस्थापनयोग्यस्थलमाह **मनुः**—[2]'कुलजे वृत्तसंपन्ने धर्मज्ञे सत्यवादिनि । महापक्षे धनिन्यार्ये निक्षेपं निक्षिपेद्बुधः ॥' इति । महापक्षे= पुत्रपौत्रादिसमृद्धे; धनिनि= निक्षेपादधिकधनवति ॥

बृहस्पतिस्तु—[3]'स्थानं गृहं स्थलं चैव तथर्णं विविधान् गुणान् । सत्यं शौचं बन्धुजनं समीक्ष्य स्थापयेन्निधिम् ॥' इति ।

स च निक्षेपो द्विविधः— ससाक्षिकः असाक्षिकश्चेति । तदाह **बृहस्पतिः**—[4]'ससाक्षिकं रहोदत्तं द्विविधं समुदाहृतम् ।'

निक्षिप्तद्रव्यस्य पुनर्ग्रहणप्रकारमाह **मनुः**—[5]'यो यथा निक्षिपेद्धस्ते यमर्थं यस्य मानवः । स तथैव ग्रहीतव्यो यथा दायस्तथा ग्रहः ॥' इति । यथा स्थापितो निक्षेपस्तथा ग्राह्यः इत्यर्थः ।

निक्षेपाप्रदाने दोषमाह **मनुः**—[6]'भर्तृद्रोहे यथा नार्याः पुंसः पुत्रसुहृद्वधे । दोषो भवेत्तथा न्यासे भक्षितोपेक्षिते नृणाम् ॥' इति ।

अयं च निक्षेपोऽप्रदाने राज्ञा निगृह्य दापनीयः । तथा च **मनुः**—[7]'न दद्यात्तस्य यदि तु तद्धिरण्यं यथाविधि । अयं निगृह्य दाप्यः स्यादिति धर्मस्य धारणा ॥' इति ।

---

1. औपनिधिके द्वितीये विवादपदे प्रथमः श्लोकः ।
2. अष्टमाध्याये १७९ श्लोकः ।
3. स्थानं गृहं इत्यादिश्लोकः मुद्रितपुस्तके न दृश्यते ।
4. ससाक्षिकं इत्यादिश्लोकार्धाशयबोधकं 'स पुनर्द्विविधः प्रोक्तः साक्षिमानितरस्तथा' इति श्लोकार्धमेव मुद्रितपुस्तके दृश्यते । न तु यथादर्शितं ।
5. अष्टमाध्याये १८० श्लोकः ।
6. भर्तृद्रोहे इत्यादिश्लोकः मुद्रितपुस्तके न दृश्यते ।
7. अष्टमाध्याये १८३ श्लोकः ।

चोराद्यपहृते न दापनीयमित्याह **याज्ञवल्क्यः**—[1]'न दाप्योऽपहृतं द्रव्यं राजदैविकतस्करैः। ग्रहीतुरिह दण्डो न दातुर्नष्टं तदुच्यते ॥' इति।

दैवाद्युपघाते त्वप्रदाने विशेषमाह **बृहस्पतिः**—'[2]दैवराजोपघातेन यदि तन्नाशमाप्नुयात्। ग्रहीतुर्द्रव्यसहितं तत्र दोषो न विद्यते ॥' इति।

मनुरपि—[3]'चोरैर्हृतं जलेनोढमग्निना दग्धमेव च। न दद्याद्यदि तस्माच्च न संहरति किंचन ॥' इति ॥

इदं चाप्रदानमवञ्चनायां बोध्यम्। तदाह **नारदः**—[4]'ग्रहीतुः सह योऽर्थेन नष्टो नष्टस्स दायिनः। दैवराजकृते तद्वत् न चेत्तज्जिह्मकारितम् ॥' इति।

उपेक्षया नाशे दण्डपूर्वकं सवृद्धिदापनमाह **बृहस्पतिः**—'[5]भेदेनोपेक्षया न्यासं ग्रहीत्वा यदि नाशयेत्। न दद्याद्याच्यमानो वा दाप्यः तत् सोदयं भवेत् ॥' इति। सोदयं सवृद्धिकमित्यर्थः।

अत्र विशेषमाह **व्यासः**—'[6]भक्षिते सोदयं दाप्यः समं दाप्य उपेक्षिते। किञ्चिदूनं प्रदाप्यः स्याद्द्रव्यमज्ञाननाशितम् ॥' किञ्चिदिति चतुर्थांशहीनमिति **विज्ञानेश्वरः**। **याज्ञवल्क्यस्तु**—[7]'आजीवन्स्वेच्छया दण्ड्यो दाप्यस्तच्चापि सोदयम्।' इति ॥

---

1. व्यवहाराध्याये ६८ श्लोकः। पूर्वार्धगतं विषयं मात्र संवदति।
2. ऋणादानप्रकरणे ४१ श्लोकः।
3. अष्टमाध्याये १८९ श्लोकः।
4. औपनिधिकप्रकरणे ६ श्लोकः।
5. निक्षेपविषयकप्रकरणे १२ श्लोकः।
6. व्यासस्मृतौ भक्षिते इत्यादिकः श्लोकः न दृश्यते।
7. व्यवहाराध्याये ६९ श्लोके पूर्वार्धे।

नारदोऽपि — [1] 'यत्रार्थसाधनं यत्तत् निक्षेप्तुरननुज्ञया । तत्रापि दण्ड्यस्स भवेत्तं च सोदयमावहेत् ॥' इति ।

द्रव्यस्वामिना याचितस्याप्रदाने तदुत्तरकालं चोरादिना च नाशे तन्मूल्यकल्पनया धनिने समं दाप्यः, तत्समदण्डश्च ग्राह्य इत्याह **याज्ञवल्क्यः** — [2] 'भ्रष्टश्चेन्मार्गिते दत्ते दाप्यो दण्डं च तत्समम् ॥' इति ।

नारदस्तु — [3] 'याच्यमानस्तु यो दात्रा निक्षेपं न प्रयच्छति । दण्ड्यस्स राज्ञा दाप्यश्च नष्टे दाप्यश्च तत्समम् ॥' इति। साहसं=दण्डः ॥

मनुरपि — [4] 'निक्षेपो यः कृतो येन यावांश्च कुलसन्निधौ । तावानेव स विज्ञेयो विब्रुवन्दण्डमर्हति ॥' इति ।

असाक्षिके तु विशेषमाह **बृहस्पतिः** — [5] 'रहोदत्ते निधौ यत्र विसंवादः प्रवर्तते । विभावकं तत्र दिव्यं उभयोरपि च स्मृतम् ॥' इति ।

ग्रहीतृस्थापकयोरनृतवादित्वे दण्डमाह **मनुः** — [6] 'यो निक्षेपं नार्पयति यश्चानिक्षिप्य याचते । तावुभौ चोरवच्छास्यौ प्रदाप्यौ तत्समं दमम् ॥' इति ॥

निक्षिप्तद्रव्यमकाले ददतो द्विगुणो दण्डः । तदाह **कात्यायनः** — [7] 'ग्राह्यस्तूपनिधिः काले कालहीनं तु वर्जयेत् । कालहीनं ददन् दण्डं द्विगुणं च प्रदाप्यते ॥' इति । यादृशे भये निमित्ते द्रव्यं निक्षिप्तं तद्भयाप-

---

1. यत्रार्थसाधनं इत्यादिश्लोकः मुद्रितपुस्तके यथोदाहृतं न दृश्यते । अपि तु एवमाशयबोधकः निक्षेपप्रकरणे १३ श्लोकः भवति ॥

2. व्यवहाराध्याये ६८ श्लोके उत्तरार्धं ।

3. औपनिधिके प्रकरणे ४ श्लोकः ।

4. अष्टमाध्याये १९४ श्लोकः ।

5. निक्षेपविषयकप्रकरणे १४ श्लोकः ।

6. अष्टमाध्याये १९१ श्लोकः ।

7. स्मृतिसन्दर्भान्तर्गतकात्यायनस्मृतौ व्यवहारकाण्डो न दृश्यते ।

गमात् प्राक् दत्तं कालहीनं। तत्र दानदौष्ट्यात् द्विगुणदंडो ग्राह्य इत्यर्थः ॥

भयापगमेऽपि सकृद्याचनानन्तरमेव देयम्। 'सकृद्याचनयार्पयेत्' इति बृहस्पतिस्मरणात् ॥

निक्षिप्तद्रव्यस्यापह्नवे प्रकाशनप्रकारमाह मनुः —

[1]'यो निक्षेपं याच्यमानः निक्षेप्तुर्न प्रयच्छति। स याच्यः प्राड्विवाकेन तन्निक्षेप्तुरसन्निधौ ॥ साक्ष्यभावे प्रणिधिभिर्वयोरूपसमन्वितैः। अपदेशैस्समं न्यस्य हिरण्यं तत्र तत्वतः ॥ स यदि प्रतिदद्यात्तु यथान्यस्तं यथाकृतम्। न तत्र विद्यते किञ्चिद्यत्परेणाभियुज्यते ॥' इति ॥

साक्ष्यभावे गूढचारैस्तत्सन्निधौ राजोपद्रवं वदद्भिस्समानैर्द्रव्यस्थापनं कारयित्वा कालान्तरे तेषां यथार्थतया प्रदाने निर्दुष्टं जानीयादित्यर्थः।

निक्षेप्तरि सति तत्पुत्रपौत्रादौ न देयमित्याह मनुः —

[2]'निक्षेपोपनिधी नित्यं न देयौ प्रत्यनन्तरे। नश्यतो विनिपाते तावनिपाते त्वनाशिनौ ॥' जीवति निक्षेप्तरि पुत्रपौत्रादौ न देयम्। गते तस्मिन् पुत्रपौत्रादिषु देयावेवेत्यर्थः ॥

निक्षेप्तर्यतीते पुत्रादिभ्यः स्वयमाहृत्य निक्षेपप्रदाने सति इतोऽधिकमस्तीति राज्ञा प्रत्यनन्तरैर्वा न नियोक्तव्यमित्याह मनुः —[3]'स्वयमेव तु यो दद्यान्मृतस्य प्रत्यनन्तरे। स राज्ञा न नियोक्तव्यो न निक्षेप्तुश्च बन्धुभिः ॥'

अप्रदानेऽपि प्रत्यनन्तरैर्निक्षेपग्राहिभिः निर्बन्धो न कर्तव्यः; किन्तु सांत्वेनैव ग्राह्यमित्याह स एव —[4]'अच्छलेनैव चान्विष्येत्तमर्थं प्रीतिपूर्वकम्। विचार्य तस्य वा वृत्तं साम्नैव परिसाधयेत् ॥' इति ॥

---

1. अष्टमाध्याये १८०–१८२ श्लोकाः।
2. अष्टमाध्याये १८५ श्लोकः।
3. अष्टमाध्याये १८६ श्लोकः।
4. अष्टमाध्याये १८७ श्लोकः।

एवं ससाक्षिकासाक्षिकभेदेन निक्षेपो द्विविध इत्युक्तम् । तत्र साक्षिस्वरूपमाह **मनुः** — [1] 'समक्षदर्शनात्साक्ष्यं श्रवणाच्चैव सिध्यति ॥' इति ।

स च साक्षी द्विविधः — कृतोऽकृतश्चेति । साक्षित्वेन स्थापितः कृतः । अनिरूपितोऽकृतः । तत्र कृतः पंचविधः, अकृतः षड्विधः इत्येकादशविधः साक्षी । अथा[त्रा]ह **नारदः** — [2] 'एकादशविधः साक्षी शास्त्रदृष्टो मनीषिभिः । कृतः पंचविधो ज्ञेयः षड्विधोऽकृत उच्यते ॥' इति ।

तेषां च भेदस्तेनैव दर्शितः — [3] 'लिखितः स्मारितश्चैव यदृच्छाभिज्ञ एव च । गूढश्चोत्तरसाक्षी च साक्षी पंचविधः कृतः ॥' इति ।

लिखितादीनां स्वरूपमुक्तं **कात्यायने** — [4] 'अर्थिना स्वयमानीतो लेख्ये यः सन्निवेश्यते । स साक्षी लिखितो नाम्ना स्मारितः पत्रकादृतः ॥' इति । पत्रकादृत इत्यस्य विवरणं तेनैव कृतं — 'यस्तु कार्यप्रसिद्ध्यर्थं दृष्ट्वा कार्यं पुनः पुनः । स्मार्यते ह्यर्थिना साक्षी स स्मारित इहोच्यते ॥' इति ।

यदृच्छयागतस्साक्षी क्रियते स यदृच्छाभिज्ञः । स्मारितयदृच्छाभिज्ञयोः पत्रिकानारूढत्वेपि भेदस्तेनैव दर्शितः—

'प्रयोजनार्थमानीतः प्रसंगादागतश्च यः । द्वौ साक्षिणौ त्वलिखितौ पूर्वपक्षस्य साधकौ ॥' इति । 'अर्थिना स्वार्थसिद्ध्यर्थं प्रत्यर्थिवचनं स्फुटम् । यः श्राव्यते स्थितो गूढो गूढसाक्षी स उच्यते ॥' इति । तथा, 'साक्षिणामपि यः साक्ष्यमुपर्युपरि भाषते । श्रवणाच्छ्रावणाद्वापि स साक्ष्युत्तरसंज्ञितः ॥' इति । इत्येवं कृतसाक्षिणः पञ्चविधाः ॥

---

1. अष्टमाध्याये ७४ श्लोके पूर्वार्धं ।
2. ऋणादानप्रकरणे १२६ श्लोकः ।
3. ऋणादानप्रकरणे १२७ श्लोकः ।
4. स्मृतिसन्दर्भान्तर्गतायां कात्यायनस्मृतौ व्यवहाराध्यायो न दृश्यते ।

अकृताश्च नारदेन दर्शिताः —[1] ‘ग्रामश्च प्राड्विवाकश्च राजा च व्यवहारिणः। कार्येष्वधिकृतो यस्स्यादर्थिना प्रहितश्च यः। कुल्याकुलविवादेषु विज्ञेयास्तेपि साक्षिणः ॥’ इति। अत्र प्राड्विवाकग्रहणं लेखकसभ्योपलक्षणार्थम्। [2] ‘लेखकः प्राड्विवाकश्च सभ्यश्चैवानुपूर्वशः। नृपे पश्यति तत्कार्यं साक्षिणस्समुदाहृताः ॥’ इति।

साक्षिणां शीलवर्णजातिसंख्यानियमानाह **याज्ञवल्क्यः** — [3] ‘तपस्विनो दानशीलाः कुलीनास्सत्यवादिनः। धर्मप्रधाना ऋजवः पुत्रवन्तो धनान्विताः ॥ प्रवराः साक्षिणो ज्ञेयाः श्रौतस्मार्तक्रियापराः। यथाजाति यथावर्णं सर्वे सर्वासु वा स्मृताः ॥’ इति। वर्णाः= ब्राह्मणादयः। जातिः= मूर्धावसिक्ताद्यनुलोमाः प्रतिलोमाश्च। तत्र ब्राह्मणस्य ब्राह्मणः, क्षत्रियस्य क्षत्रिय इति वर्णानाम्। मूर्धावसिक्तस्य मूर्धावसिक्तः, धीवरस्य धीवर इति जातिष्वपि नियमः। असंभवे सर्वे सर्वत्र साक्षिण इत्यर्थः।

मनुरपि — [4] ‘यादृशा धनिभिः कार्या व्यवहारेषु साक्षिणः। तादृशान्संप्रवक्ष्यामि यथा वाच्यमृतं च तैः ॥ गृहिणः पुत्रिणो मौलाः क्षत्रविट्शूद्रयोनयः। प्रयुक्ताः साक्ष्यमर्हन्ति न ये केचिदनापदि ॥ आप्तास्सर्वेषु वर्णेषु कार्याः कार्येषु साक्षिणः। सर्वधर्मविदोऽलुब्धान्विपरीतांश्च वर्जयेत् ॥’ इति।

विपरीतांश्च **स एवाह** — [5] ‘नार्थसंबन्धिनो नाप्ता न सहाया न वैरिणः। न दृष्टदोषाः कर्तव्या न व्याध्यार्ता न दूषिताः ॥ न साक्षी

---

1. ऋणादानप्रकरणे १२८ श्लोकस्य उत्तरार्धं १२९ श्लोकश्च।
2. नारदीयस्मृतौ न विद्यते।
3. पञ्चमे व्यवहाराध्याये ६८, ६९ श्लोकौ।
4. अष्टमाध्याये ६१—६३ श्लोकाः।
5. अष्टमाध्याये ६४—६७ श्लोकाः।

नृपतिः कार्यो न च कारुकुशीलवौ । न श्रोत्रियो न लिङ्गस्थो न संगेभ्यो विनिर्गताः ।। नाध्यधीनो न वक्तव्यो न दस्युर्न विकर्मकृत् । न वृद्धो न शिशुर्नैको नान्त्यो न विकलेन्द्रियः ।। नार्तो न मत्तो नोन्मत्तो न क्षुत्तृष्णावपीडितः । न श्रमार्तो न कामार्तो न क्रुद्धो नापि तस्करः ।।' इति ।

स्त्रीणां स्त्रिय एव साक्षिण्यः ब्राह्मणानां ब्राह्मण एवेति यथावर्णं साक्षिण इत्याह **मनुः** — [1]'स्त्रीणां साक्ष्यं स्त्रियः कुर्युः द्विजानां सदृशा द्विजाः । शूद्रास्सन्तश्च शूद्राणामन्त्यानामन्त्ययोनयः ।।' इति । **नारदोऽपि** — [2]'यथाजाति यथावर्णं सर्वे सर्वत्र वा स्मृताः ।' इति ।

पूर्वोक्तानामलाभे मनुष्यमात्रस्य साक्ष्यमाह **मनुः** — [3]'अनुभावी तु यः कश्चित्कुर्यात्साक्ष्यं विवादिनाम् । अन्तर्वेश्मन्यरण्ये वा शरीरस्यैव चात्यये ।।' इति ।

किञ्च वक्ष्यमाणा अपि सत्यसाक्षिण इत्याह **स एव** — '[4]स्त्रियाप्यसंभवे कार्यं बालेन स्थविरेण वा । शिष्येण बन्धुना वापि दासेन भृतकेन वा ।।' इति ।

बालादिसाक्षिषु प्रमाणान्तरं विधत्ते **स एव** — [5]'बालवृद्धातुराणां च साक्ष्ये च वदतां मृषा । जानीयादस्थिरां वाचं उत्सिक्तमनसां तथा ।।' इति ।

बलकृतादिषु साक्षी न परीक्षणीय इत्याह **स एव** — [6]'साहसेषु च सर्वेषु स्तेयसंग्रहणेषु च । वाग्दण्डयोश्च पारुष्ये न परीक्षेत साक्षिणः ।।'

---

1. अष्टमाध्याये ६८ श्लोकः ।
2. ऋणादानप्रकरणे १३१ श्लोकस्य उत्तरार्धं ।
3. अष्टमाध्याये ७९ श्लोकः ।
4. अष्टमाध्याये ८० श्लोकः ।
5. अष्टमाध्याये ७१ श्लोकः ।
6. ,, ७२ श्लोकः ।

इति । सहः = बलं; तेनायं भवतीति साहसः = गृहदाहादिः । स्तेयं=सुवर्णादि-हरणम् । संग्रहणं=स्त्रीभोगादि । वाक्पारुष्यं दण्डपारुष्यं च । एतेषु निमित्तेषु साक्ष्यन्तराभावात् 'गृहिणः पुत्रिणो मौलाः' इत्यादिसाक्षिधर्मेण साक्षि-परीक्षा न कर्तव्येत्यर्थः ॥

साक्षिणां परस्परद्वैविध्ये बहूक्तं ग्राह्यमित्याह **स एव** —[1] 'बहूक्तं परिगृह्णीयात् साक्षिद्वैधे नराधिपः । समेषु तु गुणोत्कृष्टान् गुणिद्वैधे द्विजोत्तमान् ॥' इति । उभयानुमतश्चेदेकोपि साक्षी भवतीत्याह **याज्ञवल्क्यः** —[2] 'उभयानुमतः साक्षी भवत्येकोपि धर्मवित् ॥' इति ।

प्राड्विवाकेन पृष्टः साक्षी सत्यमेव ब्रूयादित्याह **मनुः** —[3] 'सत्यं साक्ष्ये ब्रुवन्साक्षी लोकानाप्नोति पुष्कलान् । इह चानुत्तमां कीर्तिं वागेषा ब्रह्मपूजिता ॥ साक्ष्येऽनृतं वदन्पाशैः बध्यते वारुणैर्नरः । विवशः शत-माजातीस्तस्मात्साक्ष्ये वदेदृतम् ॥' इति । शतमाजातीः = शतजन्मा-न्यभिव्याप्येत्यर्थः ॥

साक्षिस्वरूपं सत्यासत्यवचनयोश्च फलमाह स्थलान्तरे **मनुः** —[4] 'समक्षदर्शनात्साक्ष्यं श्रवणाच्चैव सिद्ध्यति । तत्र सत्यं ब्रुवन् साक्षी धर्मार्थाभ्यां न हीयते ॥ साक्षी दृष्टश्रुतादन्यद्विब्रुवन्नार्यसंसदि । अवाङ्-नरकमभ्येति प्रेत्य स्वर्गाच्च हीयते ॥' इति ॥ स्ववंचनया साक्षिणो वंचना कर्तुं न शक्यमित्याह **मनुः** —[5] 'आत्मैव ह्यात्मनः साक्षी गतिरात्मा तथात्मनः । मावमंस्था स्वमात्मानं नृणां साक्षिणमुत्तमम् ॥ मन्यन्ते वै पापकृतो **न** कश्चित्पश्यतीति नः । तांस्तु देवाः प्रपश्यन्ति स्वस्यैवान्तरपूरुषः ॥'

---

1. अष्टमाध्याये ७३ श्लोकः ।
2. व्यवहाराध्याये साक्षिप्रकरणे ७४ श्लोके पूर्वार्धं ।
3. अष्टमाध्याये ८१, ८२ श्लोकौ ।
4. ,, ७४, ७५ श्लोकौ ।
5. अष्टमाध्याये ८४—८६ श्लोकौ ।

द्यौर्भूमिरापो हृदयं चन्द्रार्काग्नियमानिलाः । रात्रिस्सन्ध्ये च धर्मश्च वृत्तज्ञास्सर्वदेहिनाम् ॥' इति ॥

ज्ञात्वाप्यवचने दोषमाह **याज्ञवल्क्यः** — [1] 'न ददाति हि यस्साक्ष्यं जानन्नपि नराधमः । स कूटसाक्षिणां पापैस्तुल्यो दण्डेन चैव हि ॥' इति ।

साक्षिणं प्रति प्रश्नप्रकारमाह **मनुः** — [2] 'देवब्राह्मणसान्निध्ये साक्ष्यं पृच्छेदृतं द्विजान् । उदङ्मुखान्प्राङ्मुखान्वा पूर्वाह्णे प्रयतः शुचीन् ॥ ब्रूहीति ब्राह्मणं ब्रूयात् सत्यं ब्रूहीति पार्थिवम् । गोबीजकाञ्चनैर्वैश्यं शूद्रं सर्वैस्तु पातकैः ॥ ब्रह्मघ्नो ये स्मृता लोका ये च स्त्रीबालघातिनः । मित्रद्रुहः कृतघ्नस्य ते ते स्युर्ब्रुवतो मृषा ॥ जन्मप्रभृति यत्किञ्चित् पुण्यं भद्रं त्वया कृतम् । तत्सर्वं नाशमागच्छेद्यदि ब्रूयास्त्वमन्यथा ॥ एकोऽहमस्मीत्यात्मानं यत्त्वं कल्याण मन्यसे । नित्यं स्थितस्ते हृद्येषः पुण्यपापेक्षिता मुनिः ॥ यमो वैवस्वतो देवो यस्तवैष हृदि स्थितः । तेन चेदविवादस्ते मा गङ्गां मा कुरून् गमः ॥' इति ॥

अनृतवचनस्य फलं नग्नत्वादिकमित्याह — [3] 'नग्नो मुण्डः कपाली च भिक्षार्थी क्षुत्पिपासितः । अन्धः शत्रुगृहं गच्छेद्यः साक्ष्यमनृतं वदेत् ॥ अवाक्शिरास्तमस्यन्धे किल्बिषी नरकं पतेत् । यः प्रश्नं वितथं ब्रूयात् पृष्टः सन्धर्मनिश्चये ॥' इति ।

एतादृशसाक्षियुक्तेषु निक्षेपेषु साक्षिवचनानुरोधेन तत्वं जानीयात् । असाक्षिकेषु तु निक्षेपेषु शपथेनैव तत्वं जानीयादित्याह **मनुः** —

[4] 'असाक्षिकेषु चार्थेषु मिथो विवदमानयोः । अविन्दंस्तत्वतः सत्यं

---

1. व्यवहाराध्याये ७७ श्लोकः ।
2. अष्टमाध्याये ८७—९२ श्लोकाः ।
3. अष्टमाध्याये ९३, ९४ श्लोकौ ।
4. अष्टमाध्याये १०९, ११० श्लोकौ ।

शपथेनापि लंभयेत् ॥ महर्षिभिश्च देवैश्च कार्यार्थं शपथाः कृताः । वसिष्ठश्चापि शपथं शेपे पैजवने नृपे ॥' इति ।

सीताऽदुष्टेत्यस्मिन्नर्थे वाल्मीकिरपि शपथं कृतवान् **उत्तरकाण्डे** — [1] 'बहुवर्षसहस्राणि तपश्चर्या मया कृता । तस्याः फलमुपाश्नीयां अपापा मैथिली यदि ॥ मनसा कर्मणा वाचा कृतपूर्वं न किल्बिषम् । फलं तस्याहमश्नीयां अपापा मैथिली यदि ॥' इति ॥

शापप्रकारमाह **मनुः** — [2] 'सत्येन शापयेद्विप्रं क्षत्रियं वाहनायुधैः । गोबीजकाञ्चनैर्वैश्यं शूद्रं सर्वैस्तु पातकैः ॥ अग्निं वा हारयेच्छूद्रं अप्सु वैनं निमज्जयेत् । पुत्रदारस्य वाप्येनं शिरांसि स्पर्शयेत्पृथक् ॥ समिद्धो न दहत्यग्निरापो नोन्मज्जयन्ति यम् । न वार्तिमृच्छति क्षिप्रं स ज्ञेयः शपथे शुचिः ॥' इति ।

छान्दोग्येपि— [3] 'अथ यदि तस्य कर्ता भवति तत एवानृतमात्मानं कुरुते । सोऽनृताभिसंधोऽनृतेनात्मानमन्तर्धाय परशुं तप्तं प्रतिगृह्णाति स दह्यते, अथ हन्यते । अथ यदि तस्याकर्ता भवति तत एव सत्यमात्मानं कुरुते । स सत्याभिसन्धः सत्येनात्मानमन्तर्धाय परशुं तप्तं प्रतिगृह्णाति स न दह्यते, अथ मुच्यते ।' इति ॥

अतो निक्षेपरक्षणस्याकरणे प्रत्यवायात् करणेऽभ्युदयप्राप्तेश्च अवश्य-कर्तव्यन्यासरक्षणाय गृहीत्वैव सञ्चारं कृतवान् ।

नित्यं शस्त्रं परिहरन् क्रमेण स तपोधनः ।
चकार रौद्रीं स्वां बुद्धिं त्यक्त्वा तपसि निश्चयम् ॥ २१ ॥

---

1. षण्णवतितमे सर्गे २०, २१ श्लोकौ ।
2. अष्टमाध्याये ११३—११५ श्लोकाः ।
3. षष्ठाध्याये षोडशखण्डः ।

ततः स रौद्राभिरतः प्रमत्तोऽधर्मकर्शितः ।
तस्य शस्त्रस्य संवासाज्जगाम नरकं मुनिः ॥ २२ ॥

अनेन तपस्विनां शस्त्रसंबन्धो निषिद्ध इति सूचितम् । तथा च उत्तरकाण्डे रावणेन युद्धार्थं प्रवृत्तं मरुत्तं प्रति संवर्तः —[1] 'दीक्षितस्य कुतो युद्धं क्रूरत्वं दीक्षिते कुतः ॥'

एवमेतत्पुरावृत्तं शस्त्रसंयोगकारणम् ॥ २३ ॥
स्नेहाच्च बहुमानाच्च स्मारये त्वां न शिक्षये ॥ २४ ॥

अनेन महतां निकृष्टेन शिक्षणं न कर्तव्यमिति सूचितम् । अत एव ऋषिगणं प्रति **रामः**—'नैवमर्हथ मां वक्तुमाज्ञाप्योऽहं तपस्विनाम् ।' इति ।

न कथंचन सा कार्या गृहीतधनुषा त्वया ।
बुद्धिर्वैरं विना हन्तुं राक्षसान्दण्डकाश्रितान् ॥
अपराधं विना हन्तुं लोकान्वीर न कामये ॥ २५ ॥

'अपराधं विना' इत्यनेन अपकारिणां वधे दोषो नास्तीति सूचितम् । तथा **चापस्तम्बः**—[2] 'यो हिंसार्थं अभिक्रान्तं हन्ति मन्युरेव मन्युं स्पृशति; न तस्मिन् दोषः' इति । पुराणे इति ? ॥

मनुरपि—[3] 'गुरुं वा बालवृद्धौ वा ब्राह्मणं वा बहुश्रुतम् । आततायिनमायान्तं हन्यादेवाविचारयन् ॥ नाततायिवधे दोषो हन्तुर्भवति कश्चन ॥' इति ॥

वसिष्ठोपि—[4] 'अग्निदो गरदश्चैव शस्त्रपाणिर्धनापहः । क्षेत्रदार-

---

1. उत्तरकाण्डे १८ सर्गे १८ श्लोके पूर्वार्धं ।
2. आपस्तम्बधर्मसूत्रे प्रथमप्रश्ने १० पटले ७ सूत्रं ।
3. अष्टमाध्याये ३५० श्लोकः ३५१ श्लोकस्य पूर्वार्धं च ।
4. तृतीयेऽध्याये १९, २० श्लोकौ ।

हरश्चैव षडेते आततायिनः ॥ आततायिनमायान्तमपि वेदान्तपारगम् । जिघांसन्तं जिघांसीत न तेन भ्रूणहा भवेत् ॥' इति ।

क्षत्रियाणां तु वीराणां वनेषु निरतात्मनाम् ।
धनुषा कार्यमेतावत् आर्तानामभिरक्षणम् ॥ २६ ॥

इत्यनेन क्षत्रियाणां आयुधधारणं आर्तजनरक्षणार्यैवेति सूचितम् । तथा च कालिदासः —[1] 'आर्तत्राणाय वः शस्त्रं न प्रहर्तुमनागसि' इति ।

क्व च शस्त्रं क्व च वनं क्व च क्षात्रं तपः क्व च ।
आविद्धमिदमस्माभिर्देशधर्मस्तु पूज्यताम् ॥ २७ ॥

अनेन देशोचिताचार एव कर्तव्य इति सूचितम् ॥

धर्मादर्थः प्रभवति धर्मात्प्रभवते सुखम् ।
धर्मेण लभते सर्वं धर्मसारमिदं जगत् ॥ ३० ॥

अनेन कृत्स्नं जगत् धर्ममूलमिति सूचितम् । तथा च तैत्तिरीयश्रुतिः [2] 'धर्मो विश्वस्य जगतः प्रतिष्ठा ; लोके धर्मिष्ठं प्रजा उपसर्पन्ति, धर्मेण पापमपनुदति, धर्मे सर्वं प्रतिष्ठितं ; तस्माद्धर्मं परमं वदन्ति' । इति ॥

मनुरपि —[3] 'अग्नौ प्रास्ताहुतिस्सम्यगादित्यमुपतिष्ठते । आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजाः ॥' इति ॥

आत्मानं नियतैस्तैस्तैः कर्शयित्वा प्रयत्नतः ।
प्राप्यते निपुणैर्धर्मो न सुखाल्लभ्यते सुखम् ॥ ३१ ॥

अयमर्थः **वनपर्वणि सत्यभामाद्रौपदीसंवादे** —[4] '**सुखं सुखेनेह न जातु लभ्यं दुःखेन साध्वी लभते सुखानि** ॥' इति ।

---

1. शाकुन्तळनाटके षष्ठेके मातलिवाक्यं ।
2. तैत्तिरीयोपनिषदि ४ प्रश्ने उपान्तिमेऽनुवाके ।
3. तृतीयाध्याये ७६ श्लोकः ।
4. २३४ अध्याये ४ श्लोकस्य पूर्वार्धं ।

स्त्रीचापलादेतदुदाहृतं मे
धर्मं च वक्तुं तव कस्समर्थः ।
विचार्य बुद्ध्या तु सहानुजेन
यद्रोचते तत्कुरु मा चिरेण ॥ ३३ ॥

नन्वत्रार्तमुनिजनरक्षणाय गृहीतायुधं रामं प्रति 'क्षत्रियाणां तु वीराणां' इत्यादिश्लोकैः आर्तजनरक्षणाय आयुधग्रहणं ब्रुवती सीता, 'न कथञ्चन सा कार्या गृहीतधनुषा त्वया । बुद्धिर्वैरं विना हन्तुं राक्षसान्दण्डकाश्रितान् ॥ क्व च शस्त्रं क्व च वनं क्व च क्षात्रं तपः क्व च ।' इत्यादिश्लोकैः कथमायुधग्रहणं प्रतिषेधतीति चेत् — न ; 'कामं तपःप्रभावेन शक्ता हन्तुं निशाचरान्' इत्यादिवचनैः ऋषीणां स्वतपःप्रभावेनैव निशाचरादिनिग्रहसामर्थ्यावगमेन शरण्या इत्यनेन सर्वशरण्यत्वावगमेन च स्वत एवार्तिपरिहारसंभवात् । अतस्तद्रक्षणाय आयुधं न ग्राह्यं इत्येतदभिप्रायकत्वात् ॥

इति नवमः सर्गः ॥

अथ दशमः सर्गः ॥

दशमे—वाक्यमेतत्तु वैदेह्या व्याहृतं भर्तृभक्तया ।
श्रुत्वा धर्मे स्थितो रामः प्रत्युवाचाथ मैथिलीम् ॥ १ ॥
हितमुक्तं त्वया देवि स्निग्धया सदृशं वचः ।
कुलं व्यपदिशन्त्या च धर्मज्ञे जनकात्मजे ॥ २ ॥
किन्तु वक्ष्याम्यहं देवि त्वयैवोक्तमिदं वचः ।
धार्यते क्षत्रियैश्चापो नार्तशब्दो भवेदिति ॥ ३ ॥
ते चार्ता दण्डकारण्ये मुनयः शंसितव्रताः ।
मां सीते स्वयमागम्य शरण्यं शरणं गताः ॥ ४ ॥

अतो गृहीतायुधेन मया आर्तमुनिजनरक्षणं अवश्यं कर्तव्यमित्यब्रवीत् ॥

नन्वत्र स्वेन आर्तमुनिजनसंरक्षणं कर्तव्यमिति रामोक्तिरनुपपन्ना। पूर्वत्र 'कामं तपःप्रभावेन' इत्यादिना तेषामेव तपोमहिम्ना स्वार्तिपरिहार-सामर्थ्यावगमात् इति चेत्—न।

काले काले च नियता नियमैर्विविधैर्वने।
भक्ष्यन्ते राक्षसैर्भीमैर्नरमांसोपजीविभिः ॥ ६ ॥

ते भक्ष्यमाणा मुनयो दण्डकारण्यवासिनः।
अस्मानभ्यवपद्येति मामूचुर्द्विजसत्तमाः ॥ ७ ॥

चिरार्जितं च नेच्छामस्तपः खण्डयितुं वयम् ॥ १४ ॥

बहुविघ्नं तपो नित्यं दुश्चरं चैव राघव।
तेन शापं न मुंचामो भक्ष्यमाणास्तु राक्षसैः ॥ १५ ॥

इत्यादिवचनैः निशाचरग्रहणे स्वतस्समर्थानामपि तेषां बहुविधनियमैः चिरकालार्जितस्य तपसो व्ययो भवेदित्यतो राक्षसनिग्रहमकुर्वतां तत्कृतोपद्रवा-त्त्राणमिच्छतां ऋषीणां आर्तत्वात् तद्रक्षणायायुधग्रहणं युक्तमेव। दण्डकारण्य-वासिमुनिजनै राक्षसोपद्रुतैः त्रायस्वेति असकृदभियाचितोऽहं अखिलमुनि-जनसमक्षं राक्षसवधदीक्षितो दण्डकारण्यवासिनो मुनीन् परिपालयामीति प्रतिज्ञामकरवम् ॥

संश्रुत्य च न शक्ष्यामि जीवमानः प्रतिश्रवम्।
मुनीनामन्यथा कर्तुं सत्यमिष्टं हि मे सदा ॥ १८ ॥

अप्यहं जीवितं जह्यां त्वां वा सीते सलक्ष्मणाम्।
न तु प्रतिज्ञां संश्रुत्य ब्राह्मणेभ्यो विशेषतः ॥ १९ ॥

अत्र स्वप्राणभार्याभ्रात्रादिपरित्यागेनापि प्रतिज्ञातार्थपरिपालनं कर्तव्यम्। तदकरणे प्रत्यवाय इति सूचितम्। तथा च महाप्रस्थानिके भीमं

प्रति युधिष्ठिरवचनं [1] 'एकाह्ना निर्दहेयं वै शत्रूनित्यर्जुनोऽब्रवीत् । न च तत्कृतवानेष शूरो मानी ततोऽपतत् ॥' इति ।

कर्णपर्वण्यपि कृष्णं प्रत्यर्जुनवाक्यं — [2] 'अन्यस्मै देहि गाण्डीवं इति मां यः प्रचोदयेत् । छिन्द्यामहं शिरस्तस्य इत्युपांशुव्रतं मम ॥ इत्युक्तोहमदीनार्थं राज्ञा तेन यशस्विना । समक्षमिह गोविन्द तन्न क्षन्तुमिहोत्सहे ॥ तस्मादेनं हनिष्यामि राजानं धर्मचारिणम् । प्रतिज्ञां पालयिष्यामि हत्वैनं नरसत्तम ॥' इति ।

स्त्रीपर्वण्यपि भीमं प्रति गान्धार्या भ्रातुर्दुश्शासनस्य रक्तपानं अयुक्तं त्वया कृतं इत्यभिहिते सभायां द्रौपदीकेशपक्षपरामर्शजनितक्रोधवशेन द्रोहिणो दुश्शासनस्य पास्यामि रुधिरमिति प्रतिज्ञामकरवम् । तन्निर्वहणाय अकृत्यमपि रक्तपानं कृतमित्याह भीमः —

[3] 'केशपक्षपरामर्शे द्रौपद्या द्यूतकारिते । क्रोधाद्यदब्रुवं चाहं तच्च मे हृदि वर्तते ॥ क्षत्रधर्मच्युतो राज्ञि भवेयं शाश्वतीः समाः । प्रतिज्ञां तां कृतां सत्यां अस्मास्वनपराधिषु । अधुना किन्नु दोषेण परिशंकितुमर्हसि ॥' इति ।

तदधुना प्रतिज्ञापरिपालनैकतानमानसेन मया ऋषिगणोपद्रवकरनिशाचरप्रकरहननादिपूर्वकं मुनिजनपरिपालनं अवश्यकर्तव्यमेव ।

मम स्नेहाच्च सौहार्दादिदमुक्तं त्वयानघे ।
परितुष्टोऽस्म्यहं सीते न ह्यनिष्टोऽनुशिष्यते ॥ २१ ॥

इत्यभिधाय,

रामो धनुष्मान् सह लक्ष्मणेन जगाम रम्याणि तपोवनानि ॥ २२ ॥

---

1. द्वितीयेऽध्याये २१ श्लोकः ।
2. ६९ अध्याये ९-११ श्लोकाः ।
3. १५ अध्याये १८—२० श्लोकाः ।

अनेनापृष्टयापि सीतया कृतं हितोपदेशं आकर्ण्य उपश्लाघनपूर्वकं, 'न ह्यनिष्टोऽनुशास्यते' इति प्रतिपादनात् । अनेन अन्योपि यो यस्य श्रेयो भवेदिति इच्छति तेन तं प्रति अपृष्टेनापि हितोपदेशः कर्तव्य इति सूचितम् । तथा च उद्योगपर्वणि विदुरनीतौ —[1] 'शुभं वा यदि वा पापं द्वेष्यं वा यदि वा प्रियम् । अपृष्टस्तस्य तद्ब्रूयाद्यस्य नेच्छेत्पराभवम् ॥' इति ॥

इति दशमः सर्गः ॥

अथ एकादशः सर्गः ॥

एकादशे—तदनु निशाचरनिधनाय कृतनिश्चयो रामो जनकतनयालक्ष्मणाभ्यां सह विविधगिरिनदीसरांसि गजयूथांश्च पश्यन्नेव समतिक्रम्य दूरमध्वानं, लम्बमाने भगवति दिवाकरे, सरसीरुहसमलङ्कृतसरोवरान्तर्गतगीतवादित्रश्रवणजनितविस्मयः, धर्मव्रतं नाम मुनिमिदमब्रवीत्—

इदमत्यद्भुतं दृष्ट्वा [श्रुत्वा] सर्वेषां नो महामुने ।
कौतूहलं महज्जातं किमिदं साधु कथ्यताम् ॥ ९ ॥ इति ।

ततो मुनिरपि सरःप्रवरस्य प्रभावमेवमवादीत्— पुरा खलु मांडुकर्णिर्महर्षिः वाताशननीरावगाहनादिनानाविधनियमपूर्वकं दशवर्षसहस्रं तपस्तप्तवान् । ततो देवास्तमवलोक्य कस्य वा स्थानमयमाक्रमिष्यतीति चकितमानसाः तदीयतपोविघाताचरणाय मदकरमधुमदनमधुररवमधुकरपिकशुकादिसहायोपेताः सकलजनमनोहारिणीः पञ्चाप्सरसः संप्रेषयामासुः ॥

---

1. ३४ अध्याये ४ श्लोकः ।

ततो माण्डुकर्णिर्महर्षिरास्थाय यौवनावस्थां, परिगृह्य पंचाप्सरसः, सरोवरान्तरे निर्माय नर्मसदनं, प्रविश्य च तद्भवनं स्वमनोविनोदनचतुरकामिनीसंभोगसंभूतहर्षाविष्टहृदयो बभूव ॥

आसां संक्रीडमानानां एष वादित्रनिस्वनः ।
श्रूयते भूषणोन्मिश्रो गीतशब्दो मनोहरः ॥ २० ॥ इति ।

ततो मुनिकथितकमलिनीकथाकर्णनाकलितविस्मयो रामः

अग्रतो रमणीयं च ददर्शाश्रममण्डलम् ।
कुशचीरपरिक्षिप्तं नानावृक्षसमाकुलम् ॥ २२ ॥

प्रविश्य सह वैदेह्या लक्ष्मणेन च राघवः ।
उवास मुनिभिस्सर्वैः पूज्यमानो महात्मभिः ॥ २३ ॥

ततः पर्यायेण निखिलमुनिजननिलयेषु नीत्वा दशसंवत्सरान् पुनरागत्य तीक्ष्णतपसः सुतीक्ष्णस्य महर्षेः समक्षमिदमवोचत्—

अगस्त्यमभिगच्छेयमभिवादयितुं मुनिम् ॥ ३४ ॥
मनोरथो महानेष हृदि मे परिवर्तते ।
यद्यहं तं मुनिवरं शुश्रूषेयमपि स्वयम् ॥ ३५ ॥ इति ।

अनेन महापुरुषसन्दर्शनं सुदूरमपि गत्वा ग्राह्यमिति सूचितम् । अत एव अभिगमनमर्हतीत्यस्मिन्नर्थे क्रोशशतिको भिक्षुः योजनशतिक आचार्यः इति **महाभाष्य**प्रयोगः ॥

मनुरपि—[1] 'दैवतान्यभिगच्छेत्तु धार्मिकांश्च द्विजोत्तमान् । ईश्वरं चैव रक्षार्थं गुरूनेव च पर्वसु ॥'

ततो रामवचनश्रवणकृतत्वरः सुतीक्ष्ण इत एव योजनचतुष्टयमार्गे

---

1. चतुर्थाध्याये १५३ श्लोकः ।

हसचक्रवाकादिविविधसारसालङ्कृतसरोवरविराजिते स्थलप्रचुरे देशे भगवतो महामुनेरगस्त्यभ्रातुराश्रमः ।

तत्रैकां रजनीमुष्य प्रभाते राम गम्यताम् ।

ततो योजनमात्रे रमणीये वनोद्देशे वैदेहीसहायस्य भवतो विहारयोग्यो भगवतो महामुनेराश्रमः । तदद्यैव गमनमभिरोचयेत्यवोचत् ॥

ततो दाशरथिरभिवाद्य महामुनिं लक्ष्मणमिदमाह --

एतदेवाश्रमपदं नूनं तस्य महात्मनः ।
अगस्त्यस्य मुनेर्भ्रातुः दृश्यते पुण्यकर्मणः ॥ ४९ ॥

विविक्तेषु च तीर्थेषु कृतस्नाना द्विजातयः ।
पुष्पोपहारं कुर्वन्ति कुसुमैः स्वयमार्जितैः ॥ ५४ ॥

अनेन देवपूजाद्युपयुक्तसमित्पुष्पकुशादिकं ब्राह्मणैः स्वयमाहर्तव्यमिति सूचितम् । तथा च स्मृतिः -- 'समित्पुष्पकुशांबूनि ब्राह्मणः स्वयमाहरेत् ।' इति ।

अगस्त्यस्याश्रमो भ्रातुर्नूनमेष भविष्यति ॥ ५५ ॥

निगृह्य तरसा मृत्युं लोकानां हितकाम्यया ।
यस्य भ्रात्रा कृतेयं दिक् शरण्या पुण्यकर्मणा ॥ ५६ ॥

इहैकदा किल क्रूरो वातापिरपि चेल्वलः ॥ ५६½ ॥

चक्षुषानलकल्पेन निर्दग्धो निधनं गतः ॥ ६८ ॥

तस्यायमाश्रमो भ्रातुस्तटाकवनशोभितः ।
विप्रानुकम्पया येन कर्मेदं दुष्करं कृतम् ॥ ६९ ॥

अनेन स्वप्राणहानिमप्यविगणय्य जगदुपकाराय दुष्करमपि कर्म कर्तव्यमिति सूचितम् । तथा च वनपर्वणि लोमशतीर्थयात्रायां वृत्रहननाय

स्वास्थीनि याचमानान् देवान् प्रति दधीचिः – [1] ‘ततो दधीचिः परमप्रतीतः सुरोत्तमांस्तानिदमित्युवाच । करोमि यद्वो हितमद्य देवाः स्वं चापि देहं स्वयमुत्सृजामि ॥ स एवमुक्त्वा द्विपदां वरिष्ठः प्राणान् वशी स्वान्सहसोत्ससर्ज ॥’ इति ॥ अत्रैव स्थलान्तरे — [2] ‘एष लोकहितार्थं वै पिबामि वरुणालयम् ॥’ इति ॥

ततोऽस्ताचलाधिरूढे भगवति सवितरि कृतसायंसन्ध्योपासनः, प्रविश्याश्रमपदं, अभिवाद्य महर्षिं —

न्यवसत्तां निशामेकां प्राश्य मूलफलानि च ।

ततः प्रभाते कृतपौर्वाह्णिकोऽनुज्ञाप्य महर्षिं तदुपदिष्टेन मार्गेण महर्षेराश्रमं प्रति गच्छन् दाशरथिर्लक्ष्मणमिदमवादीत् —

आश्रमो दृश्यते तस्य परिश्रान्तश्रमापहः ॥ ८१ ॥
प्रशान्तमृगयूथश्च नानाशकुनिसंकुलः ॥ ८२ ॥
तस्यैतदाश्रमपदं प्रभावाद्यस्य राक्षसैः ।
दिगियं दक्षिणा त्रासाद् दृश्यते नोपभुज्यते ॥ ८४ ॥

अनेन महतां सन्निधौ राक्षसाद्युपद्रवो न भवतीति सूचितम् । तथा चादिपर्वणि — [3] ‘मा भैः पुत्रि न भेतव्यं राक्षसात्तु कथंचन । नैतद्रक्षोभयं यन्मां पश्यसि त्वमुपस्थितम् ॥’ इति ।

यदाप्रभृति चाक्रान्ता दिगियं पुण्यकर्मणा ।
तदाप्रभृति निर्वैराः प्रशान्ता रजनीचराः ॥ ८५ ॥

अनेन महतां सन्निधौ अतिक्रूराणामपि प्रशान्तत्वं भवतीति सूचितम् ।

---

1. १०० अध्याये २१ श्लोकः २२ श्लोके पूर्वार्धं च ।
2. १०५ अध्याये २ श्लोकस्य पूर्वार्धं ।
3. १७७ अध्याये २३ श्लोकः ।

तथा च योगसूत्रे — [1] 'अहिंसाप्रतिष्ठायां तत्सन्निधौ वैरत्यागः । ' इति । अस्यार्थः—सति अहिंसास्थैर्ये तस्याहिंसकस्य योगिधौरेयस्य सन्निधौ स्वभावविरुद्धानां गोव्याघ्रादीनामपि वैरत्यागो भवतीति । वसिष्ठोपि — [2] 'मातरीव परं यान्ति विषमाणि मृदूनि च । विश्वासमिह भूतानि सर्वाणि शमशालिनि ॥' इति ॥

मार्गं निरोद्धुं सततं भास्करस्याचलोत्तमः ।
निदेशं पालयन्नस्य विन्ध्यशैलो न वर्धते ॥ ८७ ॥

अनेन महतामाज्ञा अनतिक्रमणीया । किन्तु तदाज्ञायामेव स्थातव्यमिति सूचितम् । तथा च राजधर्मे इन्द्रऋषिसंवादे — [3] 'शृणुमस्ते बचस्तात पन्थानो विदितास्तव । नियोगे चैव धर्मात्मन् स्थातुमिच्छामि शाधि नः ॥' इति ।

एष लोकार्चितस्साधुर्हिते चाभिरतस्सताम् ।
अस्मानभिगतानेष श्रेयसा योजयिष्यति ॥ ८९ ॥

अनेन महान्तः स्वसमीपमागतानां श्रेयः प्रयच्छन्तीति सूचितम् । तथा च वनपर्वणि — [4] 'अमोघदर्शी भीष्माहं ब्रूहि किं करवाणि ते । यद्वक्ष्यसि कुरुश्रेष्ठ तस्य दातास्मि तेऽनघ ॥' इति ।

आराधयिष्याम्यत्राहमगस्त्यं तं महामुनिम् ।
शेषं च वनवासस्य सौम्य वत्स्याम्यहं सुखम् ॥ ९० ॥
अत्र देवाश्च गन्धर्वाः सिद्धाश्च परमर्षयः ॥ ९०½ ॥
चारणाश्च महात्मानो नागाश्च पतगैस्सह ।

---

1. द्वितीयपादे ३५ सूत्रं ।
2. स्मृतिसन्दर्भीयवसिष्ठस्मृतौ न विद्यते ।
3. राजधर्मे १२ अध्याये १० श्लोकः ।
4. तीर्थयात्रापर्वणि ८२ अध्याये ३ श्लोकः ।

वसन्ति नियताहाराः धर्ममाराधयिष्णवः ॥ ९३ ॥

नन्वत्र देवादीनां धर्मानुष्ठातृत्वं प्रतीयते; तदनुपपन्नम् । जैमिनिना देवानां कर्मानधिकारस्य षष्ठाध्याये प्रतिपादितत्वात् । तथाहि— 'फलार्थित्वात्त कर्मणः शास्त्रं सर्वाधिकारं स्यात्' । किमनुष्ठानासमर्थानां अन्धबधिरपङ्गुमूकदेवादीनामप्यधिकारः, उत्तमसर्वाङ्गोपसंहारसमर्थानां मनुष्याणामेवेति । तदर्थमपि यथाधिकारमंगविनियोगः उक्तः 'यथाविनियोगं अधिकारः' इति । तत्र 'दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत' इत्यधिकारवाक्यपर्यालोचनया कामनावतां सर्वेषामेवाधिकारोऽवगम्यते । तदनुसारीणि चाङ्गवाक्यानि, न तत्संकोचायालम् । अन्धबधिरपङ्गुमूकव्यतिरिक्तानामेव सर्वेषां आज्यावेक्षणवाचनविष्वङ्निष्क्रमणमन्त्रोच्चारणादयोऽङ्गत्वेन विहिताः । अन्धादीनां तु आज्यावेक्षणादिविध्यभावात्तदतिरिक्ताङ्गोपकृतमेव कर्म फलसाधनं इति फलार्थिनां अशक्याङ्गरहितकर्मानुष्ठानात्सिद्धोऽधिकारः । न च कांस्यभोजिन्यायेन गुणभूताङ्गवाक्यानुसारेण प्रधानस्याप्यधिकारवाक्यस्य चक्षुष्मदादिविषयत्वं स्यादिति वाच्यम् । कांस्यभोजिन्यायस्य निरवकाशविषयत्वात् । अङ्गवाक्यानां च चक्षुष्मदादिशक्तविषयत्वेन निरवकाशत्वाभावात् । सावकाशेनाङ्गेन प्रधानसङ्कोचे 'इन्द्राय त्वा' इति मानमन्त्रानुसारेण ऐन्द्रप्रदानमात्र एव सोमसङ्कोचापत्तेः । देवानां तु सर्वाङ्गोपसंहारसमर्थानामधिकारे न विवादः । अतस्सर्वेषामधिकार इति **पूर्वपक्षः** ॥

सिद्धान्तस्तु— भवेदेवं यद्याज्यावेक्षणादिकं पुरुषं प्रति विधीयेत; न त्वेतदस्ति; प्रधानशेषत्वात् तेषाम् । अतोऽङ्गवाक्ययुक्तेन प्रधानवाक्येन सर्वांगयुक्तः क्रतुः पुरुषं प्रति विधीयमानः असमर्थानपहाय समर्थान्प्रत्येव विज्ञायते । अतः समर्थानामेवाधिकारः । देवानां तु आत्मोद्देशेन द्रव्यत्यागायोगात् विग्रहाभावाच्च नाधिकार इति ॥

एवं च कथं कर्मानुष्ठातृत्वं देवानामिति चेदुच्यते । देवाना-

मनधिकारं वदन् प्रष्टव्यः किं विग्रहाभावादनधिकारोऽथवा अर्थित्वाभावात्; उतासामर्थ्यादाहोस्विद्विद्याभावात्; अग्न्यभावाद्वा; अथवा प्रतिषेधात्; अविधानाद्वेति ॥

नाद्यः; देवानां विग्रहादिमत्त्वस्य प्राक् प्रपंचितत्वात्। नापि **द्वितीयः**; सिद्धस्वर्गादिषु इच्छाभावेऽपि अप्राप्तफलान्तरेच्छासंभवेन अर्थित्वाविरोधात्। तथा **तैत्तिरीयश्रुतिः** —[1] 'इन्द्रो वाऽकामयत, दृढोऽशिथिलः स्यामिति, स एतं वरुणाय शतभिषजेभ्यः पुरोडाशं दशकपालं निरवपत् कृष्णानां व्रीहीणां, ततो वै स दृढोऽशिथिलोऽभवत्' इति। नापि सामर्थ्याभावादिति **तृतीयः** पक्षः संभवति। तत्र वक्तव्यं किं द्रव्याभावादसामर्थ्यं; अथवा करचरणाद्यंगवैकल्यादिति। नाद्यः। 'इन्द्रो यातो वसितस्य राजा'। 'ईशानमस्य जगतः स्वर्दृशम्' 'अच्छा गिरो मतयो देवयन्तीः अग्निं यन्ति द्रविणं भिक्षमाणाः।' इत्यादिश्रुत्या इन्द्रादीनां देवानां निरवधिकैश्वर्यावगमेन अद्रव्यत्वासिद्धेः। न द्वितीयः। 'तं सुप्रतीकं सुदृशँ स्वंचं' 'सहस्राक्षो गोत्रभिद्वज्रबाहुः' 'इमं मे वरुण श्रुधीहवं' 'ते देवा अग्निमब्रुवन्' 'इदं विष्णुर्विचक्रमे त्रेधा निदधे पदं' इत्यादिश्रुतिभिः हस्तपादाक्षिवागादीनां अवैकल्यावगमात् ॥

नापि **तुरीयः**। किं विद्यैव नास्ति इति, विद्यांगभूतोपनयनादि नास्तीति वा? नाद्यः। उत्कृष्टजनिमतां इन्द्रादीनां स्वयंप्रभातविद्यानां अविद्यानुपपत्तेः। उत्कृष्टजनिमतां स्वयंप्रतिभातविद्यत्वं च **बृहदारण्यकभाष्ये** 'द्वितीयाद्वै भयं भवति' इत्येतद्व्याख्यानावसरे एकत्वज्ञानेन भीत्यपगममभिधाय तदेवैकत्वज्ञानं प्रजापतेः कथमित्याक्षेपपूर्वकं प्रतिपादितम् —[2] 'कुतः प्रजापतेः एकत्वदर्शनं जातं, को वा अस्मा उपदिदेश?

1. तैत्तिरीयब्राह्मणे ३ अष्टके प्रथमप्रश्ने ५ अनुवाके ५० तमदशिनी।
2. १ अध्याये ४ ब्राह्मणे २ कण्डिका

अथानुपदिष्टमेव प्रादुरभूत्, अस्मदादेरपि तथात्वप्रसङ्गः । अथ जन्मान्तरकृतसंस्कारहेतुकम् एकत्वदर्शनानर्थक्यप्रसङ्गः । यथा प्रजापतेरतिक्रान्तजन्मावस्थस्य एकत्वदर्शनं विद्यमानमपि अविद्याबन्धकारणं नापनिन्ये; यतोऽविद्यासंयुक्त एवायं जातोबिभेत् एवं सर्वेषामेकत्वदर्शनानर्थक्यं प्राप्नोति । अन्त्यमेव निवर्तकमिति चेत् पूर्ववत् पुनः प्रसङ्गेनानैकान्त्यात् । तस्मादनर्थकमेवैकत्वदर्शनं इति । नैष दोषः । उत्कृष्टहेतूद्भवत्वाल्लोकवत् । यथा पुण्यकर्मोद्भवैर्विविक्तैः कार्यकरणैस्संयुक्ते जन्मनि सति प्रज्ञामेधास्मृतिवैशारद्यं दृष्टं, तथा प्रजापतेः धर्मज्ञानवैराग्यैश्वर्यविपरीतहेतुसर्वपाप्मदाहात् विशुद्धैः कार्यकारणैः संयुक्तं उत्कृष्टजन्म; तदुद्भवं चानुपदिष्टमेव युक्तमेकत्वदर्शनं प्रजापतेः । तथा च **स्मृतिः**--'ज्ञानमप्रतिघं यस्य वैराग्यं च जगत्पतेः । ऐश्वर्यं चैव धर्मश्च सहसिद्धं चतुष्टयम् ॥' इति । एवमेव विशिष्टजनिमतां मनुष्याणां अपि वामदेवपराशरप्रभृतीनां उपनयनाध्ययनादिकं विना स्वत एव विद्यास्फूर्तिरस्ति । तथा च **ऐतरेयके**--[1]'गर्भेषु सन्नन्वेषामवेदमहं देवानां जनिमानि विश्वा । शतं मा पुर आयसीररक्षन्नधः श्येनो जवसा निरदीयमिति । गर्भ एवैतच्छयानो वामदेव एवमुवाच ॥' इति ।

आदिपर्वणि तापत्योपाख्याने पुत्रशोकार्दितो वसिष्ठोऽदृश्यन्त्या स्नुषया सह वनं गच्छन् [2]'अथ शुश्राव संगत्या वेदाध्ययननिस्वनम् । पृष्ठतः परिपूर्णार्थं षड्भिरङ्गैरलङ्कृतम् ॥ ततो वसिष्ठः -- [3]'पुत्रि कस्यैष साङ्गस्य वेदाध्ययननिस्वनः । पुरा साङ्गस्य वेदस्य शक्तेरिव मया श्रुतः ॥ इत्यपृच्छत् । ततोऽदृश्यन्त्युवाच -- अयं कुक्षौ समुत्पन्नश्शक्तेर्गर्भः सुतस्य ते । समा द्वादश तस्येह वेदानभ्यसतो मुनेः ॥' इति ।

---

1. ऐतरेयोपनिषदि द्वितीयेऽध्याये ।
2. १७७ अध्याये १२ श्लोकः ।
3. १७७ अध्याये १४, १५ श्लोकौ ।

तथा **अष्टावक्रोपाख्यानेपि** उद्दालकेन कहोळाय शिष्याय विद्या कन्यका च दत्ता । [1]'तस्यां गर्भः समभवदग्निकल्पः सोऽधीयानं पितरं चाप्युवाच । सर्वां रात्रिमध्ययनं करोषि नेदं पितः सम्यगिवोपवर्तते ॥ वेदान् साङ्गान् सर्वशास्त्रैरुपेतानधीतवानास्मि तव प्रसादात् । इहैव गर्भे तेन पितः ब्रवीमि नेदं त्वत्तः सम्यगिवोपवर्तते ॥ उपालब्धः शिष्यमध्ये महर्षिः स तं कोपादुदरस्थं शशाप । यस्मात् कुक्षौ वर्तमानो ब्रवीषि तस्मात्कुक्षौ भविताऽस्यष्टवक्रः ॥ स वै तथा वक्र एवाभ्यजायत अष्टावक्रः प्रथितो वै महर्षिः ॥' इति उपनयनाभावेपि विद्यावगम्यते । अतो विशिष्टजनिमतां देवादीनां स्वयंप्रतिभातविद्यत्वेन विद्याभावादनधिकार इति पक्षोऽनुपपन्न एव ॥

न द्वितीयः । उपनयनस्याध्ययनाङ्गत्वेन विद्याङ्गत्वाभावात् । तथा च देवताधिकरणे –[2]'तदुपर्यपि बादरायणः संभवात्' इत्येतत्सूत्रव्याख्यानावसरे भाष्यकृता 'न चोपनयनशास्त्रेण एषामधिकारो निवर्त्यते । उपनयनस्य वेदाध्ययनार्थत्वात् । तेषां च स्वयंप्रतिभातवेदत्वादिति' इत्युक्तम् ॥

नाप्यग्न्यभावादनधिकार इति **पंचमः** पक्षः संभवति । तेषामप्याधानेन अग्निसंपादनसंभवात् । न च 'वसन्ते ब्राह्मणोऽग्नीनादधीत' इत्यादिश्रुत्या ब्राह्मणाद्यधिकारकमाधानं कथं देवा अनुतिष्ठेयुः ? कथं वा तेन देवा अग्निमन्तो भवेयुः इति वाच्यम् । तेषामपि ब्राह्मणत्वादिवर्णविभागावगमेन आधानसंभवात् । तथा च छन्दोगानां प्रपदब्राह्मणे अग्निं संबोध्य यजमानवचनं [3]'त्वं देवेषु ब्राह्मणोऽसि, अहं मनुष्येषु; ब्राह्मणो वै ब्राह्मणमुपधावत्युप त्वा धावामीति'। **तैत्तिरीयश्रुतिरपि** [4]'ब्रह्म वा अग्निः । क्षत्रमिन्द्रः । मरुतो वै देवानां विशः ।' इति च ॥

---

1. वनपर्वणि १३२ अध्याये १०—१२ श्लोकाः ।
2. ब्रह्मसूत्रे प्रथमाध्याये तृतीयपादे २६ सूत्रम् ।
3. सामवेदे प्रपदब्राह्मणे २ प्रपाठके ।
4. अश्वमेधे १३ अनुवाके, २ काण्डे ३ प्रश्ने प्रथमानुवाके च ।

बृहदारण्यकमपि—[1] 'ब्रह्म वा इदमग्र आसीदेकमेव तदेकं सन्न व्यभवत्। तच्छ्रेयोरूपमत्यसृजत क्षत्रं यान्येतानि देवत्रा क्षत्राणि इन्द्रो वरुणः सोमो रुद्रः पर्जन्यो यमो मृत्युरीशान इति। तस्मात्क्षत्रात् परं नास्ति। तस्माद्ब्राह्मणः क्षत्रियमधस्तादुपास्ते राजसूये क्षत्र एव तद्यशो दधाति। सैषा क्षत्रस्य योनिः यद्ब्रह्म। तस्माद्यद्यपि राजा परमतां गच्छति ब्रह्मैवान्तत उपनिश्रयति स्वां योनिं। य उ एनं हिनस्ति स्वां स योनिमृच्छति स पापीयान् भवति यथा श्रेयांसं हिंसित्वा। स नैव व्यभवत्। स विशमसृजत यान्येतानि देवजातानि गणश आख्यायन्ते वसवो रुद्रा आदित्या विश्वेदेवा मरुत इति। स नैव व्यभवत्। स शौद्रं वर्णमसृजत पूषणं इयं वै पूषा' इति। तथा 'तदेतद्ब्रह्म क्षत्रं विट्शूद्रः तदग्निनैव देवेषु ब्रह्मा अभवत्। ब्राह्मणो मनुष्येषु क्षत्रियेण क्षत्रियो, वैश्येन वैश्यः, शूद्रेण शूद्रः। तस्मादग्नावेव देवेषु लोकमिच्छन्ते ब्राह्मणे मनुष्येषु एताभ्यां हि रूपाभ्यां ब्रह्माभवत्' इति ॥

विवृतं चेदं **भगवत्पादैः**—[2] 'ब्रह्म वा इदमग्र आसीत्। यदग्निं सृष्ट्वा अग्निरूपापन्नं ब्रह्म ब्राह्मणजात्यभिमानात् ब्रह्मेत्यभिधीयते। वै इदं क्षत्रादिजातं ब्रह्मैवाभिन्नमासीत्। एकमेव, नासीत्क्षत्रियादिभेदः। तद्ब्रह्म एकं क्षत्रादिपालयित्रादिशून्यं सन्न व्यभवत् तन्न विभूतवत्। कर्मणे नालमासीदित्यर्थः। ततः तद्ब्राह्मणोस्मि ममेत्थं कर्तव्यमिति ब्राह्मणजातिनिमित्तकर्मचिकीर्षया आत्मनः कर्मकर्तृत्वविभूत्यै श्रेयोरूपं प्रशास्तरूपं अत्यसृजत अतिशयेनासृजत सृष्टवत्। किं पुनस्तत् यत् सृष्टं? क्षत्रं क्षत्रियजातिः। तद्व्यक्तिभेदेन प्रदर्शयति—यान्येतानि प्रसिद्धानि लोके, देवत्रा देवेषु क्षत्राणीति जात्याख्यायां पक्षे बहुवचनस्मरणात्, व्यक्तिभेदाद्वा-भेदोपचारेण बहुवचनम्। कानि पुनस्तानीत्याह—तत्राभिषिक्ता एव

1. प्रथमाध्याये चतुर्थब्राह्मणे।
2. बृहदारण्यके १ अध्याये ४ ब्राह्मणे।

विशेषतो निर्दिश्यन्ते— इन्द्रो देवानां राजा, वरुणो यादसां, सोमो ब्राह्मणानां, रुद्रः पशूनां पर्जन्यो विद्युदादीनां, यमः पितॄणां, मृत्यू रोगाणां, ईशानो भासां इत्येवमादीनि देवेषु क्षत्राणि। तदनु इन्द्रादिक्षत्रदेवताधिष्ठितानि मनुष्यक्षत्राणि सोमसूर्यवंश्यानि पुरूरवःप्रभृतीनि सृष्टानि। एवं द्रष्टव्यानि। तदर्थं एव हि देवक्षत्रसर्गः प्रस्तुतः॥

यस्मात् ब्रह्मणातिशयेन सृष्टं क्षत्रं, तस्मात् क्षत्रात् परं नास्ति ब्राह्मणजातेरपि नियंतृ। तस्मात् ब्राह्मणः कारणभूतोऽपि क्षत्रियस्य, क्षत्रियमधस्तात् व्यवस्थितः सन् उपरि स्थितं उपास्ते। क्व? राजसूये। क्षत्र एव तदात्मीयं यशः ख्यातिरूपं ब्रह्मेति दधाति स्थापयति। राजसूयाभिषिक्तेन आसंद्यां स्थितेन राज्ञा आमन्त्रितो ब्रह्मन्निति ऋत्विक्पुनः तं प्रत्याह— त्वं राजन्ब्रह्मासि इति। तदेतदभिधीयते क्षत्र एव तद्यशो दधातीति। सैषा प्रकृता क्षत्रस्य योनिः एव, यद्ब्रह्म। तस्माद्यद्यपि राजा परमतां राजसूयाभिषेकगुणं गच्छति आप्नोति ब्रह्मैव ब्राह्मणजातिमेव अन्ततः अन्ते कर्मपरिसमाप्तौ उपनिश्रयति आश्रयति स्वां योनिं पुरोहितं पुरो निधत्त इत्यर्थः। यस्तु पुनर्बलाभिमानात् स्वां योनिं ब्राह्मणजातिं ब्राह्मणं उ एतं हिनस्ति हिंसति न्यग्भावेन पश्यति, स्वामात्मीयामेव स योनिमृच्छति स्वं प्रसवं विच्छिनत्ति विनाशयति। स एतत्कृत्वा पापीयान्पापतरो भवति। पूर्वमपि क्षत्रियः पाप एव क्रूरत्वात्, आत्मप्रसवहिंसया सुतरां। यथा लोके श्रेयांसं प्रशस्ततरं हिंसित्वा परिभूय पापीयान् पापतरो भवति तद्वत्॥

क्षत्रे सृष्टेऽपि स नैव व्यभवत् कर्मणे ब्रह्म तथा न व्यभवत् वित्तोपार्जयितुरभावात्। स विशमसृजत कर्मसाधनवित्तोपार्जनाय। कः पुनरसौ विट्? यान्येतानि देवजातानि, स्वार्थे निष्ठा, य एते देवजातिभेदा इत्यर्थः। गणं गणं आख्यायन्ते कथ्यन्ते गणप्राया हि विशः। प्रायेण संहता हि वित्तोपार्जने समर्थाः, नैकैकशः। वसवोऽष्टसंख्यो गणः। तथा एकादश

रुद्राः । द्वादशादित्याः विश्वेदेवा दश विश्वाया अपत्यानि । सर्वे वा देवाः । मरुतः सप्त सप्त गणाः ॥

स परिचारकभावात् पुनरपि नैव व्यभवत् । स शौद्रं वर्णमसृजत । शूद्र एव शौद्रः स्वार्थेऽणि वृद्धिः । कः पुनरसौ शौद्रो वर्णः यः सृष्टः ? पूषणं पुष्यतीति पूषा । कः पुनरसौ पूषेति विशेषतस्तन्निर्दिशति — इयं पृथिवी पूषा । स्वयमेव निर्वचनमाह — इयं हीदं सर्वं पुष्यति यदिदं किं च ॥

स चतुरः सृष्ट्वापि वर्णान् नैव व्यभवत् उग्रत्वात् क्षत्रियस्यानियताशंकया ; तच्छ्रेयोरूपं अत्यसृजत । तत्किं ? तद्धर्मं तदेतच्छ्रेयोरूपं (सृष्टं) । क्षत्रस्य क्षत्रं क्षत्रस्यापि नियन्तृ, उग्रादप्युग्रं यद्धर्मो यो धर्मस्तस्मात्क्षत्रस्यापि नियन्तृत्वात् धर्मात् परं नास्ति, तेन हि नियम्यन्ते सर्वे । तत्कथमित्युच्यते— अथो अप्यबलीयान् दुर्बलतरो बलीयांसं आत्मनो बलवत्तरमपि आशंसते कामयते जेतुं धर्मेण बलेन । यथा लोके राज्ञा सर्वबलवत्तमेनापि कुटुम्बिकः एवम् । तस्मात् सिद्धं धर्मस्य सर्वबलवत्तरत्वात् सर्वनियन्तृत्वम् ॥

यो वै स धर्मो व्यवहारलक्षणो लौकिकैर्व्यवह्रियमाणः सत्यं वै तत् । सत्यमिति यथाशास्त्रार्थता; स एवानुष्ठीयमानो धर्मनामा भवति । शास्त्रार्थत्वेन ज्ञायमानस्तु सत्यं भवति । यस्मादेवं तस्मात् सत्यं यथाशास्त्रं वदन्तं व्यवहारकाले आहुः समीपस्था उभयविवेकज्ञाः धर्मं वदतीति प्रसिद्धं लौकिकं न्याय्यं वदतीति । तथा विपर्ययेण धर्मं वा लौकिकं व्यवहारं वदन्तमाहुः सत्यं वदति शास्त्रादनपेतं वदतीति । एतदुक्तं उभयं ज्ञायमानं, अनुष्ठीयमानं च एतद्धर्म एव भवति । तस्मात्स धर्मो ज्ञानानुष्ठानलक्षणः शास्त्रज्ञान् इतरांश्च सर्वानेव नियमयति । तस्मात् स क्षत्रस्यापि क्षत्रं । अतस्तदभिमानः अविद्वान् तद्विशेषानुष्ठानाय ब्रह्मक्षत्रविट्शूद्रनिमित्तविशेषमभिमन्यते । तानि च निसर्गत एव कर्माधिकारनिमित्तानि ॥

तदेतच्चातुर्वर्ण्यं सृष्टं ब्रह्म क्षत्रं विट् शूद्र इत्युत्तरार्थ उपसंहारः। यत्तत्स्रष्टृ ब्रह्म तदग्निनैव नान्येन रूपेण। देवेषु ब्रह्म ब्राह्मणजातिरभवत्। ब्राह्मणः ब्राह्मणस्वरूपेण मनुष्येषु ब्रह्माभवत्। इतरेषु वर्णेषु विकारान्तरं प्राप्य क्षत्रियेण क्षत्रियोऽभवत्। इन्द्रादिदेवताधिष्ठितः, वैश्येन वैश्यः,शूद्रेण शूद्रः। यस्मात् क्षत्रादिषु विकारापन्नं अग्नौ ब्राह्मण एव चाविकृतं स्रष्टृ ब्रह्म, तस्मादग्नावेव देवेषु देवानां मध्ये लोकं कर्मफलमिच्छन्ति अग्निसंबद्धं कर्म कृत्वेत्यर्थः। तदर्थमेव हि तद्ब्रह्म कर्माधिकरणत्वेनाग्निरूपेण व्यवस्थितं। तस्मात् तस्मिन्नग्नौ कर्म कृत्वा तत्फलं प्रार्थयन्त इत्येतदुपपन्नम्। ब्राह्मणे मनुष्येषु मनुष्याणां पुनर्मध्ये कर्मफलेच्छायां नाग्न्यादिनिमित्तक्रियापेक्षा, किं तर्हि जातिमात्रस्वरूपप्रतिलम्भेनैव पुरुषार्थसिद्धिः। यत्र तु देवाधीना पुरुषार्थसिद्धिः, तत्रैवाग्न्यादिसंबद्धक्रियापेक्षा। स्मृतेश्च — [1]'जप्येनैव तु संसिद्ध्येत् ब्राह्मणो नात्र संशयः। कुर्यादन्यन्न वा कुर्यात् मैत्रो ब्राह्मण उच्यते'॥ इति। पारिव्राज्यदर्शनाच्च। तस्माद्ब्राह्मणत्व एव मनुष्येषु कर्मफलमिच्छन्ति; यस्मादेताभ्यां ब्राह्मणत्वाग्निरूपाभ्यां कर्मकर्त्रधिकरणरूपाभ्यां यत्स्रष्टृ ब्रह्म साक्षादभवत्' इति॥

मोक्षधर्मेपि — [2]'आदित्याः क्षत्रियास्तेषां विशस्तु मरुतस्तथा। अश्विनौ तु स्मृतौ शूद्रौ तपस्युग्रे समास्थितौ॥ स्मृतास्त्वंगिरसो देवाः ब्राह्मणा इति निश्चयः। इत्येतत्सर्वदेवानां चातुर्वर्ण्यं प्रकीर्तितम्॥' इति। तथा — [3]'तं पूषाधत्त तेन पूषार्ध्नोत् तं त्वष्टाधत्त तं धाताधत्त' इत्यादिवचनैरपि आधानमवगम्यते। तथा च वर्णाश्रमविभागवतां ब्राह्मणानामिव देवानामपि आधानं संभवत्येव॥

नापि प्रतिषेधादिति षष्ठः पक्षः संभवति। शूद्राधिकारप्रतिषेध-

1. मनुस्मृतौ द्वितीयेध्याये ८७ श्लोकः।
2. २०८ अध्याये २४, २५ श्लोकौ।
3. प्रथमकाण्डे पञ्चमप्रश्ने पञ्चमानुवाके।

वचनवत् देवानामधिकारप्रतिषेधकवचनाभावात् । शूद्राधिकारं च निषेधति **श्रुतिः**— 'तस्माच्छूद्रो यज्ञेऽनवक्लृप्तः' इति । भगवान् **बादरायणोऽपि** [1] 'श्रवणाध्ययनार्थप्रतिषेधात् स्मृतेश्च' इति सूत्रेणाधिकारं प्रतिषेधति । विवृतं चेदं सूत्रं **भगवत्पादैः** 'इतश्च न शूद्रस्याधिकारः ; यदस्य स्मृतेः श्रवणाध्ययनार्थप्रतिषेधो भवति। वेदश्रवणप्रतिषेधो वेदाध्ययनप्रतिषेधः, तदर्थज्ञानानुष्ठानयोश्च प्रतिषेधः शूद्रस्य स्मर्यते । श्रवणप्रतिषेधस्तावत्— 'अथ हास्य वेदमुपशृण्वतः त्रपुजतुभ्यां श्रोत्रप्रतिपूरणम् । (उदाहरणे जिह्वाच्छेदः । धारणे शरीरभेदः) इति । 'पद्यु[ह] वा एतत् श्मशानं यच्छूद्रः तस्माच्छूद्रसमीपे नाध्येतव्यम्' इति च । अत एवाध्ययनप्रतिषेधोऽपि । यस्य च समीपेऽपि नाध्येतव्यं भवति स कथ(मश्रुत)मधीयीत । भवति चोदाहरणे जिह्वाच्छेदः धारणे शरीरभेद इति । साक्षाच्चाध्ययनं प्रतिषेधति श्रुतिः— 'न स्त्रीशूद्रौ वेदमधीयाताम्'इति। अत एव चार्थादर्थज्ञानानुष्ठानयोः प्रतिषेधो भवति। 'न शूद्राय मतिं दद्यात्। द्विजातीनामध्ययनमिज्या दानम्' इति च। अशूद्राणामदुष्टकर्मणां उपनयनं वेदाध्ययनं अग्न्याधेयं फलद[ा नि] च कर्माणि इति च ॥

न चात्र तथा इन्द्रादीनां देवानां अध्ययनप्रतिषेधः, कर्मप्रतिषेधो वाऽवगम्यते । प्रत्युत विद्याग्रहणं विद्याप्रदानं च देवानां अवगतम् । यथा **छान्दोग्ये** — [2] 'एकशतं ह वै वर्षाणि मघवान् प्रजापतौ ब्रह्मचर्यमुवास तस्मै होवाच' इति। तथा— [3] 'भृगुर्वै वारुणिः । वरुणं पितरमुपससार । अधीहि भगवो ब्रह्मेति । तँ होवाच । तपसा ब्रह्म विजिज्ञासस्व ।' इति । [4] 'प्रतर्दनो ह वै दैवोदासिः इन्द्रस्य प्रियं धामोपजगाम' इत्युपक्रम्य

---

1. प्रथमाध्याये तृतीये पादे अपशूद्राधिकरणे ३८ सूत्रम् ।
2. छान्दोग्ये ४ अध्याये ११ खण्डे ३ ऋक् ।
3. भृगुवल्लीषु प्रथमा ऋक् ।
4. कौषीतकिब्राह्मणोपनिषदि तृतीयाध्याये ।

'मामेव विजानीहि एतदेवाहं मनुष्याय हिततमं मन्ये' इति ॥

तथा **कठवल्यां** [1] 'मृत्युप्रोक्तां नचिकेतोऽथ लब्ध्वा विद्यामेतां योगविधिं च कृत्स्नम् । ब्रह्म प्राप्तो विरजोऽभूद्विमुक्तः [मृत्युः] अन्योऽप्येवं यो विद्ध्यात्मनै[मे]व ॥' इति श्रुत्या अग्न्यधिगमो ब्रह्मविद्याधिगमश्च यमात् नचिकेतसोऽवगम्यते । अतोऽध्ययनाध्यापनादेः देवानां संभवात् साक्षात्परंपरया वा वेदाध्ययनकर्मप्रतिषेधयोरभावाच्च देवानामधिकार उपपद्यत एव ॥

तथा कर्मानुष्ठानबोधकान्यपि वाक्यानि श्रुत्यादिषु बहुलमुपलक्ष्यन्ते। तथा च **कठवल्यां** नचिकेतसं प्रति मृत्युवाक्यं — [2] 'ततो मया नाचिकेतश्चितोऽग्निः अनित्यैर्द्रव्यैः प्राप्तवानस्मि नित्यम् ।' इति । तथा **ऐतरेयकब्राह्मणेपि**— [3] 'ते देवा यज्ञमतन्वंत तमाहरंत । तेनायजंत' इति । 'देवा ह वै सर्वचरौ सत्रं निषेदुः' इति च । **तैत्तिरीयकश्रुतावपि** [4] 'देवा वै वरुणमयाजयन्' 'देवा वै सत्रमासत' [5] 'प्रजापतेस्त्रयस्त्रिंशद्दुहितर आसन्' इत्युपक्रम्य 'तस्मा एतमादित्यं चरुं निरवपन् तेनैवैनं पापात्स्रामादमुंचन्' इति च । तथा — [6] 'प्रजापतिरकामयत बहु स्यां प्रजायेयेति स एतमग्निष्टोममपश्यत् तमाहरत्' इत्यादि ॥

तथा **उत्तरकाण्डेपि** रामवाक्यं — [7] 'इष्ट्वा तु राजसूयेन मित्र-

---

1. द्वितीयेध्याये ६ वल्या अन्ते । 2. द्वितीयवल्यां ।

3. ३ अध्याये ५ खण्डे 'यज्ञेन वै तद्देवा यज्ञमयजन्त' इति १ अध्याये १ खण्डे आदौ 'ते देवा यज्ञमतन्वन्त' इति च ऋग्भागात्मकं वाक्यमुपलभ्यते । न तु यथात्र दर्शितम् । देवा ह वै इति वाक्यं तु २६ अध्याये प्रथमायां ऋचि वर्तते ।

4. द्वितीयाष्टके २ प्रश्ने ५ अनुवाके ।

5 द्वितीयकाण्डे ३ प्रश्ने ३, ५ अनुवाकयोः ।

6. तैत्तिरीये २अष्टके ७, ११, अनुवाकगतवाक्यानां विषयसंग्रहात्मकं वाक्यम् ।

7. ४३ सर्गे ६, ७ श्लोकौ ।

रशत्रुनिबर्हणः । सुकृतेन समृद्धेन वरुणत्वमुपागमत् ।। सोमश्च राजसूयेन इष्ट्वा धर्मेण धर्मवित् । प्राप्तश्च सर्वलोकानां कीर्तिस्थानं च शाश्वतम् ।।' इति । **तत्रैव** स्थलान्तरे रामं प्रति लक्ष्मणवाक्यं — [1] 'श्रूयते हि पुरावृत्तं वासवे सुमहात्मनि । ब्रह्महत्यावृतः शक्रो हयमेधेन पावितः ।।'

तथा देवान् प्रति **विष्णुवाक्यमपि** — [2] 'मामेव यजतां शक्रः पावयिष्यामि वज्रिणम् । पुण्येन हयमेधेन मामिष्ट्वा पाकशासनः ।। पुनरेष्यति देवानामिन्द्रत्वमकुतोभयः ।' [3] 'ततस्सर्वे सुरगणाः सोपाध्यायाः सहर्षिभिः । तं देशं समुपाजग्मुः यत्रेन्द्रो भयमोहितः ।। ते तु दृष्ट्वा सहस्राक्षं मोहितं ब्रह्महत्यया । तं पुरस्कृत्य देवेशं अश्वमेधमुपाक्रमन् ।। ततोऽश्वमेधस्सुमहान् महेन्द्रस्य महात्मनः ।। अभिगम्याब्रवीद्वाक्यं क्व मे स्थानं विधास्यथ । ते तमूचुस्ततो देवाः तुष्टाः प्रीतिसमन्विताः ।। चतुर्धा विभजात्मानमात्मनैव दुरासदे । देवानां भाषितं श्रुत्वा ब्रह्महत्या महात्मनाम् ।। सन्निधौ स्थानमन्यत्र वरयामास दुर्वसा । एकेनांशेन वत्स्यामि पूर्णोदासु नदीषु वै ।। चतुरो वार्षिकान्मासान् वसेयं कामचारिणी । भूम्यां सर्वमहं कालं अंशेनैकेन दुर्वसा ।। वसिष्यामि न सन्देहः सत्येनैतद्ब्रवीमि वः । योऽयमंशस्तृतीयो मे स्त्रीषु यौवनशालिषु ।। त्रिरात्रं दर्पपूर्णासु वसिष्ये दर्पघातिनी । हन्तारो ब्राह्मणान् ये तु मृषापूर्वमदूषकान् ।। तांश्चतुर्थेन भागेन संश्रयिष्ये सुरर्षभाः । प्रत्यूचुस्तां ततो देवाः यथा वदसि दुर्वसे ।। तथा भवतु तत्सर्वं साधयस्व यथेप्सितम् । ततः प्रीत्यान्विता देवाः सहस्राक्षं ववन्दिरे ।। विज्वरः पावितात्मा च वासवः समपद्यत । प्रशान्तं च जगत्सर्वं सहस्राक्षे प्रतिष्ठिते ।। यज्ञं

1. ८४ सर्गे ३ श्लोकः ।
2. ८५ सर्गे २० श्लोकस्य उत्तरार्धं २१ श्लोकं च ।
3. उत्तरकाण्डे ८६ सर्गे ७-१९½ श्लोकाः ९, १०, १० पू० विना ।

चाद्भुतसङ्काशं तदा शक्रोऽभ्यपूजयत् । ईदृशो ह्यश्वमेधस्य प्रभावो रघुनन्दन ॥' इति ॥

उद्योगपर्वण्यपि—[1] 'तत्र सर्वे सुरगणास्सोपाध्यायास्सहर्षिभिः । यत्र शक्रो भयोद्विग्नस्तं देशमुपचक्रमुः ॥ तत्राश्वमेधस्सुमहान् महेन्द्रस्य महात्मनः । ववृते पावनार्थं वै ब्रह्महत्यापहो नृप ॥' इति ॥

मोक्षधर्मेऽपि — [2] 'विचचार यथाकामं त्रिषु लोकेषु नारदः । कदाचित्प्रातरुत्थाय पिस्पृक्षुः सलिलं शुचि ॥ ध्रुवद्वारभवां गङ्गां जगामावततार च । सहस्रनयनश्चापि वज्री शम्बरपाकहा ॥ तस्या देवर्षिजुष्टायास्तीरमभ्याजगाम ह । तावाप्लुत्य यतात्मानौ कृतकृत्यौ समासत' ॥ नद्याः पुलिनमासाद्य सूक्ष्मकाञ्चनवालुकम् । अथ भास्करमुद्यन्तं रश्मिजालपुरस्कृतम् ॥ पूर्णमण्डलमालोक्य तावुत्थायोपतस्थतुः ।' इति सन्ध्यावन्दनमपि प्रतिपादितम् । तस्मादस्त्यधिकारः ॥

ननु देवानां स्वर्गे स्थितानां कथं कर्माधिकारः; कर्मभूमौ भारतवर्ष एव कर्मणः कर्तव्यत्वात् । तथा च **विष्णुपुराणे** द्वितीयेंऽशे — [3] 'उत्तरं यत्समुद्रस्य हिमाद्रेश्चैव दक्षिणम् । वर्षं तद्भारतं नाम भारती यत्र सन्ततिः ॥ नवयोजनसाहस्रं विस्तरोऽत्र महामुने । कर्मभूमिरियं स्वर्गमपवर्गं च गच्छताम् ॥ अतस्संप्राप्यते स्वर्गो मुक्तिमस्मात्प्रयन्ति च । तिर्यक्त्वं नरकं चापि यान्त्यतः पुरुषा मुने ॥ इतस्स्वर्गश्च मोक्षश्च मध्यश्चान्तश्च गम्यते । न खल्वन्यत्र मर्त्यानां कर्मभूमौ विधीयते ॥ तपस्तप्यन्ति यतयो जुह्वते चात्र यज्विनः । दानानि चात्र दीयन्ते परलोकार्थमादरात् ॥ पुरुषैर्यज्ञपुरुषो जम्बूद्वीपे सदेज्यते । यज्ञैर्यज्ञमयो विष्णुरन्यद्वीपेषु चान्यथा ॥ अत्रापि

---

1. १३ अध्याये १७, १८ श्लोकौ ।
2. २२८ अध्याये ८-५ श्लोकाः १०, ११ श्लोकयोः उत्तरार्धपूर्वार्धे च ।
3. द्वितीयांशे १, २, ४, ५, २०-२५ श्लोकाः ।

भारतं श्रेष्ठं जम्बूद्वीपे महामुने । यदा हि कर्मभूरेषा अतोन्या भोगभूमयः ॥ अत्र जन्मसहस्राणां सहस्रैरपि सत्तम । कदाचिल्लभते जन्तुर्मानुष्यं पुण्यसंचयात् ॥ गायन्ति गेयाः (देवाः) किल गीतकानि धन्यास्तु ये भारतभूमिभागे । स्वर्गापवर्गास्पदमार्गभूते भवन्ति भूयः पुरुषाः सुरत्वात् ॥ कर्माण्यसङ्कल्पिततत्फलानि सन्यस्य विष्णौ परमात्मरूपे । अवाप्य तां कर्ममहीमनन्ते तस्मिन् लयं ये त्वमलाः प्रयान्ति ॥' इति ॥

एवं च कर्मभूमावेव भारतवर्षेऽनुष्ठेयं कर्म, स्वर्गस्था देवाः कथं कुर्वन्ति इति चेन्न । भोगभूमित्वेन स्वर्गे कर्माकरणेपि भूमावागत्य कर्मानुष्ठाने बाधकाभावात् ॥

तथा च **वनपर्वणि** धर्मपुत्रं प्रति लोमशवचनम् । लोमशः— [1]'इह देवैस्सहेन्द्रैश्च प्रजापतिभिरेव च । इष्टं बहुविधैर्यज्ञैर्महद्भिर्भूरिदक्षिणैः ॥ [2]अस्मिन् किल स्वयं राजा इष्टवान् वै प्रजापतिः । सत्रामिष्टिकृतं नाम पुरा वर्षसहस्रकम् ॥ देशश्च नाहुषस्यायं यज्वनः पुण्यकर्मणः ।' इति ॥

तत्रैव **पुलस्त्यतीर्थयात्रायामपि**— [3]'तरन्तुकारन्तुकयोर्यदन्तरं रामह्रदानां च मचक्रुशस्य च । एतत्कुरुक्षेत्रसमन्तपञ्चकं पितामहस्योत्तरवेदिरुच्यते ॥' इति । **तत्रैव** स्थलान्तरे — [4]'गङ्गायमुनयोर्वीर सङ्गतं लोकविश्रुतम् । यत्रायजत भूतात्मा पूर्वमेव पितामहः ॥ प्रयागमिति विख्यातं तस्माद्भरतसत्तम ।' इति ।

---

1. १२१ अध्याये २ श्लोकः ।
2. १२९ अध्याये प्रथमश्लोकः तृतीयश्लोके उत्तरार्धं च ।
3. ८३ अध्याये २०८ श्लोकः ।
4. ८५ अध्याये यमुनागंगासंगमे प्रयागा इति 'गंगायमुनयोर्मध्यं पृथिव्या जघनं स्मृतं' इति च ७५, ७६ श्लोकयोर्वर्ण्यते । 'गंगायमुनयोर्वीर' इत्यादिकः सार्धः श्लोकः तु यथादार्शितं न दृश्यते ।

गदापर्वण्यपि— [1] 'प्रजापतेरुत्तरवेदिरुच्यते सनातनी(नं) राम समन्तपञ्चकम् । समीजिरे यत्र पुरा दिवौकसो वरेण सत्रेण महावरप्रदाः ॥' इति । [2] 'यत्र विष्णुः पुरा देवः तप्तवान् तप उत्तमम् । अत्रास्य विधिवद्यज्ञाः सर्वे वृत्ताः सनातनाः ॥' इति च । तथा — [3] 'अत्रेजिवानुडुपतिः राजसूयेन भारत । तस्मिंस्तीर्थे महानासीत् संग्रामस्तारकामयः ॥' इति ।

न चैतेषामर्थवादानां 'गावो वा एतत्सत्रमासत' इत्यादिवत् अविवक्षितार्थकत्वमिति वाच्यम् । अर्थित्वसामर्थ्यादिविधुराणां अधिकारविरोधेनाविवक्षितार्थकल्पनेपि अविरुद्धार्थवादानां स्वार्थतात्पर्ये बाधकाभावात् । अत एव वज्रहस्तत्वसहस्राक्षत्वादिकं इन्द्रादीनामार्थवादिकमविरोधादस्तीति प्रपञ्चितं **देवताधिकरणे** । न चैवमपि इन्द्रस्य ऐन्द्रयागे कथमधिकारः; कर्मकर्तृविरोधादिति वाच्यम् । भृगोः कल्पान्तरीयभृगुवरणेन कर्माधिकारवत् कल्पान्तरीयेन्द्रोद्देशेन द्रव्यत्यागात् अधिकारोपपत्तेः ॥

किञ्चेन्द्रस्य इन्द्रदेवताके कर्मण्यधिकाराभावेपि अन्यदेवतोद्देश कर्मणि अधिकारसंभवात् । न ह्येकत्रानधिकारोऽन्यत्राधिकारविरोधी भवति । अत एव मध्वादिविद्यासु आदित्यादीनामधिकाराभावेपि तदितरविद्यासु (आदित्यादीनां) अधिकारः प्रतिपादितो भगवता **बादरायणेन** [4] 'मध्वादिष्वसंभवादनधिकारं जैमिनिः' इत्यादिसूत्रैः ।

व्याख्यातं चाचार्यैः — 'देवानां ब्रह्मविद्यायामधिकारो नोपपद्यते, मध्वादिष्वसंभवात् । ब्रह्मविद्यायामधिकाराभ्युपगमे हि विद्यात्वाविशेषात् मध्वादिविद्यास्वपि अधिकारोऽभ्युपगम्येत । न चैवं संभवति । कथम्? 'असौ

1. ५३ अध्याये प्रथमः श्लोकः ।
2. ५४ अध्याये ५ श्लोकः ।
3. ५१ अध्याये प्रथमः श्लोकः ।
4. प्रथमाध्याये तृतीयपादे ३१ सूत्रम् ।

वा आदित्यो देवमधु' इत्यत्र हि मनुष्या आदित्यं मध्वध्यासेन उपासीरन् । देवादिषूपासकेष्वभ्युपगम्यमानेषु आदित्यः कमन्यमादित्यमुपासीत ? पुनश्च आदित्यव्यपाश्रयाणि पञ्च रोहितादीनि अमृतानि अनुक्रम्य वसवो रुद्रा आदित्या मरुतः साध्याश्च पञ्च देवगणाः क्रमेण तत्तदमृतं उपजीवन्तीति उपदिश्य 'स य एतदेवं अमृतं वेद वसूनामेवैको भूत्वा अग्निनैव मुखेन एतदेवामृतं दृष्ट्वा तृप्यति' इत्यादिना वस्वाद्युपजीव्यानि अमृतानि विजानतां वस्वादिमहिमप्राप्तिं दर्शयति । वस्वादयस्तु कानन्यान्वस्वादीन् अमृतोपजीविनो विजानीयुः ? कञ्चान्यं वस्वादिमहिमानं प्राप्नुयुः ? तथा [1] 'अग्निः पादो वायुः पाद आदित्यः पादो दिशः पादः' 'वायुर्वाव संवर्गः' 'आदित्यो ब्रह्मेत्यादेशः' इत्यादिषु देवतात्मकोपासनेषु न तेषामेव देवतात्मनामधिकारः संभवति ।

[2] 'भावं तु बादरायणोऽस्ति हि' । तुशब्दः पक्षं व्यावर्तयति । बादरायणस्त्वाचार्यः भावमधिकारस्य देवादीनामपि मन्यते । यद्यपि मध्वादिविद्यासु देवादिव्यामिश्रासु असंभवोऽधिकारस्य, तथापि अस्ति हि शुद्धायां ब्रह्मविद्यायां संभवः । अर्थित्वसामर्थ्याप्रतिषेधाद्यपेक्षत्वादधिकारस्य । न हि क्वचिदसंभव इत्येतावता यत्र संभवस्तत्राधिकारोऽपोद्यते । यथा ब्राह्मणानां राजसूयादिषु अधिकाराभावेपि तदितरवाजपेयादिष्वधिकारः । ब्रह्मविद्यां प्रकृत्य भवति लिङ्गदर्शनं श्रौतं देवाद्यधिकारस्य सूचकम् । [3]'तद्यो यो देवानां प्रत्यबुद्ध्यत स एव तदभवत् । तथा ऋषीणां (मनुष्याणां)' इति । [4] 'ते होचुः हन्त तमात्मानं अन्विच्छामहे यमात्मानमन्विष्य सर्वांश्च लोकानाप्नोति । इन्द्रो ह वै देवानां अभिप्रवव्राज विरोचनोऽसुराणां'

---

1. छान्दोग्ये ३ अध्याये १८, १९, खण्डयोः ४ अध्याये ३ खण्डे च ।
2. प्रथमाध्याये तृतीयपादे ३३ सूत्रं ।
3. बृहदारण्यके ४ ब्राह्मणे १० ऋचि ।
4. छान्दोग्ये अन्ते प्रजापतिविद्यायां ८ अध्याये ७ खण्डे द्वितीया ऋक् ।

इत्यादि च। स्मार्तमपि च गन्धर्वयाज्ञवल्क्यसंवादादि। ततश्च अर्थित्वादिसंभवादुपपन्नो देवादीनामपि ब्रह्मविद्यायामधिकारः' इति ॥

तथा च नोद्देश्यके कर्मणि अनधिकारेऽपि, तदितरकर्मसु अधिकारे न किञ्चिद्बाधकम्। नाप्यविधानादनधिकार इति पक्षः संभवति। स्वर्गकामादिवाक्यस्यैवाविशेषेण सर्वान् प्रति विधायकत्वात् मनुष्यो यजेत, देवो यजेत, इति विशेषे विधानापेक्षायां ज्योतिष्टोमादिषु मनुष्याणां अप्यधिकारो न स्यात्। एवं च उदाहृतश्रुतिस्मृतीतिहासादिभिः न्यायोपबृह्मितैरवगम्यमानमधिकारमुपेक्ष्य देवानां कर्मानुष्ठानबोधकागमविरुद्धेन [1] 'नैषा तर्केण मतिरापनेया' 'तर्काप्रतिष्ठानात्' इति निन्दितेन केवलतर्केण देवानामनधिकारः कथमिति विद्वद्भिर्विवेचनीयम् ॥

केचित्तु, आराधयिष्याम्यत्राहमगस्त्यं तं महामुनिम् ॥ ८९½ ॥

अत्र देवाश्च गन्धर्वाःसिद्धाश्च परमर्षयः।
अगस्त्यं नियताहारं सततं पर्युपासते ॥ ९१ ॥

इत्यादावगस्त्योपासनस्यावगमेन धर्ममाराधयिष्णव इत्यत्रापि धर्मस्वरूपमगस्त्यमहामुनिमाराधयितुं देवाः समागता इत्येतदर्थपरं वर्णयन्ति। अत एव समागतानां देवानां सन्ततोपासनार्थं स्थानान्यपि उत्तरसर्गे प्रतिपादितानि—

स तत्र ब्रह्मणः स्थानमग्नेः स्थानं तथैव च।
विष्णोः स्थानं तथेन्द्रस्य स्थानं चैव विवस्वतः ॥ १७ ॥
सोमस्थानं भगस्थानं स्थानं कौबेरमेव च।
धातुर्विधातुः स्थाने च वायोः स्थानं तथैव च ॥ १८ ॥
स्थानञ्च पाशहस्तस्य वरुणस्य महात्मनः।
स्थानं तथैव गायत्र्याः वसूनां स्थानमेव च ॥ १९ ॥

---

1. कठोपनिषदि प्रथमाध्याये द्वितीयवल्ल्यां ९ ऋचि।

स्थानञ्च नागराजस्य गरुडस्य महात्मनः ।
कार्तिकेयस्य च स्थानं धर्मस्थानं च पश्यति ॥ २० ॥ इति।

अत एव च **उत्तररामायणे** शंबुकवधानन्तरं श्रीरामचन्द्रं द्रष्टुं स्वर्गाद्विमानैरागतानां [1] 'अगस्त्यस्याश्रमपदं द्रष्टुमिच्छाम राघव ।' इत्यादि 'काकुत्स्थ तं गमिष्यामो मुनीन्द्रमभिवादितुम् ।' इत्यन्तं देवानां वचनजातमुपन्यस्य तथैव तदभिवादनार्थं तेषां देवानामगस्त्याश्रमागमनं प्रतिपादितम् । तत्रैव श्वेतनामानं राजानं स्वस्य क्षुत्पिपासारूपमहाव्याधेरवधिं पृष्टवन्तं प्रति अगस्त्यदर्शनेन तच्छान्तिरित्युक्त्वा तदुपपादनार्थं, [2] 'स हि तारयितुं सौम्य शक्तः सुरगणानपि । किं पुनस्त्वां महाबाहो क्षुत्पिपासासमन्वितम् ॥' इति ब्रह्मणो वचनमपि अगस्त्यस्य देवोपास्यत्वं प्रतिपादयति ॥

अयमर्थः अप्पय्यदीक्षितैः **रामायणतात्पर्यसंग्रहेऽपि** अर्थात् प्रतिपादितः — [3] 'रामायणे हि कलशप्रभवाश्रमस्था देवादयोपि तमुपासत इत्युदीर्य । स्थानानि धातृमधुजिन्मघवन्मुखानां तस्याश्रमे निगदितानि न ते कपर्दिन् ॥' किञ्च तिर्यगधिकरणोक्तरीत्या फलेच्छावतां समर्थानां च कर्मण्यधिकारः सिद्धः । तावन्मात्रं शूद्रादिसाधारणमिति तेषामप्यधिकारप्रसक्तौ तस्माच्छूद्रो यज्ञेऽनवक्लृप्त इति निषेधोऽप्यर्थवान् भवति । अन्यथाऽप्रसक्तप्रतिषेधापत्तेः । एवं चार्थी समर्थो विद्वान् शास्त्रेणापर्युदस्तः अधिकारीति सिद्धम् । एवञ्च [4] 'देवता वा प्रयोजयेदतिथिवद्भोजनस्य तदर्थत्वात्' इत्यादिना निराकृतं देवतादिविग्रहवत्त्वं; [5] 'तदुपर्यपि बादरायणः

1. ७६ सर्गे १६. उ० १७, १८ पू० = श्लोकौ ।
2. ७८ सर्गे २० श्लोकः ।
3. द्वितीयः श्लोकः ।
4. जैमिनिसूत्रे ९ अध्याये प्रथमपादे देवताधिकरणे प्रथमं सूत्रम् ।
5. प्रथमाध्याये तृतीयपादे २६ सूत्रं ।

संभवात्' इत्यादिना बादरायणाचार्यैः साधितं विग्रहसत्त्वेऽर्थित्वादेरवर्जनीयतया देवानामधिकारे न किञ्चिद्बाधकमिति ॥

इदञ्च धर्मात्मनोऽगस्त्यस्य उपासनं शरीरक्रियारूपशुश्रूषात्मकं वा परमेश्वरध्यानवदगस्त्यध्यानात्मकं वा वक्तव्यम्। तत्राद्यं क्रियारूपमिति सुप्रसिद्धम्। द्वितीयमप्युपासनं मानसिकक्रियात्मकमेव। देवतोद्देशेन द्रव्यत्यागात्मकज्योतिष्टोमादियागवत् पुरुषव्यापारपरतन्त्रत्वात्। न च तर्हि ज्ञानमपि क्रिया स्यादिति वाच्यम्। प्रमाणपरतन्त्रस्य ज्ञानस्य पुरुषव्यापारानधीनस्य क्रियात्वासंभवात्। क्रिया हि नाम सा यत्र स्वरूपनिरपेक्षैव चोद्यते पुरुषचित्तव्यापाराधीना च। यथा 'यस्यै देवतायै हविर्गृहीतं स्यात्तां ध्यायेद्वषट्करिष्यन्' इति। सन्ध्यां मनसा ध्यायेदिति च। एवमादिषु ध्यानं चिन्तनं यद्यपि मानसं, तथापि पुरुषैः कर्तुमकर्तुमन्यथाकर्तुं शक्यं; पुरुषपरतन्त्रत्वात् ॥

ज्ञानं तु प्रमाणजन्यं; प्रमाणं च यथाभूतवस्तुविषयम्। अतो ज्ञानं कर्तुमकर्तुमशक्यं केवलं वस्तुतन्त्रमेव। तन्न चोदनातन्त्रं; नापि पुरुषतन्त्रम्। तस्मात् मानसत्वेपि ज्ञानस्य क्रियावैलक्षण्यम्। यथा —[1] 'पुरुषो वाव गौतमाग्निः' इत्यत्र योषित्पुरुषयोरग्निबुद्धिर्मानसी भवति। केवलं चोदनाजन्यत्वाच्च क्रियैव सा; पुरुषतन्त्रा च। या तु प्रसिद्धाग्नावेवाग्निबुद्धिः न सा चोदनातन्त्रा; नापि पुरुषतन्त्रा। किं तर्हि? प्रत्यक्षविषया वस्तुतन्त्रैवेति ज्ञानमेव; न क्रिया। उपासना तु क्रियैवेति। तथा च शारीरोपासनायाः मानसिकोपासनाया वा ज्योतिष्टोमादिवत् क्रियात्वाविशेषात् कर्मत्वं सिद्धम्। तथा च कर्मानुष्ठानाय वा महर्षेरुपासनाय वा देवागमनप्रतिपादकं धर्ममाराधयिष्णव इति वचनं श्लिष्टतरम् ॥

---

1. छान्दोग्ये ५ अध्याये ७ खण्डे प्रथमा ऋक्।

अत्र सिद्धा महात्मानो विमानैस्सूर्यसन्निभैः ।
त्यक्त्वा देहं नवैर्देहैः स्वर्याताः परमर्षयः ॥ ९४ ॥

यक्षत्वममरत्वं च राज्यानि विविधानि च ।
अत्र देवाः प्रयच्छन्ति वृत्तैराराधिताः शुभैः ॥ ९५ ॥

अनेन महतां निकटेऽनुष्ठितो धर्मः झडिति ऐहिकमामुष्मिकं च फलतीति सूचितम् ॥

आगताः स्माश्रमपदं सौमित्रे प्रविशाग्रतः ।
निवेदयेह संप्राप्तमृषये सीतया सह ॥ ९६ ॥

इति एकादशः सर्गः ॥

अथ द्वादशत्रयोदशौ सर्गौ ॥

द्वादशत्रयोदशयोः — तदनुजेन सौमित्रिणा निवेदितरामागमनवृत्तान्तो महर्षिशिष्यो निखिललोकशरण्यमग्निशरणस्थमृषिमिदमाह —

पुत्रो दशरथस्यासौ रामो नाम महायशाः ।
सह भ्रात्राश्रमपदं सीतया सह भार्यया ॥ ७ ॥

द्रष्टुं भवन्तमायातः शुश्रूषार्थमरिन्दमः ।
यदत्रानन्तरं तत्त्वमाज्ञापयितुमर्हसि ॥ ८ ॥

ततः शिष्यसमुदीरितरामागमनवृत्तान्तश्रवणजनितहर्षप्रकर्षेण महर्षिणा, 'सत्कृत्य रामो झडिति प्रवेश्यतां' इति समाज्ञप्तः शिष्यः, ससीतं सलक्ष्मणं रामं सत्कृत्य प्रावेशयत् । ततो निखिलजनाभिरामो रामः प्रशान्तहरिणगणसंपूर्णमाश्रमं प्रविशन्नेव तत्रस्थितानि ब्रह्मादिसकलदेवतास्थानान्यपश्यत् ॥

ततः शिष्यैः परिवृतो मुनिरप्यभिनिष्पतत् ।

अनेन राज्ञोपि ब्राह्मणैरभ्युत्थानं कर्तव्यमिति सूचितम् । तथा च **बोधायनः** — [1] 'अभ्युत्थायाचार्य ऋत्विक्पिता मातुलः श्वशुरो वेदविद्ब्राह्मणः क्षत्रियोऽभिषिक्तः सहस्रदो वैश्यो राजपुरोहितश्चेत्यर्घ्या भवन्तीति ॥

तत्र समागच्छन्तमगस्त्यमवलोक्य लक्ष्मणमाह —

एष लक्ष्मण निष्क्रामत्यगस्त्यो भगवानृषिः ।
औदार्येणावगच्छामस्तपसो राशिमव्ययम् ॥ २२ ॥ इति ।

ततो महर्षिः कृतप्रणामं प्रश्रयावनतं राममभिनन्द्य, समापृच्छ्य कुशलं, समभ्यर्च्य चासनोदकैः आस्यतामित्यवोचत् । ततः,

अग्निं हुत्वा प्रदायार्घ्यं अतिथीन्प्रतिपूज्य च ।
वानप्रस्थेन धर्मेण स तेषां भोजनं ददौ ॥ २६ ॥

अत्राग्निं हुत्वेत्यनेन वैश्वदेवहोमोऽभिप्रेतः । न त्वग्निहोत्रहोमः । तस्य 'सायं जुहोति, प्रातर्जुहोति, उदिते जुहोति, अनुदिते जुहोतीत्यादिशास्त्रैः सायंप्रातःकालयोरेव कर्तव्यत्वात् । रामश्च न प्रातः समागत इति संभवति । प्रातःकालेऽगस्त्यभ्रातुराश्रमेऽवस्थानावगमात् । तथा च **पूर्वसर्गे**—

तस्यां रात्र्यां व्यतीतायां विमले सूर्यमण्डले ।
भ्रातरं तमगस्त्यस्य आमन्त्रयत राघवः ॥ ७३ ॥

अभिवादये त्वां भगवन् सुखमध्युषितो निशां ।
आमन्त्रये त्वा भगवन् गुरुं ते द्रष्टुमग्रजम् ॥ ७४ ॥ इति ।

नापि सायं समागत इति संभवति । समागतस्य रामस्य कृतातिथ्यस्य सायंकाले सन्ध्योपासनाय प्रेषणावगमात् । तथा **चानन्तरसर्गे रामं** प्रत्यगस्त्यवचनं —

---

1. द्वितीयप्रश्ने तृतीयाध्याये ३६ सूत्रे 'ऋषिविद्वन्नृपवरमातुलश्वशुरर्त्विजः । एतेऽर्घ्यादशास्त्रविहिताः स्मृताः कालविभागशः ॥' इति दृश्यते, न तु यथात्र दृश्यते ।

रविरस्तं गतस्सौम्य सन्ध्याकालोऽभ्युपागतः ॥ इति ।

अतः परिशेषान्मध्याह्न एवागमनं रामस्य वक्तव्यम् । युक्तं चागस्त्यभ्रातुराश्रमात् योजनमात्रेऽवस्थितस्यागस्त्याश्रमस्य मध्याह्नगमनम् । तथा च सुतीक्ष्णवचनं । अगस्त्यभ्रातुराश्रममभिधाय [1] 'अगस्त्यस्याश्रमपदं गत्वा योजनमन्तरम्' इति । एवं च मध्याह्ने समागतस्य रामस्य भोजन-प्रदानात् प्राक् क्रियमाणो होमो वैश्वदेवहोम एवेति ॥

एवञ्च सति [2] 'अग्निं हुत्वा प्रदायार्घ्यमतिथीन् प्रतिपूज्य च' इति होमानन्तर्यमतिथिपूजाया युक्ततरं भवतीति । 'अतिथीन् प्रतिपूज्य वान-प्रस्थेन धर्मेण स तेषां भोजनं ददौ' इत्यनेन ब्राह्मणाः प्रथमतो भोजनीयाः । ततः क्षत्रियादय इति क्रमस्सूचितः । तथा च **मनुः**— [3] 'यदि त्वतिथि-धर्मेण क्षत्रियो गृहमाव्रजेत् । भुक्तवत्सु च विप्रेषु कामं तमपि भोजयेत् ॥ वैश्यशूद्रावपि प्राप्तौ कुटुम्बेऽतिथिधर्मिणौ । भोजयेत्सह भृत्यैस्तान् आनृशंस्यं प्रयोजयन् ॥' इति ॥

न चानृशंस्यायान्नमात्रं रामाय दत्तमिति न रामोऽतिथिः । अत एवातिथीन् प्रतिपूज्य भोजनं ददाविति भोजनमात्रं प्रतिपादितमिति वाच्यम् । धर्मशास्त्रपर्यालोचनया क्षत्रियस्यापि रामस्य राजत्वेनातिथित्वात् ॥

तथा च **बोधायनः**— [4] 'अथास्यातिथिर्भवति गुरोः समानवृत्तिः वैखानसो वा गृहस्थो वानप्रस्थः परिव्राजको गतश्रीः स्नातको राजा वा धर्मयुक्तस्तेषामभ्युत्थायासनं पाद्यमर्हणं अर्घ्यं वा प्रयुंजनेति' । अतिथीन् प्रतिपूज्य भोजनं ददावित्येतत्तु नातिथित्वनिवर्तकम् । अपि तर्हि अतिथेः कर्तव्यस्य प्रत्युत्थानकुशलप्रश्नार्घ्यादिपूजायाः प्राक् कृतत्वात् अवशिष्टं

1. ११ सर्गे ४३ श्लोकस्य पूर्वार्धं ।
2. १२ सर्गे २६ श्लोकः ।
3. तृतीयाध्याये १११, ११२ श्लोकौ ।
4. गृह्यसूत्रे २ प्रश्ने १० अध्याये १७, १८ सूत्रे ।

भोजनमुत्कृष्टेभ्यो ब्राह्मणेभ्यः प्रदाय पश्चाद्दत्तवानित्येतदभिप्रायकं । तथा च पूर्ववचनानि—

ततः शिष्यैः परिवृतो मुनिरप्यभिनिष्पतत् ॥ २८½ ॥
कुशलप्रश्नमुक्त्वा तु समभ्यर्च्याम्बुनोदकैः ॥ २९ ॥

इत्यादीनि । तस्मादतिथिधर्मेण रामायान्नं प्रादादित्येव युक्तम् ॥

न चैवमनतिथित्वप्रतिपादकं [1]'ब्राह्मणस्य त्वनतिथिर्गृहे राजन्य उच्यते' इति **मनुवचनम्**, [2]'ब्राह्मणस्यानतिथिरब्राह्मणः' इति **गौतमवचनम्**, [3]'अथ यदि ब्राह्मणक्षत्रियौ समेयातां ब्राह्मणोऽतिथिः क्षत्रिये सान्त्वं' इत्यादिबोधायनवचनं च विरुद्ध्यत इति वाच्यम् । 'राजा वा धर्मयुक्तः' इति **बोधायनवचनेन** राज्ञोपि धर्मिष्ठस्यातिथित्वावगमेन 'ब्राह्मणस्य त्वनतिथिर्गृहे राजन्य उच्यते' इति अतिथित्वनिषेधक**मनु**वचने गृह इति विशेषणमहिम्ना गृहेऽनतिथेरपि क्षत्रियस्य वानप्रस्थान् प्रति वनेऽतिथित्वमभ्यनुज्ञातमिति माधवाचार्यैर्व्याख्यातत्वेन च ब्राह्मणस्य त्वनतिथिरित्यादिनिषेधकवचनानां गृहस्थं प्रति आगतक्षत्रियजातिमात्रविषयत्वात् । अतश्च क्षत्रियोऽपि वनं प्राप्तः धर्मिष्ठश्च ब्राह्मणस्यातिथिर्भवत्येव ॥

गृहे समागतस्याप्यैश्वर्योपेतस्यातिथ्यमभ्युदयकामेन कर्तव्यम् । तथा च **पराशरः**—'यस्य छत्रं हयश्चैव कुञ्जरारोहमृद्धिमत् । ऐन्द्रस्थानमुपासीत तस्मात्तं न विचारयेत् ॥' इति ।

व्याख्यातं च **माधवाचार्यैः**—'यस्य छत्रं हयो वा विद्यते तस्यातिथ्यं कुर्वन् ऐन्द्रपदमाप्नुयात् । एतस्मिन् वचने पूर्वोत्तरयोर्वचनयोरातिथ्यविषयत्वात् तत्प्रकरणान्तःपातित्वेनानुक्तमप्यातिथ्यं कुर्वन्निति पदद्वयं

---

1. तृतीयेऽध्याये ११० श्लोके पूर्वार्धं ।
2. पञ्चमाध्याये ४३ सूत्रम् ।
3. गृह्यपरिभाषायां २ प्रश्ने ५ अध्याये प्रथमं सूत्रम् ।

सन्दंशन्यायेन लभ्यते। कुञ्जरस्यारोहो यस्मिन् ऐन्द्रपदे तत्कुञ्जरारोहम्। ऋद्धिः अमृतपानाप्सरःसेवादिः अस्मिन् अस्तीति ऋद्धिमत्। छवादिमान् क्षत्रियादिजातिरतिथिः जातिकुलाचारैर्यद्यपि हीनः तथापि तत्पूजायाः स्वर्गप्राप्तिहेतुत्वात् तमतिथिं हीनबुद्ध्या पूज्योऽयं न वेति न विचारयेत्। न सन्दिह्यात्; किन्त्वीश्वरबुद्ध्या पूजयेत् ॥

यद्यपि भिक्षुकवत्त्वायमस्मिन् जन्मनि तपस्वी, तथाप्यतीते जन्मनि अनेन तपोऽनुष्ठितम्। । अन्यथा ईन्द्रैश्वर्यस्य प्राप्त्यसंभवात्। अत एव विभूतिमतो भगवदंशत्वं च भगवता दर्शितम्—[1] 'यद्यद्विभूतिमत्सत्वं श्रीमदूर्जितमेव वा। तत्तदेवावगच्छ त्वं मम तेजोंशसंभवम् ॥' इति। तस्मात् क्षत्रियादेरपि ऐश्वर्योपेतस्यातिथ्यं सिद्धम् ॥

'अग्निं हुत्वा प्रदायार्घ्यं' इत्यादिना एवमुक्त्वा फलैर्मूलैः इत्यन्तेन कन्दमूलफलादिभिः वैश्वदेवहोमपूर्वकं आतिथ्यं कृतमित्यवगम्यते। तदसङ्गतम्। वैश्वदेवहोमे ओदनस्यैव द्रव्यत्वावगमात्। तथा चाश्वलायनः [2] 'सायंप्रातः सिद्धस्य हविष्यस्य जुहुयात्' इति। खादिरगृह्येपि—[3] 'हविष्यस्यान्नस्य जुहुयात्' इति। वामनकारिकायामपि—'मोक्षा नमस्त इत्युक्त्वा पात्रे कस्मिंश्चिदोदनं। निधाय उदकसेच्यादि नित्यहोमवदाचरेत् ॥' इति। तथा च कथं कन्दमूलफलादिभिः कृतमिति चेन्न। यदशनीयं यस्य तस्य तेनैव वैश्वदेवादिविधानात्। तथा च गृह्यपरिशिष्टे—'शाकं वा यदि वा पत्रं मूलं वा यदि वा फलम्। संकल्पयेद्यदाहारः तेनैव जुहुयादपि ॥' इति।

वानप्रस्थानां च कन्दमूलफलादिकमशनीयम्। तथा च गौतमः—[4] 'वैखानसो वने मूलफलाशी' इति। एवं च वानप्रस्थस्य महर्षे-

1. भगवद्गीतायां दशमाध्याये ४१ श्लोकः।
2. प्रथमाध्याये २ खण्डे प्रथमं सूत्रं।
3. प्रथमपटले ५ खण्डे २१ सूत्रस्यैकदेश.।
4. गौतमधर्मसूत्रे तृतीयाध्यायान्ते वर्तते।

रशनीयेन कन्दमूलफलादिना वैश्वदेवादिकरणस्य युक्तत्वात् । एतदभिप्रायेणैव वानप्रस्थेन विधिना कन्दैर्मूलैः फलैः इत्यादिकमुक्तम् । अतो नानुपपन्नं किञ्चित् । ओदननियमस्तु गृहस्थानामेवेति न सूत्रविरोधः ॥

तेषां गृहस्थानामपि तदलाभे कन्दमूलफलादिभिः करणम् । तथा च **चतुर्विंशतिमते**— 'अलाभे येन केनापि फलशाकोदकादिभिः । पयोदधिघृतैः कुर्यात् वैश्वदेवं स्रुवेण तु ॥ हस्तेनान्नाहुतिं कुर्यात् अद्भिरञ्जलिना जले ।' इति । **व्यासोऽपि**— 'पक्काभावे प्रवासी च तण्डुलानोषधींश्च वा । पयोदधिघृतं वापि कन्दमूलफलानि च ॥' जुहुयादिति शेषः । होमद्रव्यसंस्कारमाह **व्यासः**— 'जुहुयात्सर्पिषाभ्यक्तं तैलक्षारविवर्जितम् । दध्यक्तं पयसाक्तं वा तदभावेऽम्बुनापि वा ॥' इति । **गृह्यपरिशिष्टेऽपि**— अग्नेः प्रत्यग्दर्भेषु निधाय सर्पिषाभ्यज्य सकृदवदानेन पाणिना जुहुयादिति ॥

निषिद्धद्रव्याणि — 'कोद्रवं वरकं माषं मसूरं च कुलित्थकम् । क्षारं च लवणं सर्वं वैश्वदेवे विवर्जयेत् ॥' अनिषिद्धालाभे निषिद्धेनापि भोज्येन होमप्रकारमाह **बोधायनः**— [1] 'क्षारलवणावरान्नसंसृष्टस्य तु होमं परिचक्षते कामामितरेष्वायतनेषु । अथ यद्येतदेव स्यात् उत्तरतो भस्मभिश्रानङ्गारान्निरूह्य तेषु जुहुयात्' इति ॥

आपस्तम्बोऽपि —[2]'न क्षारलवणहोमो विद्यते तथावरान्नसंसृष्टस्य च । हविष्यस्य होम उदीचीनमुष्णं भस्मापोह्य तस्मिन् जुहुयात् । तद्धुतमहुतं चाग्नौ भवतीति' । **बोधायनोऽपि**—[3]'अङ्गारान् भस्ममिश्रांस्तु निरूह्योत्तरतोऽव तु । जुहुयाद्वैश्वदेवं तु यदि क्षारादिमिश्रितम् ॥' इति ।

---

1. बोधायनगृह्यसूत्रे ३ प्रश्ने ४–६ सूत्राणि ।
2. द्वितीयप्रश्ने १५ पटले १४–१६ सूत्राणि ।
3. गृह्यसूत्रे २ प्रश्ने ८ अध्याये ४, ६ सूत्रयोः श्लोकोक्तविषयः प्रतिपाद्यते ।

वैश्वदेवकालः ॥ तत्राश्वलायनः— [1]'अथ सायंप्रातः । सिद्धस्य हविष्यस्य जुहुयात् ।' इति । स्वादिरगृह्येपि — [2]'सिद्धेन्ने सायंप्रात-रिति अहर्मात्रोपलक्षणम् । तत्रापि अष्टधा विभक्तस्याह्नः पञ्चमो भागः । तथा चाष्टविभागमभिधायाह्नः पञ्चमे भागे वैश्वदेवमाह दक्षः — [3]'पञ्चमे च तथा भागे संविभागो यथार्हतः । पितृदेवमनुष्याणां कीटानां चोप-दिश्यते ॥' इति ।

श्राद्धदिने कालविशेषः — आहिताग्नेः पृथक् पाकेन महैकोद्दिष्ट-व्यतिरिक्तसर्वश्राद्धेभ्यः पूर्वमेव वैश्वदेवहोमः कर्तव्यः । तथा च शाकटायनः — 'श्राद्धात्प्रागेव कुर्वीत वैश्वदेवं तु साग्निकः । एका-दशाहिकं मुक्त्वा तत्र ह्यन्ते विधीयते ॥' इति । अनाहिताग्नेः काल-विशेषानाह सांख्यायनः परिशिष्टे — 'आदौ वृद्धौ क्षये चान्ते दर्शे मध्ये महालये । एकोद्दिष्टे निवृत्ते तु वैश्वदेवो विधीयते ॥' इति ॥

तस्याग्निमाह वसिष्ठः — [4]'सायंप्रातर्गृह्येऽग्नौ जुहुयात' इति । मनुरपि — [5]'वैवाहिकेऽग्नौ कुर्वीत गार्ह्यं कर्म यथाविधि । पञ्चयज्ञ-विधानं च पंक्तिं चान्वाहिकीं गृही ॥' आपस्तम्बोऽपि — [6]'औपासने पचने वा' इति । अग्न्यभावेऽनुकल्पः कूर्मपुराणे दर्शितः — [7]'शालाग्नौ लौकिके वाथ जले भूम्यामथापि वा । वैश्वदेवस्तु कर्तव्यो देवयज्ञः स वै स्मृतः ॥ यदि स्याल्लौकिके पाकस्ततोऽन्नं तत्र हूयते ।'

---

1. गृह्ये प्रथमाध्याये प्रथमखण्डे २ सूत्रं ।
2. प्रथमपटले ५ खण्डे १९ सूत्रं ।
3. द्वितीयाध्याये ४०, ४१ श्लोकयोः उत्तरपूर्वार्धे ।
4. एकादशाध्याये २ सूत्रैकदेशः ।
5. तृतीयेध्याये ६७ श्लोकः ।
6. द्वितियप्रश्ने २ पटले १६ सूत्रम् ।
7. उत्तरभागे १८ अध्याये ३ श्लोकः ४ श्लोकस्य पूर्वार्धं च ।

विधुरादेरनग्निकस्य विशेषमाह **वृद्धवसिष्ठः** — 'अनग्निकस्तु यो विप्रस्सोऽन्नं व्याहृतिभिः स्वयम् । हुत्वा शाकलतन्त्रैश्च शिष्टं काकबलिं हरेत् ॥ पूर्वयज्ञादृते नास्ति निरग्नेस्तु महामखः ।' इति व्याहृतिहोमात् काकबलिं आतिथ्यं च विनाऽन्यदनग्नेर्नास्तीत्यर्थः ।

अयं च वैश्वदेवो देवभूतपितृयज्ञात्मक इत्याह **व्यासः** — 'वैश्वदेवस्तु कर्तव्यो देवयज्ञस्स वै स्मृतः । देवेभ्यस्तु हुतादन्नाच्छेषाद्भूतबलिं हरेत् ॥ भूतयज्ञस्स वै ज्ञेयो भूतिदस्सर्वदेहिनाम् । श्राद्धं वा पितृयज्ञः स्यात्पैत्रो बलिरथापि वा ॥' **स्मृत्यर्थसारेऽपि** — 'देवयज्ञो वैश्वदेवाख्यं कर्म । हुतशेषेण शुद्धं देशमभ्युक्ष्य बलिं हरेत् । एष भूतयज्ञः । बलिशेषं सोदकं स्वधा पितृभ्यः इति प्राचीनावीती पितृभ्यो दद्यात् । एष पितृयज्ञः । एते देवयज्ञभूतयज्ञपितृयज्ञाः वैश्वदेवशब्दार्थः ' इति । **मनुरपि**— [1]'विधाय पितृयज्ञान्तं वैश्वदेवं ततो बहिः । श्वपाकपतिताद्यर्थमन्नमल्पं क्षिपेद्बहिः ॥' एवञ्च वैश्वदेवबलिहरणाभ्यां पृथक् देवपितृभूतयज्ञा नानुष्ठेयाः इति ॥

अन्ये तु पञ्चयज्ञानां पृथक्त्वेन विधानात् तेषां वैश्वदेवबलिहरणयोरनन्तर्भावमाहुः । तथा च **जमदग्निः** —'वैश्वदेवं दिवा रात्रौ कुर्याद्बलिहृतिस्तथा । महतः पंचयज्ञांस्तु दिवैवेत्याह गौतमः ॥' इति ।

बोधायनोऽपि -- [2]'अग्नये स्वाहेत्यादि षडाहुतीर्जुहोति । एष

---

1. तृतीयाध्याये ९२ श्लोकः इममाशयमाविष्करोति । अयं श्लोकस्तु न दृश्यते ।
2. बोधायनश्रौतसूत्रे ५ प्रश्ने ३ खण्डे वैश्वदेवहोमः, गृह्ये प्रथमप्रश्ने ८ अध्याये ३ सूत्रे वैश्वदेवाङ्गदेवताः फलं च कथ्यंते । सूत्राणि तु अन्यथैव भवन्ति । बोधायनधर्मसूत्रे २ प्रश्ने ११ खण्डे १-६ सूत्रेषु गृह्यसूत्रे २ प्रश्ने ४ अध्याये ८-१३ सूत्रेषु, २ प्रश्ने ८ अध्याये १४-२० सूत्रेषु, २ प्रश्ने ९ अध्याये ६-१६ सूत्रेषु च पञ्चमहायज्ञाः प्रतिपाद्यन्ते । सर्वत्र सूत्राण्यन्यथैव भवन्ति । अतो विषयसंग्रहात्मकान्येतानि वाक्यानीत्यवधेयम् ।

वैश्वदेवः संतिष्ठते । धर्माय स्वाहेत्यादि नमो रुद्रायेत्यन्तं बलीन् हरति । एतद्बलिहरणं संतिष्ठते । देवेभ्यः स्वाहेत्यग्नौ जुहोति एष देवयज्ञः संतिष्ठते । पितॄनुद्दिश्यैकं ब्राह्मणं भोजयेत् । अपि वा दक्षिणेनाग्निं दक्षिणाग्रान् सस्तीर्य तेषु पिण्डं ददाति पितृभ्यः स्वधास्त्विति । अपि वाप: तत्पितृयज्ञः संतिष्ठते । मनुष्ययज्ञार्थमतिथिं भोजयेत् । अपि वा हंतकारं विदुर्बुधाः ' इति ।

अयं च वैश्वदेवोऽन्नसंस्कारार्थ इति केचित् । तथा **चाश्वलायनः**- [1] 'सायंप्रातस्सिद्धस्य हविष्यस्य जुहुयात्' इति । **आपस्तम्बश्च** [2] 'यस्य चाग्नौ न क्रियते यस्य चाग्रं न दीयते न तद्भोक्तव्यमिति ।' **यमोपि**— 'होमाग्रदानरहितं न भोक्तव्यं कथञ्चन ॥' इति ॥

अन्ये तु वैश्वदेवस्यात्मसंस्कारार्थत्वमिच्छन्ति । तथा **चाश्वलायनः**— [3] 'तान्येतान्यहरहः कुर्वीत' इति । **आपस्तम्बोपि**— [4] 'देवेभ्यः स्वाहाकार आ काष्ठात् ।' इति । **बोधायनोपि**— [5] 'प्रवासं गच्छतो यस्य गृहे कर्ता न विद्यते । पञ्चानां महतामेष सह यज्ञैस्स गच्छति ॥' इति । **मनुरपि**— [6] 'महायज्ञैश्च यज्ञैश्च ब्राह्मीयं क्रियते तनुः ।' इति । **कात्यायनोपि**— [7] 'सायंप्रातर्वैश्वदेवः कर्तव्यो बलिकर्म च । अनश्नतापि सततमन्यथा किल्बिषी भवेत् ॥' इति ।

उभयार्थं वैश्वदेव इत्यपरे । तथा च स्मृत्यर्थसारे— 'वैश्वदेवाख्यं कर्म अन्नस्यात्मनश्च संस्कारार्थमिति' । **व्यासोपि**— 'गृहस्थो वैश्व-

---

1. प्रथमाध्याये २ खण्डे प्रथमसूत्रम् ।
2. द्वितीयप्रश्ने १५ पटले १३ सूत्रम् ।
3. तृतीयाध्याये द्वितीयखण्डे ४ सूत्रम् ।
4. प्रथमप्रश्ने १३ पटले प्रथमं सूत्रम् ।
5. गृह्यसूत्रे द्वितीयप्रश्ने ९ अध्याये १२ सूत्रं (श्लोकात्मकं) ।
6. द्वितीयाध्याये २८ श्लोकस्य उत्तरार्धं ।
7. त्रयोदशखण्डे १० श्लोकः ।

देवाख्यं कर्म प्रारभते दिवा । अन्नस्य चात्मनश्चैव संस्कारार्थं तदिष्यते ॥' इति ॥

तत्र नोभयसंस्कारार्थत्वपक्षः संभवति, विरोधात् । अन्नसंस्कारत्वपक्षे संस्कारभूतवैश्वदेवहोमं प्रति अवहननत्वादिकं प्रति व्रीहेरिव अन्नस्य प्राधान्यं वक्तव्यम् । पुरुषार्थत्वपक्षे च अग्निहोत्रादिवत् होमस्य प्राधान्यात् तत्साधनभूतस्यान्नस्य दध्यादिवदुपसर्जनत्वं; न हि तत्संभवति । गुणत्वप्रधानत्वोद्देश्यत्वोपादेयत्वविधेयत्वानुवाद्यत्वानां एकत्र समावेशप्रसङ्गात् । अत एव **नामधेयपादे** वाजपेयपदं गुणविधिर्नामधेयं वेति सन्दिह्य प्रवृत्तिविशेषकरत्वात् पयोन्नयवागूरूपगुणविधायकत्वमेव स्वीकर्तव्यमिति पूर्वपक्षं कृत्वा फलं स्वाराज्यं प्रति गुणत्वोपादेयत्वविधेयत्वानां यवागूं प्रति च प्रधानत्वानुवाद्यत्वोद्देश्यत्वानां परस्परविरुद्धानां कर्मणि समावेशप्रसङ्गात् वाजपेयपदं न यवागूद्रव्यलक्षणसाधनविधायकं; किन्तु कर्मनाम ।

न च विरोधान्नोभयसंस्कारता तर्हि अन्नसंस्कारपक्षोऽस्त्विति वाच्यम् । तथात्वे व्रीहियवादिनानाद्रव्याणां पृथक् पाके एकस्यापि द्रव्यस्य भाण्डभेदेन नानापाके संसृष्टानां भ्रातॄणां वा पृथक्पाके तत्तदन्नसंस्कारसिद्ध्यर्थं वैश्वदेवावृत्तिप्रसङ्गात् । न चेष्टापत्तिः, असकृच्चेदेकस्मिन् काले सिद्धे सकृदेव कुर्यात् । बहुधा चेद्यत् गृहपतेरित्यादिवचनविरोधप्रसङ्गात् । तस्मात् आत्मसंस्कारार्थत्वमेव ॥

तथा च **गृह्यपरिशिष्टे**—'प्रोषितोऽप्यात्मसंस्कारं कुर्यादेवाविचारयन्' इति । **गोभिलोऽपि**—'यद्येकस्मिन् काले व्रीहियवौ पच्येयातां अन्यतरस्य हुत्वा कृतं मन्येत । यद्येकस्मिन् काले पुनः पुनरन्नं पच्येत सकृदेव बलिं कुर्वीत । यद्येकस्मिन् काले बहुधान्नं पच्येत गृहपतिमहानसादेवैनं बलिं कुर्वीत' । इति नानाद्रव्यकान्नपाके पुनः, पुनः पाकेऽविभक्तानां

भ्रात्रादीनां वा पृथक्पाके एकस्माद् गृहपतिपाकादेव होतव्यमित्यर्थः । तस्मादात्मसंस्कारार्थत्वमेव युक्तम् ॥

नन्वेवमन्नसंस्कारार्थत्वज्ञापकवचनानां का गतिः इति चेन्न । तेषामन्यथोपपत्तेः । तत्र प्रथमोदाहृतं 'सायं प्रातस्सिद्धस्य' इत्यादि **आश्वलायनवचनं** जुहुयादित्यनेन कर्मस्वरूपं इतरांशेन प्रयोगं च विदधाति । 'तान्येतान्यहरहः कुर्वीत' इति च तस्यैवाधिकारविधिः इत्युपपन्नम् ॥

यदपि च 'यस्याग्नौ न क्रियते' इत्याद्यापस्तम्बवचनं तद्बहुवचनविरोधात् भोज्यान्नेन होमं दानं च कुर्यात् इत्येतत्परतया **चन्द्रचूडेन** व्याख्यातम् । एवमेव होमान्नदानरहितमिति यमवचनमपि व्याख्येयम् । तथोभयसंस्कारत्वबोधकवचनमपि उभयसंस्कारसिद्ध्यर्थं न वैश्वदेवमनुष्ठापयति । तथा सति वैश्वदेवस्य प्रतिपाकमावृत्तिप्रतिषेधकवचनविरोधात । किन्तु आत्मसंस्कारार्थतया अनुष्ठितादेव वैश्वदेवहोमादन्नसंस्कारोपि अन्ननियमबलेन सिद्ध्यति इत्येतत्परम् । यथा 'प्रयाजशेषेण हवींष्यभिघारयति' इति प्रयाजशेषसंस्कारभूतं अभिघारणं हवीरूपाधारनियमात् हविस्संस्कारकमपीति । एवं च न कोपि विरोधः ॥

नन्वेवमपि वैश्वदेवहोमबलिहरणादीनां आपस्तम्बाश्वलायनादिसूत्रेषु उक्तानां सर्वशाखाप्रत्ययन्यायेन समुच्चित्यानुष्ठानं स्यादिति चेन्न । वचनबलेन व्यवस्थोपपत्तेः । तथा च व्यासः — 'वैश्वदेवं प्रकुर्वीत स्वशाखाविहितं तथा । यस्य यावत्स्वगृह्योक्तं स्वल्पं वा यदि वा बहु ॥ तस्य तावति शास्त्रार्थे कृते सर्वं कृतं भवेत् । ' इति ॥

वैश्वदेवाकरणे प्रत्यवायमाह वसिष्ठः — 'अकृत्वा वैश्वदेवं तु भुञ्जते ये द्विजाधमाः । स्वप्रधानान्नपाकेन काकयोनिं व्रजन्ति ते ॥ वैश्वदेवेन ये हीना आतिथ्येन बहिष्कृताः । सर्वे ते वृषला ज्ञेयाः प्राप्तवेदा अपि

द्विजाः ॥' इति । **भृगुः**—'पञ्चयज्ञांस्तु यो मोहान्न करोति गृहाश्रमी । तस्य नास्ति परो लोको लोके भवति निन्दितः ॥ अकृत्वा वैश्वदेवं तु भुञ्जते ये द्विजोत्तमाः । सर्वे ते निष्फला ज्ञेयाः पतिता नरकेऽशुचौ ॥' द्विजोत्तमा ब्राह्मणा इत्यर्थः ॥

कात्यायनः—[1]'सायंप्रातर्वैश्वदेवः कर्तव्यो बलिकर्म च । अनश्नतापि सततं अन्यथा किल्बिषी भवेत् ॥' इति । **प्रजापतिरपि** सूनादोषनिवर्तकतामाह—'वैश्वदेवबलिहृतिं प्रत्यहं गृहमेधिनः । सायंप्रातश्च कुर्वीरन् सूनादोषापनुत्तये ॥' **शातातपोपि**—'वैश्वदेवस्तु कर्तव्यः पंच-सूनापनुत्तये ।' इति ॥

सूनाः पञ्च दर्शयति **यमः**—'पञ्चसूना गृहस्थस्य वर्तन्तेऽह-रहस्सदा । खंडणी पेषणी चुल्ली जलकुंभ उपस्करः । एताभिर्वाहयन्विप्रः बध्यते वै मुहुर्मुहुः ॥ एतासां पावनार्थाय पञ्चयज्ञाः प्रकल्पिताः ॥' इति । **आपस्तम्बस्तु** फलान्तरमाह—'[2]यदशनीयं तस्य होमा बलयश्च स्वर्ग-पुष्टिसंयुक्ताः' इति । **हारीतोपि**—'यद्देवेभ्यो जुहोति देवलोकं तेनाभि-जयति । यत्पितृभ्यः पितृलोकं तेन । यत्स्वाध्यायमधीते ऋषिलोकं तेन । यद्भूतेभ्यो बलिं हरति भूतं लोकं तेन । यद्ब्राह्मणं तर्पयति मनुष्यलोकं तेन जयतीति ॥'

भृगुरपि—'यत्फलं सोमयागेन प्राप्नोति धनवान्द्विजः । सम्यक् पञ्चमहायज्ञैर्दरिद्रस्तदवाप्नुयात् ॥' इति ॥ **बोधायनोपि**—[3]'देवानां देवयज्ञेन द्विजा गच्छन्ति साम्यताम् । पितॄणां पितृयज्ञेन भूतयज्ञेन

---

1. त्रयोदशखण्डे १० श्लोकः ।
2. द्वितीयप्रश्ने २ पटले १२ सूत्रम् ।
3. बोधायनगृह्यसूत्रे २ प्रश्ने ९ अध्याये १४—१६ सूत्राणि श्लोकात्मकानि ।

भूतिनः । मनोर्मनुष्ययज्ञेन ब्रह्मयज्ञेन ब्राह्मणः ॥ एतासां साम्यतां गत्वा देवतानां शतं समाः । आनन्दं ब्रह्म गच्छन्ति शिवं शाश्वतमव्ययम् ॥'

एतादृशवैश्वदेवाद्यकरणे प्रत्यवायमभिप्रेत्यैव भगवानगस्त्यः 'अन्यथा खलु काकुत्स्थ तपस्वी समुदाचरन् । दुस्साक्षीव परे लोके स्वानि मांसानि भक्षयेत् ॥' इति रामं प्रत्युक्तवान् । एवञ्च वने संप्राप्तं रामं वनस्थोऽगस्त्यः अतिथिधर्मेण पूजितवानिति युक्तम् । अत एव 'राजा सर्वस्य लोकस्य धर्मिष्ठश्च महारथः । पूजनीयश्च मान्यश्च भवान्प्राप्तः प्रिया. तिथिः' ॥ इत्यग्रिमं महर्षिवचनमपि सङ्गच्छते ॥

प्रथमं चोपविश्याथ धर्मज्ञो मुनिपुङ्गवः ।
उवाच राममासीनं प्राञ्जलिं धर्मकोविदम् ॥ २७ ॥
अन्यथा खलु काकुत्स्थ तपस्वी समुदाचरन् ।
दुस्साक्षीव परे लोके स्वानि मांसानि भक्षयेत् ॥ २८ ॥
राजा सर्वस्य लोकस्य धर्मचारी महारथः ।
पूजनीयश्च मान्यश्च भवान्प्राप्तः प्रियातिथिः ॥ २९ ॥

अत्र अन्नपानादिकमप्रदाय स्वयमेव भक्षणे कालान्तरे स्वमांसभक्षणमेव प्राप्नोतीत्युक्तम् । तथा च **यमः**—'अहुताग्निमसन्तर्प्य तपस्विनमुपागतम् । अशित्वा तु परे लोके स्वानि मांसानि खादते' ॥ इति ।

उत्तरकाण्डे श्वेतं प्रति ब्रह्मवचनं—[1] 'स्वादूनि स्वानि मांसानि तानि भक्षय नित्यशः । स्वशरीरं त्वया जुष्टं कुर्वता तप उत्तमम् ॥ अनुप्तं रोहते श्वेत न कदाचिन्महामते । दत्तं न तेऽस्ति सूक्ष्मोपि तप एव निषेवसे ॥ तेन स्वर्गगतो वत्स बाध्यसे क्षुत्पिपासया । स त्वं सुपुष्ट-

---

1. उत्तरकाण्डे ७८ सर्गे १४ उत्तरार्धं १५ श्लोकः १६ श्लोकस्य पूर्वार्धम् १७ श्लोकस्य उत्तरार्धं १८ श्लोकश्च ।

माहारैः स्वशरीरमनुत्तमम् ॥ भक्षयस्वामृतरसं तेन तृप्तिर्भविष्यति ।' इति ॥

एवमुक्त्वा फलमूलैः पुष्पैरन्यैश्च राघवम् ।
पूजयित्वा यथाकामं पुनरेव ततोऽब्रवीत् ॥ ३० ॥

तदनु च स मुनिर्निखिलदानवनिषूदनाय कृतोद्योगस्य विष्णोरुपकरणभूतं विश्वकर्मनिर्मितं कार्मुकं ब्रह्मदत्तं शरोत्तमं हेमपरिष्कृतं खड्गं अक्षय्ये चेषुधी भवते दातव्यमिति शक्रेण मयि निहितं,

जयाय प्रतिगृह्णीष्व वज्रं वज्रधरो यथा ॥ ३५ ॥

इत्यभिधानपूर्वकं रामभद्राय प्रदाय पुनरपि राममेवमवादीत् । मामभिवादयितुमागतो भवानित्येतावतैव परितुष्टोऽस्मि । त्वत्स्नेहपारवश्येन सुकुमारी जनकतनया प्राज्यदोषं वनं संप्राप्तेति तदत्यतिदुष्करमिति मे प्रतिभाति ।

एषा हि प्रकृतिः स्त्रीणामासृष्टे रघुनन्दन ।
समस्थमनुरज्जन्ति विषमस्थं त्यजन्ति च ॥५ ॥

शतह्रदानां लोलत्वं शस्त्राणां तीक्ष्णतां तथा ।
गरुडानिलयोः शैघ्र्यमनुगच्छन्ति योषितः ॥ ६ ॥

अनेन स्त्रीणामुत्पत्तिप्रभृति स्वाभाविकमेव सकलदोषाकरत्वमित्युक्तम् । एतच्च प्राक् प्रपञ्चितम् ।

इयं तु भवतो भार्या दोषैरेतैर्विवर्जिता ।
श्लाघ्या च व्यपदेश्या च यथा देवी त्वरुन्धती ॥ ७ ॥

तदनया लक्ष्मणेन च सुखं स्वपिहि । अत्रारुन्धत्याः पतिव्रतानां मध्ये श्रैष्ठ्यं सूचितम् । सप्तर्षिभिः क्रियमाणे यज्ञे सप्तर्षिपत्नीनामवलोकनेन मदनज्वरार्दितं अलभ्यास्ता इति खेदेन वनं प्रविष्टमग्निं समाधातुं स्वयमेव तत्तदृषिपत्नीवेषं गृह्णन्त्यास्तस्या अपि स्वाहादेव्याः

अननुकरणीयं अरुन्धतीरूपं पातिव्रत्यात् भर्तृशुश्रूषणाच्चाभूदिति प्रतिपादितं वनपर्वण्याङ्गिरसे — [1] 'सप्तानामपि सा देवी सप्तर्षीणां महात्मनाम् । पत्नीसरूपतां कृत्वा कामयामास पावकम् । दिव्यं रूपमरुन्धत्याः कर्तुं न शकितं तया । तस्यास्तपःप्रभावेन भर्तृशुश्रूषणेन च ॥' इति ॥

प्रभाते समागतेन रामभद्रेण,

धन्योस्म्यनुगृहीतोस्मि यस्य मे मुनिपुंगव ।
गुणैः सभ्रातृभार्यस्य वरदः परितुष्यसि ॥

इत्यभिधाय सोदकं रम्यतरमाश्रमप्रदेशं पृष्टो महर्षिः मुहूर्तमभिध्याय गोदावर्याः समीपे बहुमूलफलः पंचवटीति विख्यातो रम्यो वनोद्देशः । तत्र पर्णकुटीं निर्माय सौमित्रिणा सह पितुर्दशरथस्य वचनं पालयन् रमस्व । भवदागमनवृत्तान्तश्च सर्वोपि तपःप्रभावेन दशरथस्नेहाच्चावगतः । तदधुनैव मधूकवनस्योत्तरतः न्यग्रोधमधिगम्य पर्वतस्याविदूरे स्थितां पंचवटीं गच्छ । तत्र वसता भवतैव निखिलमुनिजनरक्षणं भवेदित्यवदत् ॥

इति द्वादशत्रयोदशौ सर्गौ ॥

अथ चतुर्दशः सर्गः ।

चतुर्दशे — ततो गृहीतचापो दाशरथिरभिवाद्य महर्षिं तदुपदिष्टेन मार्गेण पञ्चवटीं सीतया सह गच्छन् मध्ये महान्तं न्यग्रोधतरुमध्यासीनं गृध्रराजं महाकायमवलोक्य राक्षसं मन्वानः 'को भवान्, किं वा तव नाम, कुलं वा किं?' इत्यपृच्छत् । द्विजराजोपि 'वत्स, राम, पितुर्वयस्यं मां विद्धीत्यभिधाय सर्वभूतसमुद्भवप्रतिपादनपूर्वकम् ,

---

1. २२५ अध्याये १३ श्लोकस्य उत्तरार्धं १४ श्लोकः १५ श्लोकस्य पूर्वार्धं च ।

द्वौ पुत्रौ विनतायास्तु गरुडोऽरुण एव च ।
तस्माज्जातोऽहमरुणात् संपातिश्च ममाग्रजः ॥
जटायुरिति मां विद्धि श्येनीपुत्रमरिन्दम ॥ ३३ ॥
सोऽहं वत्स सहायस्ते भविष्यामि यदीच्छसि ।
सीतां च तात रक्षिष्ये त्वयि याते सलक्ष्मणे ॥ ३४ ॥

इत्याचचक्षे । रामोपि जटायुषं पितृसखमभिनन्द्य तेन च पतगराजेन सहैव सीतामादाय पञ्चवटीं जगाम ॥

इति चतुर्दशः सर्गः ॥

अथ पञ्चदशः सर्गः ॥

पञ्चदशे — अथ यथाकथितं पञ्चवटीनिकटमागत्य सर्वतो दिक्षु चक्षुर्विक्षिपन् रामः सौमित्रिमिदमवोचत् —

वनरामण्यकं यत्र जलरामण्यकं तथा ।
सन्निकृष्टं च यस्मिन्नः समित्पुष्पकुशोदकम् ॥ ५ ॥

तादृशोऽस्माकं वासाय देशो दृश्यतामिति । लक्ष्मणोपि तद्वचनमाकर्ण्य,

परवानस्मि काकुत्स्थ त्वयि वर्षशतं स्थिते ।
स्वयं तु रुचिरे देशे क्रियतामिति मां वद ॥ ७ ॥

इत्यब्रवीत् । अनेन पितुरनन्तरं यावज्ज्येष्ठो जीवति तावत् कनिष्ठस्य न स्वातन्त्र्यमिति सूचितम् । तथा च मनुः—[1] 'पितेव पालयेत्पुत्रान् ज्येष्ठभ्राता यवीयसः । पुत्रवच्चापि वर्तेरन् ज्येष्ठे भ्रातरि धर्मतः ॥' इति ।

---

1. नवमाध्याये १०८ श्लोकः ।

विमृशन् रोचयामास देशं सर्वगुणान्वितम् ॥ ८ ॥

इदं पुण्यमिदं मेध्यं इदं बहुमृगद्विजम् ।
इह वत्स्यामि सौमित्रे सार्धमेतेन पक्षिणा ॥ १८ ॥

एवमुक्तस्तु रामेण लक्ष्मणः परवीरहा ।
अचिरेणाश्रमं भ्रातुश्चकार सुमहाबलः ॥ १९ ॥

ततः पुष्पबलिं कृत्वा शान्तिश्च स यथाविधि ॥ २३½ ॥

लक्ष्मणेन प्रदर्शितां पर्णशालामवलोक्य जनितानन्दो रामचन्द्रः तमतिगाढमालिङ्ग्य एवमवादीत् —

प्रीतोऽस्मि ते महत्कर्म त्वया कृतमिदं प्रभो ।
प्रदेयो यन्निमित्तं ते परिष्वङ्गो मया कृतः ॥ २७ ॥

अनेन सन्तोषाधायकं कर्म कुर्वते पारितोषिकं देयम् । तच्च प्राक् प्रपञ्चितम् ॥

भावज्ञेन कृतज्ञेन धर्मज्ञेन च लक्ष्मण ।
त्वया पुत्रेण धर्मात्मा न संवृत्तः पिता मम ॥ २८ ॥

अनेन मृतोपि पिता धार्मिकेण पुत्रेणामृत इति सूचितम् । तथा च **वाजसनेयिब्राह्मणं** —[1] 'स पुत्रेणैवास्मिन् लोके प्रतितिष्ठति' इति । स च पिता स्वयं मृतोपि धार्मिकस्य पुत्रस्य शरीरेणैव अस्मिन् लोके यथाशास्त्रं कर्म कुर्वन् तिष्ठतीत्यर्थः । इदं च प्राक् प्रपञ्चितम् । इत्यभिधाय रमणीये तदाश्रमे लक्ष्मणेन सीतया च अन्वास्यमानः कञ्चित्कालं सुखमुवास ॥

इति पञ्चदशः सर्गः ॥

---

1. बृहदारण्यके प्रथमाध्याये ५ ब्राह्मणे १७ ऋक् ।

अथ षोडशः सर्गः ॥

षोडशे— एवमनेकदिवसमतिसुखमधिवसतो रघुकुलतिलकस्य क्रमेण शरदपगमे संप्राप्ते हेमन्तसमये कदाचित् प्रभातायां शर्वर्यां नियमाभिषेकार्थं सीतया सह गोदावरीं प्रस्थितं रामभद्रमनुव्रजन् विनयावनतः कलशहस्तः सौमित्रिरेवमभाषत—

अयं स कालः संप्राप्तः प्रियो यस्ते प्रियंवद ।
अलङ्कृत इवाभाति येन संवत्सरः शुभः ॥ ४ ॥

अनेन हेमन्तस्य संवत्सरालङ्कारत्वमुक्तम् । तच्च संवत्सरकर्तव्यदेवपितृमनुष्यपूजोपयोगिव्रीह्यादिधान्यसमृद्धिकालत्वेन देवतानामहर्भूतोत्तरायणमुखत्वेन मनुष्याणां सौहित्यातिशयकरत्वेन राज्ञां विजययात्राकालत्वेन च द्रष्टव्यम् । एतदेव महर्षिणा 'प्राज्यकामा जनपदाः' इत्यादिभिः प्रपञ्चितम् ॥

हेमन्ते धान्यादिसमृद्धिः **भारते उद्योगपर्वणि**—[1] 'सर्वसस्या हि पृथिवी भवत्यन्नवती सदा । सौम्योऽयं वर्तते मासः सुप्रापयवसेन्धनः । सर्वौषधिवनस्फीतः फलवानल्पमक्षिकः ॥' इति । देवानामुदगयनमहर्भूतं इत्यत्र **मनुः**—[2] 'दैवे रात्र्यहनी वर्षं प्रविभागस्तयोः पुनः । अहस्तत्रोदगयनं रात्रिः स्याद्दक्षिणायनम् ॥' इति । एवंरूपोत्तरायणमुखत्वं च मार्गशीर्षमासेऽयनप्रवृत्त्या द्रष्टव्यम् ॥

हेमन्तस्य मनुष्यसुखकरत्वे च **वाग्भटः** —[3] 'बलिनः शीतसंरोधात्

---

1. १४२ अध्याये १६, १७ श्लोकयोः उत्तरपूर्वार्धात्मकः 'सौम्योयं' इत्यादिकः एक एव श्लोको वर्तते । 'सर्वसस्या' इत्यादिश्लोकार्धं तु न दृश्यते मुद्रिते पुस्तके । 2. प्रथमाध्याये ६७ श्लोकः ।
3. अष्टाङ्गहृदये तृतीयाध्याये ७ श्लोकस्य उत्तरार्धं ८ श्लोकः, ९ श्लोकस्य उत्तरार्धमारभ्य १४ श्लोकस्य पूर्वार्धान्तं, १५ श्लोकः, सप्तमेऽध्याये ७२, ७३ श्लोकौ च ।

हेमन्ते प्रबलोऽनलः ॥ भवत्यल्पेन्धनो धातून् स पचेद्वायुनेरितः । अतो हिमेऽस्मिन् सेवेत स्वाद्वम्ललवणान्रसान् ॥ दैर्घ्यान्निशानामेतर्हि प्रातरेव बुभुक्षितः ॥ कुङ्कुमेन सदर्पेण प्रदिग्धोऽगरुधूपितः । रसान् स्निग्धान् फलं पुष्पं गन्धमच्छरसां सुराम् ॥ गोधूमपिष्टमांसेक्षुक्षीरोत्थविकृतीः शुभाः । प्रावाराजिनकौशेयप्रवेणिकोथुपास्तृतम् ॥ उष्णस्वभावैर्लघुभिः प्रावृतः शयनं भजेत् । पीवरोरुस्तनश्रोण्यः समदाः प्रमदाः प्रियाः ॥ हरन्ते शीत-मुष्णाङ्ग्यः धूपकुङ्कुमयौवनैः । त्र्यहाद्वसन्तशरदोः पक्षाद्वृष्टिनिदाघयोः ॥ सेवेत कामतः कामोः दृप्तो वाजीकृतो हिमे । श्रमः क्रमोरुदौर्बल्यबल-पुष्टीन्द्रियक्रियाः । अपर्वमरणं च स्यादन्यथा गच्छतः स्त्रियम् ॥' इति ॥

हेमन्तस्य युद्धयात्रायां प्राशस्त्यं च **मानवे**— [1] 'मार्गशीर्षे शुभे मासि यायाद्यात्रां महीपतिः । फाल्गुनं वापि चैत्रं वा मासौ प्रति यथाबलम् ॥' इति ॥

शान्तिपर्वणि राजधर्मेऽपि— [2] 'चैत्रे वा मार्गशीर्षे वा सेनायोगः प्रशस्यते । सर्वसस्या हि पृथिवी भवत्यन्नवती (म्बुमती) सदा ॥ नैवाति-शीतो नात्युष्णः कालो भवति भारत । तस्मात्तदा योधयेत परेषां व्यसनेषु च ॥' इति ॥

उद्योगपर्वणि कर्णं प्रति कृष्णवचनेऽपि — [3] 'ब्रूयाः कर्ण इतो गत्वा द्रोणं शान्तनवं कृपम् । सौम्योऽयं वर्तते मासः सुप्रापयवसेन्धनः ॥ सर्वौषधिवनस्फीतः फलवानल्पमाक्षिकः । निष्पङ्को रसवत्तोयो नात्युष्ण-शिशिरः सुखः ॥ सप्तमाच्चापि दिवसात् अमावास्या भविष्यति । संग्रामो युज्यतां तस्यां तां ह्याहुः शक्रदेवताम् ॥ तदा राज्ञो वदेत्सर्वान्ये युद्धा-याभ्युपागताः । यद्वो मनीषितं तद्वै तदा संपादयामि वः ॥' इति ।

---

1. सप्तमाध्याये १८२ श्लोकस्य पूर्वार्धम् ।
2. १०० अध्याये १०, ११ श्लोकौ ।
3. १४२ अध्याये १६–१९ श्लोकाः ।

'मासानां मार्गशीर्षोस्मि' इति गीतावचनाच्च मार्गशीर्षमासस्य श्रेष्ठत्वमिति ॥

नवाग्रयणपूजाभिरभ्यर्च्य पितृदेवताः ।
कृताग्रयणकाः काले सन्तो विगतकल्मषाः ॥ ६ ॥

अत्र हेमन्तकालवर्णनसमये, 'अभ्यर्च्य पितृदेवताः', 'कृताग्रयणकाः' 'इत्यादि आग्रयणस्यातीतत्वप्रतिपादनं शरदि कर्तव्याग्रयणस्यानुवादः । एकजातीयस्य पुनः पुनर्धान्यस्यागमेपि आग्रयणस्यावृत्तिर्न कर्तव्या । किन्तु व्रीहियवादीनां सजातीयस्य प्रथमागमकाले कर्तव्यमित्येतदभिप्रायकम् । तथा चापस्तम्बः — 'नानिष्ट्वाग्रायणेनाहिताग्निर्नवस्याश्नीयाद्व्रीहीणां यवानां श्यामाकानां इत्यग्रपाकस्य यजेत' इति ॥

अग्रे प्रथमं अयनं देवानां पितॄणां हविःप्रापणमस्मिन्निति व्युत्पत्त्या आग्रयणं कर्म । तत्र 'नवाग्रयणपूजाभिरभ्यर्च्य पितृदेवताः' इत्यनेन पित्र्यमाग्रयणं श्राद्धरूपमुक्तम् । तथा च विष्णुपुराणे — [1] 'नक्षत्रग्रहपीडासु दुष्टस्वप्नावलोकने । इच्छाश्राद्धानि कुर्वीत नवसस्यागमे तथा ॥' इति । स्मृत्यन्तरेपि — 'मन्वादिषु मृताहे च अष्टकादिषु सत्तम । नवधान्ये समायाते गृही श्राद्धं समाचरेत् ॥' इति । वृद्धपराशरोपि — [2] 'श्राद्धं वृद्धावचन्द्रेभच्छायाग्रहणसंक्रमे । नवोदके नवान्ये(न्ने) च नवच्छन्ने तथा गृहे ॥' इति ॥

'कृताग्रयणकाः' इत्यनेन देवानामाग्रयणमुक्तम् । तत्कर्तव्यतामाहापस्तम्बः — 'नानिष्ट्वाग्रायणेनाहिताग्निर्नवस्याश्नीयात् व्रीहीणां यवानां श्यामाकानां इत्यग्रपाकस्य यजेत' इति । तस्य कालमाह स एव — 'वर्षासु श्यामाकैर्यजेत । शरदि व्रीहिभिः वसन्ते यवैः यथर्तु वेणुयवैः'

---

1. तृतीयांशे १४ अध्याये ६ श्लोकः ।
2. सप्तमाध्याये १, ४ श्लोकयोः पूर्वार्धे ।

इति । **आश्वलायनस्त्वाह** —[1] 'आग्रयणं व्रीहिश्यामाकयवानां सस्य नाश्नीयात् । अग्निहोत्रमहुत्वा यदा वर्षस्य तृप्तः स्यादथाग्रयणेन यजेत । अपि देवा आदुस्तृप्तो नूनं वर्षस्याग्रयणेन हि यजते' इति । **मनुरपि** —[2] 'सस्यान्ते नवसस्येष्ट्या तथर्त्वन्ते द्विजोऽध्वरैः । पशुना ह्ययनान्ते तु समान्ते सौमिकैर्मखैः ॥' इति ।

आग्रयणाकरणे प्रत्यवायमाह **आपस्तंबः** — 'आनीतो वा एष देवानां य आहिताग्निः । अदन्त्यस्य देवानां अन्नं यदकृत्वाग्रयणं नवस्याश्नीयात् । देवेभ्यो भागं प्रतिकॢप्तं अद्यादार्तिमार्छेत्' इति । **मनुरपि** —[3] 'नानिष्ट्वा नवसस्येष्ट्या पशुना वाग्निमान् द्विजः । नवान्नमद्यान्मासं वा दीर्घमायुर्जिजीविषुः ॥ नवेनानर्चिता ह्यस्य पशुहव्येन वाग्नयः । प्राणानेवात्तुमिच्छन्ति नवान्नामिषगर्द्धिनः ॥' इति

आग्रयणाकरणे प्रायश्चित्तं च वैश्वानरेष्टिं प्रकृत्याहा**पस्तम्बः** — 'एतामेव निर्वपेद्यदकृत्वाग्रयणं नवस्याश्नीयात्' इति । आग्रयणानुकल्प**माहापस्तम्बः** — 'अपि वामावास्यायां पौर्णमास्यां वा आग्रयणेष्टिमन्वायातयेत् । अपि वा अमावास्यां पौर्णमासीं वा नवैर्यजेत । अपि वा अग्निहोत्रं व्रीहिस्तंबं, यवस्तंबं वा ग्रासयित्वा तस्याः पयसा सायंप्रातर्जुहुयात् । अपि वा नवानां गार्हपत्ये स्थालीपाकं श्रपयित्वा आहवनीये जुहुयात् आग्रयणदेवताभ्यः स्विष्टकृच्चतुर्थीभ्यः । अपि वा नवानां चतुश्शरावमोदनं पक्त्वा चतुरो ब्राह्मणान् भोजयेत् इति ॥'

आश्वलायनोपि—[4] 'अग्निहोत्रीं वै नानादायित्वा तस्याः पयसा जुहुयात्' इति । इदं चाग्रयणमनाहिताग्निनापि कर्तव्यम् । तथा **चाप-**

1. आश्वलायनश्रौतसूत्रे २ अध्याये ९ खण्डे १—४ सूत्राणि ।
2. चतुर्थाध्याये २६ श्लोकः ।
3. चतुर्थाध्याये २७, २८ श्लोकौ ।
4. आश्वलायनश्रौतसूत्रे २ अध्याये ९ खण्डे ४ सूत्रस्य भागः ।

स्तम्बः-- '[1] अनाहिताग्नेराग्रयणं नवानां स्थालीपाकं श्रपयित्वा आग्रयणदेवताभ्यः स्विष्टकृच्चतुर्थाभ्यो हुत्वा तण्डुलानां मुखं पूरयित्वांगीर्त्वा?चम्य वोदनपिण्डं संवृत्योत्तरेण यजुषागारस्तूप उद्विद्धेत्' इति ॥

बोधायनश्च—[2] 'कथमु खल्वनाहिताग्नेराग्रयणं भवति इति। अनिरुप्तं स्थालीपाके श्रपयित्वाऽग्निमुपसमाधाय संपरिस्तीर्याघारावाघार्याज्यभागौ हुत्वा आग्रयणदेवताभ्यस्स्विष्टकृच्चतुर्थाभ्यो जुहुयात्। कामं पुरस्तास्स्विष्टकृतः अज्यानिरुपजुहुयात्। तस्यैतेनैव मन्त्रेण प्राश्नीयात्—[3] 'भद्रान्नः श्रेयः समनैष्ट देवाः' इति। अपि वा श्रुतवतो ब्राह्मणस्य हुतोच्छेषेणालिप्सेतेति समानः प्राशनमन्त्रः' इति। स एवान्यत्र—'अथ व्रीहिभ्यो यवेभ्यश्च नवानामनिरुप्तं स्थालीपाकं श्रपयित्वा अग्निमुपसमाधाय संपरिस्तीर्य आघारावाघार्य, आज्यभागाविष्ट्वा आग्रयणदेवेभ्यः स्विष्टकृच्चतुर्थेभ्यो जुहुयात्। पुरस्तात्स्विष्टकृतोऽज्यानीरुपजुहुयात्। प्रसिद्धौ प्राशनमन्त्रौ। वैश्वदेवं कृत्वा ब्राह्मणेभ्यो दत्वा प्राशनमेव तेन सर्वासामोषधीनां आग्रयणं व्याख्यातम्। अन्यत्र श्यामाकवेणुयवानां वैश्वदेवो वा। समानौ प्राशनमन्त्रौ। अथ फलानां, मूलानां, भक्ष्याणां ब्राह्मणेभ्यो दत्वा प्राशनमेव। एवमेव पुष्पाणां अन्येषां च नवानां ब्राह्मणेभ्यो दत्वोपयोगः' इति। इति देवानामाग्रयणम् ॥

तदनुष्ठानेनाकरणप्रयुक्तप्रत्यवायपरिहारः, [4] 'तैर्दत्तानप्रदायैभ्यो यो भुङ्क्ते स्तेन एव सः। यज्ञशिष्टाशिनस्सन्तो मुच्यन्ते सर्वकिल्बिषैः॥' इति गीतावचनादवगतम्। नित्यकर्मणां पापक्षयहेतुत्वं चाभिप्रेत्य 'कृताग्रयणकाः

---

1. आपस्तम्बगृह्यसूत्रे नवमखण्डे।
2. गृह्यशेषे ४ प्रश्ने ९ अध्याये १, ८ सूत्रात्मकं वाक्यद्वयमुपलभ्यते।
3. तैत्तिरीयसंहितायां ५ काण्डे ७ प्रश्ने २ अनुवाकान्ते।
4. भगवद्गीतायां तृतीयेध्याये १२, १३ श्लोकयोः उत्तरपूर्वार्धे।

काले सन्तो विगतकलमषाः' इत्युक्तम् । एवं हेमन्तकाले कर्तव्यानि प्रत्यवरोहणाष्टकाश्राद्धादीनि गृह्येषु प्रसिद्धानि ॥

प्राज्यकामा जनपदाः संपन्नतरगोरसाः ।
विचरन्ति महीपाला यात्रास्था विजिगीषवः ॥ ७ ॥

अनेन हेमन्तकालो राज्ञां विजयाय यात्राकाल इति सूचितम् । तथा च **राजधर्मे** — [1]'चैत्र्यां वा मार्गशीर्ष्यां वा सेनायोगः प्रशस्यते । सर्वसस्या हि पृथिवी भवत्यन्नवती तदा ॥ नैवातिशीतो नात्युष्णः कालो भवति भारत । तस्मात्तदा योधयीत परेषां व्यसनेषु च ॥' इति ॥

सेवमाने दृढं सूर्ये दिशमन्तकसेविताम् ।
विहीनतिलकेव स्त्री नोत्तरा दिक्प्रकाशते ॥ ८ ॥

अत्र दिङ्नायकस्य दिनमणेरन्तकदेशगमनं प्रत्युक्ततया उत्तरदिग्रूपायाः नायिकायाः विहीनतिलकत्वप्रतिपादनेन तिलकाद्यभावो विधवाया लक्षणं, तिलकादिमत्वं सुवासिनीनां लक्षणमिति सूचितम् । तथा च **वसिष्ठसंहितायां** — 'करमूले कण्ठमूले काचाभरणवर्जिता । सा नारी विधवा ज्ञेया जन्मजन्मान्तरेष्वपि ॥' इति । अत्र काचाद्यभावत्वप्रतिपादनं वक्ष्यमाणसुमङ्गलीचिह्नभूततिलकाद्यभावस्यापि उपलक्षणम् ॥

व्यासोपि — 'हरिद्रां कुङ्कुमं चैव सिन्दूरं कज्जलं तथा । कूर्पासकं च ताम्बूलं मङ्गल्याभरणं शुभम् ॥ केशसंस्कारकबरीकरकर्णविभूषणम् । भर्तुरायुष्यमिच्छन्ती दूषयेन्न पतिव्रता ॥' इति । **वसिष्ठसंहितायामपि** — 'कञ्चुकं कण्ठसूत्रञ्च कर्णपत्रे तथाञ्जनम् । काचकाभरणं चैव पादनासाविभूषणम् ॥ ताम्बूलादीनि लक्ष्माणि प्रोच्यन्ते पुण्ययोषिताम् । मणिबन्धे च कण्ठे च काचकाभरणैर्युता ॥ सा नारी पुण्य-

---

1. १०० अध्याये १०, ११ श्लोकौ ।

चरिता तस्याः पाकः शुचिः स्मृतः ।' इति । कञ्चुकाधारणस्यापवादमाह- 'कञ्चुकेन समं नारी भर्तुः सङ्गं समाचरेत् । त्रिभिर्वर्षैश्च मध्ये वा विधवा भवति ध्रुवम् ॥' इति । कुङ्कुमादिधारणं रतिसमयेऽत्याव-श्यकमाह संग्रहकारः --'कुङ्कुमं चाञ्जनं चैव तथा हारिद्रचन्दने । धौतवस्त्रञ्च तांबूलं संयोगेषु शुभावहम् ॥' इति ॥

प्रकृत्या हिमकोशाढ्यो दूरसूर्यश्च सांप्रतम् ।
यथार्थनामा सुव्यक्तं हिमवान् हिमवान् गिरिः ॥ ९ ॥

अत्यन्तसुखसञ्चारा मध्याह्ने स्पर्शन(त)स्सुखः(खाः) ।
दिवसाः सुभगादित्याः छायासलिलदुर्भगाः ॥ १० ॥

मृदुसूर्यास्सनीहाराः पटुशीताः समारुताः ।
शून्यारण्या हिमध्वस्ता दिवसा भान्ति सांप्रतम् ॥ ११ ॥

रविसंक्रान्तसौभाग्यः तुषारारुणमण्डलः ।
निःश्वासांध इवादर्शश्चन्द्रमा न प्रकाशते ॥ १३ ॥

बाष्पच्छन्नान्यरण्यानि यवगोधूमवन्ति च ।
शोभन्तेऽभ्युदिते सूर्ये नदद्भिः क्रौञ्चसारसैः ॥ १६ ॥

खर्जूरपुष्पाकृतिभिः शिरोभिः पूर्णतण्डुलैः ।
शोभन्ते किञ्चिदानम्राः शालयः कनकप्रभाः ॥ १७ ॥

अग्राह्यवीर्यः पूर्वाह्णे मध्याह्ने स्पर्शतस्सुखः ।
संरक्तः किञ्चिदापाण्डुरातपः शोभते क्षितौ ॥ १९ ॥

स्पृशंस्तु विमलं शीतमुदकं द्विरदस्सुखम् ।
अत्यन्ततृषितो वन्यः प्रतिसंहरते करम् ॥ २१ ॥

एते हि समुपासीना विहगा जलचारिणः ।
नावगाहन्ति सलिलमप्रगल्भा इवाहवम् ॥ २२ ॥

अवश्यायतमोनद्धा नीहारतमसा वृताः ।
प्रसुप्ता इव लक्ष्यन्ते विपुष्पा वनराजयः ॥ २३ ॥
बाष्पसंछन्नसलिला रुतविज्ञेयसारसाः ।
हिमार्द्रवालुकैस्तीरैः सरितो भान्ति सांप्रतम् ॥ २४ ॥
तुषारपतनाच्चैव मृदुत्वाद्भास्करस्य च ।
शैत्यादगाग्रस्थमपि प्रायेण रसवज्जलम् ॥ २५ ॥
जराजर्झरितैः पर्णैः(त्रैः) शीर्णकेसरकर्णिकैः ।
नालशेषैर्हिमध्वस्तैः न भान्ति कमलाकराः ॥ २६ ॥ इति ।

नन्वेभिः श्लोकैः हेमन्तर्तुस्वभाववर्णनं कृतम् । तदसङ्गतम् । धर्मनिरूपणाय प्रवृत्तेऽस्मिन् ग्रन्थे ऋतुवर्णनस्याप्रसक्तत्वात् । न च काव्यत्वात् ऋतुवर्णनमावश्यकमेवेति वाच्यम् । काव्यत्वाद्वाचनिकवृत्त्या ऋतुवर्णनस्योचितत्वेऽपि 'वेदोपबृंहणार्थाय' 'पुण्यं वेदैश्च संमितं' इत्यादिवचनपर्यालोचनयाऽवगतव्यङ्ग्यमर्यादया धर्मप्रतिपादनपरत्वमपि वक्तव्यम् । तत्तु न संभवति । हेमन्तर्तुवर्णनस्य धर्मोपयोगाभावात् । अतः कथमत्र ऋतुवर्णनमिति चेन्न । वेदोपबृंहणार्थं प्रवृत्तेऽस्मिन् ग्रन्थे वेदविहितकर्मापेक्षितकालविशेषनिर्णायकस्तत्कालसाधारणलक्षणप्रतिपादनमेव तत्तदृतुवर्णनव्याजेन कृतमिति धर्मोपयोगसंभवात् । यथा वेदाङ्गभूतज्योतिश्शास्त्रस्य वेदप्रतिपाद्यधर्मोपलक्षितकालसमर्पकत्वेन धर्मपर्यवसायित्वं तद्वत् ॥

शास्त्रस्य धर्मपर्यवसायित्वं च ज्योतिषिके — [1] 'वेदस्तावद्यज्ञकर्मप्रवृत्तः यज्ञाः प्रोक्तास्ते तु कालाश्रयेण । शास्त्रादस्मात् कालबोधो यतस्स्यात् वेदाङ्गत्वं ज्योतिषस्योक्तमस्मात् ॥' इति । अत एव 'कृताग्रयणकाः काले सन्तो विगतकल्मषाः ॥' [2] 'अयमध्यायसमयः

1. सर्वसिद्धान्तसारसमुच्चये ४ श्लोकः ।
2. २८ सर्गे ५४ श्लोके उत्तरार्धं ।

सामगानामुपस्थितः ॥' इत्यादितत्तदृतुविशेषकर्तव्यकर्मविशेषकथनं सङ्गच्छते। अन्यथा काव्यवर्णने प्रधाने आग्रयणादिकर्मविशेषकथनमुपपन्नं न स्यात्। तस्मात् कर्मापेक्षितकालज्ञापनार्थैव हेमन्तर्तुवर्णनत् ॥

एवमेव — [1] 'पाण्डरं गगनं दृष्ट्वा विमलं चन्द्रमण्डलम्। शारदीं रजनीं चैव दृष्ट्वा ज्योत्स्नानुलेपनाम् ॥ कामवृत्तं च सुग्रीवं नष्टान्तु जनकात्मजाम्। बुद्ध्वा कालमतीतं च मुमोह परमातुरः।' इति शरत्कालस्य वर्णनं। सीतागवेषणाय प्रस्थिता हनुमत्प्रमुखा वानराः स्वयंप्रभया गुहातो बहिर्निस्सारिताः [2] 'ततः पुष्पातिभाराग्रान् लताशतसमावृतान्। द्रुमान् वासन्तिकान् दृष्ट्वा बभूवुर्भयशंकिताः ॥ ते वसन्तमनुप्राप्तं प्रतिबुद्ध्वा परस्परम्। नष्टसन्देशकालार्था निपेतुर्धरणीतले ॥' इति वसन्तकालवर्णनं [3] 'अयं स कालस्संप्राप्तः समयोऽथ जलागमः। संपश्यध्वं नभो मेघैः संवृतं गिरिसन्निभैः ॥ वर्षोदकाप्यायितशाड्वलानि प्रवृत्तनृत्तोत्सवबर्हिणानि। वनानि निर्वृष्टबलाहकानि पश्यापराह्णेष्वधिकं विभान्ति ॥' इत्यादिवचनैः किष्किन्धाकाण्डे वर्षाकालवर्णनं [4] 'निलीयमानैर्विहगैर्निमीलद्भिश्च पङ्कजैः। विलसन्त्या च माल्या गतोऽस्तं ज्ञायते रविः ॥' इति सायङ्कालादिचिह्नप्रतिपादनमित्येतत्सर्वमपि कर्मानुष्ठानोपयुक्तकालज्ञापनार्थमेव कृतमिति धर्मपर्यवसानं संभवत्येव ॥

सायंप्रातःकालयोः कर्तव्यान्यग्निहोत्रादीनि। तथा च श्रुतिः — 'सायं जुहोति प्रातर्जुहोति' इत्यादि। आश्वलायनोऽपि — [5] 'अस्तमिते

---

1. किष्किन्धाकाण्डे ३० सर्गे २, ३, श्लोकौ।
2. किष्किन्धाकाण्डे ५३ सर्गे २०, २१ श्लोकौ।
3. किष्किन्धाकाण्डे २८ सर्गे २१, ५२ श्लोकाः।
4. किष्किन्धाकाण्डे २८ सर्गे ५२ श्लोकः।
5. आश्वलायनश्रौतसूत्रे २ अध्याये २ खण्डे ९ सूत्रं २ अध्याये ५ खण्डे २३, २४ सूत्रे च।

होमः । एवं प्रातरुपोदयं व्युषित उदिते वा' इति । एवञ्च पक्षे पक्षे कर्तव्यान्यपि दर्शपौर्णमासादीनि । तत्रापि श्रुतिः—[1] 'अमावास्याया-ममावास्यया यजेत । पौर्णमास्यां पौर्णमास्या यजेत' इति । एवं मासि कर्तव्यान्यपि पिण्डपितृयज्ञादीनि । तत्र श्रुतिः—[2] 'मासि पितृभ्यः क्रियते' इति । ऋतुषु कर्तव्यानि च ऋतुमुखहोमादीनि । तथा च श्रुतिः—[3] 'प्रायश्चित्तिर्वाग्घोतर्त्यृतुमुखऋतुमुखे जुहोति' इति । बोधायनोऽपि—'ऋतुमुख षड्ढोता' इति । चतुर्षु मासेषु चातुर्मास्यानि । तथा चापस्तम्बः—'फाल्गुन्यां चैत्र्यां वा वैश्वदेवेन यजते । ततश्चतुर्षु मासेषु आषाढ्यां श्रावण्यां वोदवसाय वरुणप्रघासैर्यजते । ततश्चतुर्षु मासेषु पूर्वस्मिन् पर्वण्युपक्रम्य द्व्यहं साकमेधैर्यजते । ततो द्व्यहे, त्र्यहे, चतुरहेऽर्धमासे, मासि, चतुर्षु वा मासेषु शुनासीरीयेण यजते ।' इति ॥

एवमयनयोः कर्तव्यः पशुबन्धः । तथा च बोधायनः—[4] 'षट्सु षट्सु मासेषु आहिताग्निना पशुना यष्टव्यं भवति' इति । आश्वलायनोऽपि [5] 'निर्मित ऐन्द्राग्नः षाण्मास्यः सांवत्सरो वा' इति । संवत्सरे कर्तव्यः सोमयागः । तथा च बोधायनः–[6] 'संवत्सरे संवत्सरे सोमः' इति ॥

ऋतुविशेषकर्तव्यान्याहापस्तम्बः—[7] 'वसन्ते ब्राह्मणमुपनयीत ।

---

1. आपस्तम्बश्रौतसूत्रे २४ प्रश्ने २ कण्डिकायां १९, २० सूत्रे ।
2. कृष्णयजुस्संहितायां २ काण्डे ५ प्रश्ने ७ अनुवाके ।
3. तैत्तिरीयशाखायां २ अष्टके ३ प्रश्ने २ अनुवाके ।
4. श्रौते कर्मान्तसूत्रे २६ प्रश्ने २९ अध्याये २९ खण्डे ।
5. आश्वलायनश्रौतसूत्रे ३ अध्याये ८ खण्डे ४, ५ सूत्रे ।
6. धर्मे गृह्ये श्रौते वा न दृश्यते । अतः विषयसंग्रहात्मकं वाक्यमिति भाति । श्रौते २० प्रश्ने २४ अध्याये ८ खण्डे स एवमेव संवत्सरे संवत्सरे इति सूत्रं शाकलेः । इति मातं भवति ।
7. प्रथमप्रश्ने प्रथमपटले १९ सूत्रम् ।

ग्रीष्मे राजन्यं। शरदि वैश्यम्।' तथा 'वसन्ते ब्राह्मणोऽग्निमादधीत, ग्रीष्मे राजन्यः शरदि वैश्यो, वर्षासु रथकारः' इति। तथा 'वसन्ते वसन्ते ज्योतिष्टोमेन यजेत। शरदि वाजपेयेन यजेत' इत्यादि। तथा **आश्वलायनगृह्ये** — [1]'श्रावण्यां श्रावणकर्म आश्वयुज्यामाश्वयुजं कर्म। मार्गशीर्ष्यां प्रत्यवरोहणम्। हेमन्तशिशिरयोश्चतुर्णामपरपक्षाणामष्टमीष्वष्टकाः। एतेन माघ्या वर्षं प्रोष्ठपद्या अपरपक्षे' इति॥

बोधायनोऽपि — [2]'अथ प्रत्यवरोहणं वसन्तादौ मधुश्च माधवश्चेति हुत्वा वासन्तिकैरलङ्कारैरलङ्कृत्य वासन्तिकान्यन्नानि ब्राह्मणेभ्यो दत्वा अन्नशेषान् सगणः प्राश्नाति। अथ ग्रीष्मादौ शुक्रश्च शुचिश्चेति हुत्वा ग्रैष्मकैरलङ्कारैरलङ्कृत्य ग्रैष्मकान्यन्नानि ब्राह्मणेभ्यो दत्वान्नशेषान् सगणः प्राश्नाति॥

अथ वर्षादौ नभश्च नभस्यश्चेति हुत्वा वार्षिकैरलङ्कारैरलङ्कृत्य वार्षिकान्यन्नानि ब्राह्मणेभ्यो दत्वा अन्नशेषान् सगणः प्राश्नाति। अथ शरदादौ इषश्चोर्जश्चेति हुत्वा शारदैरलङ्कारैरलंकृत्य शारदीकान्यन्नानि ब्राह्मणेभ्यो दत्वान्नशेषान् सगणः प्राश्नाति॥

अथ हेमन्तादौ सहश्च सहस्यश्चेति हुत्वा हैमन्तिकैरलङ्कारैरलङ्कृत्य हैमन्तिकान्यन्नानि ब्राह्मणेभ्यो दत्वा अन्नशेषान् सगणः प्राश्नाति। अथ शिशिरादौ तपश्च तपस्यश्चेति हुत्वा शैशिरिकैरलङ्कारैरलङ्कृत्य शैशिरिकान्यन्नानि ब्राह्मणेभ्यो दत्वा अन्नशेषान् सगणः प्राश्नाति। स एष आधानवान् स्यात् अग्निहोत्रिको वाप्यपूर्वो वेति प्रत्यवरोहणं व्याख्यातं' इति॥

---

1. द्वितीयाध्याये प्रथमखण्डे प्रथमं सूत्रम्।
2. द्वितीयप्रश्ने तृतीयपटले १—१० सूत्राणि।

मनुरपि—[1]'अग्निहोत्रं च जुहुयादाद्यन्ते द्युनिशोस्सदा । दर्शेन चार्धमासान्ते पूर्णमासेन चैव हि ॥ सस्यान्ते नवसस्येष्ट्या तथर्त्वन्ते द्विजोऽध्वरैः । पशुना ह्ययनान्ते तु समान्ते सौमिकैर्मखैः ॥' इति ॥

जितः स्वर्गस्तव भ्रात्रा भरतेन महात्मना ।
वनस्थमपि तापस्यं यस्त्वामनुविधीयते ॥ ३३ ॥

अनेन देशान्तरेऽपि विद्यमानज्येष्ठेन समानशीलतया अवस्थानरूपं शुश्रूषणं कनिष्ठस्य स्वर्गादिफलप्रदमिति सूचितम् । तथा च **आनुशासनिके**—[2]'शुश्रूषते यः पितरं न चासूयेत्कथञ्चन । मातरं भ्रातरं वापि गुरुमाचार्यमेव च ॥ तस्य राजन् फलं विद्धि स्वर्लोके स्थानमूर्जितम् । न च पश्येत नरकं गुरुशुश्रूषयात्मवान् ॥' इति ॥

न पित्र्यमनुवर्तन्ते मातृकं द्विपदा इति ।
ख्यातो लोकप्रवादोऽयं भरतेनान्यथाकृतः ॥ ३४ ॥

अनेन सर्वेषां जनानां मातृवृत्तानुसरणं स्वभावः । स च भरतेनान्यथा कृत इति कथनात् साधूनां प्रभवप्रयुक्तो दोषो न भवति । अतस्तेषामुत्पत्तिर्न विचारणीयेति सूचितम् । तथा च **भारते**—'नदीनाञ्च ऋषीणाञ्च साधूनां च महात्मनाम् । प्रभवो नाधिगन्तव्यः स्त्रीणां दुश्चरितस्य च ॥' साधुत्वञ्च अग्रिमश्लोके प्रतिपादितम्—

भर्ता दशरथो यस्याः साधुश्च भरतस्सुतः ।
कथं नु साऽम्बा कैकयी तादृशी क्रूरशालिनी ॥ ३५ ॥

---

1. चतुर्थाध्याये २५, २६ श्लोकौ ।
2. आनुशासनिके ७५ अध्याये ४०, ४१ श्लोकौ ।

एवमादिलक्ष्मणकृतकैकेयीपरिभवमसहमानो रामः

तामेवेक्ष्वाकुनाथस्य भरतस्य कथां कुरु ।

इति वदन्नेव गोदावरीतीरपरिसरमाभिसृत्याप्लुत्य सत्वरं सन्तर्प्य पितृदेवताः, समुदितं भगवन्तमादित्यमुपस्थाय जनकजानुजाभ्यां अन्वास्यमानः समधिकं विरराज ॥

इति षोडशः सर्गः ॥

अथ सप्तदशः सर्गः ॥

सप्तदशे — तदनु गोदावरीतीरात् पर्णशालामागत्य विविधकथासंसक्तचेतसं यदृच्छया समागता शूर्पणखा

रामामिन्दीवरश्यामं कन्दर्पसदृशप्रभम् ।
बभूवेन्द्रोपमं दृष्ट्वा राक्षसी काममोहिता ॥ ९ ॥

तरुणं दारुणा वृद्धा दक्षिणं वामभाषिणी ।
शरीरजसमाविष्टा राक्षसी राममब्रवीत् ॥ १२ ॥

अनेन स्त्रीणां वार्धकेपि सुन्दरतरुणपुरुषदर्शनं कामोद्रेककरमिति सूचितम् । तथा **चानुशासनिके** — [1] 'उत्तरां मां दिशं विद्धि दृष्टं स्त्रीचापलं हि ते । स्थविराणामपि स्त्रीणां बाधते मैथुनज्वरः ॥' इति । तत्रैव **पञ्चचूडोपाख्यानेपि** — [2] 'इदमन्यच्च देवर्षे रहस्यं सर्वयोषिताम् । दृष्ट्वैव पुरुषं हृद्यं योनिः प्रक्लिद्यते स्त्रियाः ॥' इति ॥

---

1. एकविंशतितमेऽध्याये ५ श्लोकः ।
2. अष्टत्रिंशत्तमेऽध्याये २६ श्लोकः ।

तदनु किमागमनकृत्यं किंनिमित्तं निशाचरावासेऽस्मिन् देशे वास इति निशाचर्या पृष्टो रामभद्रः

ऋजुबुद्धितया सर्वमाख्यातुमुपचक्रमे ॥ १४ ॥
अनृतं नहि रामस्य कदाचिदपि सम्मतम् ।
विशेषेणाश्रमस्थस्य समीपे स्त्रीजनस्य च ॥ १५ ॥

अत्र 'अनृतं न हि रामस्य' इत्यनेन रामवत्सर्वेषां अनृतं वर्जनीयमिति सूचितम् । तथा च हारीतः — 'नानृतं ब्रूयात्' इति। मार्कण्डेयपुराणेपि — 'असत्प्रलापमनृतं वाक्पारुष्यं च वर्जयेत् ॥' इति ॥

विशेषेण आश्रमस्थस्येत्यनेन नियमवता अनृतं वर्जनीयमित्युक्तम् । तथा च श्रुतिः [1]'तस्यैतद्व्रतं नानृतं वदेत्' इति । बोधायनेपि— [2]जपहोमेष्टिमन्त्राणि करिष्यन्नादितो द्विजः । स्नायात्त्रिषवणं पायादात्मानं क्रोधतोऽनृतात् ॥' इति । मोक्षधर्मेषु — [3]'सोपधिं निकृतं स्तेयं परिवादमसूयिताम् । परोपघातहिंसां च पैशुन्यमनृतं तथा ॥ एतानासेवते यस्तु तपस्तस्य प्रहीयते । यस्त्वेतान् नाचरेद्विद्वान् तपस्तस्य प्रवर्धते ॥' इति ॥

ननु 'अनृतं न हि रामस्य' इत्यनेनैव सर्वेषामनृतवचनप्रतिषेधसिद्धेः विशेषेणाश्रमस्थस्येत्यनेन नियमवतां पुनरनृतवचनप्रतिषेधो व्यर्थ इति चेन्न । सामान्यनिषेधपरप्राथमिकवचनस्य स्मार्तपुरुषार्थनिषेधपरत्वेन अनन्तरवचनस्य क्रत्वर्थप्रतिषेधपरत्वेन वैयर्थ्याभावात् । अन्यतरेणान्यतरान्यथासिद्धिशङ्काभावात् ॥

तथा च निर्णीतं तृतीयाध्याये — 'अकर्मक्रतुसंयुक्तं संयोगात्

---

1. कृष्णयजुस्संहितायां द्वितीयकाण्डे ५ प्रश्ने ७ अनुवाके ।
2. चतुर्थप्रश्ने पञ्चमेऽध्याये ३, ४ श्लोकयोः पूर्वार्धे ।
3. १९२ अध्याये १७ & १८ श्लोकौ ।

नित्यानुवादः स्यादिति । तत्र दर्शपूर्णमासयोः श्रुतं नानृतं वदेदिति वाक्य-मुदाहृत्य किमत्रोक्तः अनृतवदनप्रतिषेधः पुरुषार्थः क्रत्वर्थो वेति सन्दिह्य प्रतीतेः स्मरणात् कर्तृविशेषैरपृथक्श्रुतेः कर्तृवाचित्वमाख्यातप्रत्ययस्यावसीयते। वदेदित्याख्यातात् कर्ता तावदवगम्यते। यश्च यतोऽवगम्यते स तस्यार्थः। तथा 'कर्तरि कृत्' इति अधिकृत्य 'लः कर्मणि च' इति चकारेण कर्तृ-वाचित्वं स्मृतम्। पचति देवदत्त इति च कर्तृविशेषवचनैः देवदत्तादिपदैः सामानाधिकरण्याच्च कर्तृवाचिता। स च प्रत्ययार्थत्वात् प्रकृत्यर्थवदनं प्रति प्रधानभूत इति वचनादानं तावत् पुरुषार्थः॥

यदर्थं च वदनं तदर्थः प्रतिषेधोपि न्याय्यः। कुतः? एतत्प्रतिषेध-स्यानिष्टबोधनत्वात्। इष्टविपरीतं चानिष्टम्। यत् यदा यस्येष्टं तद्विपरीतं तदा तस्यानिष्टं भवति। तद्यदि प्रतिषेध्यभूतां वदनक्रियामनुवदन् वदेदिति शब्दः पुरुषार्थतया पुरुषेष्टसाधनतया तामुपस्थापयेत्। ततः प्रतिषेधोपि इष्टविपरीतसाधनतां बोधयन् अनुवादावस्थापन्नस्यैवेष्टस्य विपरीतं फलत्वेना-वलम्बते। नेष्टान्तरस्याप्रतिपन्नत्वात्॥

तदयमर्थः— तत्पुरुषार्थोपकारितया प्रसक्तं वदनं तन्न तथा, किन्तु अपकारमेव साधयति। तेन श्रुत्या प्रकरणं बाधित्वा पुरुषार्थः प्रतिषेधः; यस्तु स्मार्तः प्रतिषेधः तस्याप्येतदेव मूलं भविष्यतीति पूर्वपक्षं प्रापय्य, 'आख्यातप्रत्ययाः सर्वे क्रियाया अभिधायकाः। तत एव प्रतीतस्य न कर्तुरभिधेयता॥ न स्मृतिः कर्तृवाचित्वे संख्यावाचित्वगोचरा। सामानाधि-करण्यं च लक्षणातो गवादिवत्॥"

अनन्यलभ्यो हि शब्दार्थो भवति। कर्ता चाख्याताभिहितभावना-विनाभावादेव लभ्यमानो नाभिधेयो भवितुमर्हति। स्मृतिरपि नास्याभिधेय-तामाह, किन्तु संख्यावाचिताम्। 'लः कर्मणि' इति विभक्तिशास्त्रस्य द्व्येकयोरिति संख्याशास्त्रस्य च एकवाक्यत्वात्। अत्र द्व्येकयोरिति

द्विवचननिर्देशात् असत्यपि भावप्रत्यये भावप्रधानो निर्देशः द्वित्वैकत्वयोरिति। द्रव्यपरत्वे हि द्वयोरेकस्य च सन्निपाते बहुत्वोपजननात् बहुवचनं स्यात् द्व्येकेष्विति ॥

तदयमर्थः—कर्तुरेकत्वे लकारैकवचनमिति । अनभिधेयोपि कर्ता धात्वर्थभावनाभ्यामेव प्रतिपन्न इति नानुपपन्नं तद्विशिष्टसंख्याभिधानं। सामानाधिकरण्यं च गौः शुक्ल इतिवत् लाक्षणिककर्त्रभिप्रायमुपपन्नं इति नाभिधेयः कर्ता। तेन श्रुतिविरोधाभावात् क्रत्वर्थ एवायं प्रतिषेध इति सिद्धान्तितम् ॥

ततो रामसमुदीरितं वचनमाकर्ण्य राक्षसी तमेवमवादीत्—'अस्ति खलु सुरासुरसिद्धगन्धर्वमौलिमालालालितशासनः सकललोकविरावणो रावणो नाम। तदनुजा विख्यातबलपौरुषाः कुम्भकर्णविभीषणखरदूषणाभिधेयाश्चत्वारः। तेषां भगिनी कामरूपिणी शूर्पणखा नामाहम्। साऽहमिदानीं रूपनिर्जितमारं सुकुमारं भवन्तमवलोक्य रतिरमणबाणपथमवतीर्णा। तदधुना विकृताननामिमां सहचरीं परित्यज्य मामेवानुरूपां भार्यां परिगृह्णातु भवान्। अधुना च लक्ष्मणेन सह सीतायां भक्षितायां एकाकी त्वं रम्याणि गिरिशृङ्गाणि नानाविधानि वनानि मया सह विहरिष्यसि' इति ॥

इति सप्तदशः सर्गः ॥

अथ अष्टादशः सर्गः ॥

अष्टादशे — तदनु मदनपरवशनिशाचरीवचनाकर्णनकुतुको रघुकुलतिलकः सस्मितं तामिदमुवाच —

कृतदारोऽस्मि भवति भार्येयं दयिता मम।
त्वद्विधानां तु नारीणां सुदुःखा ससपत्नता ॥ २ ॥

अनेन सापत्न्यं स्त्रीणामतिक्लेशकरमित्युक्तम् । तच्च अयोध्याकाण्डे प्रपञ्चितम् ॥

श्रीमानकृतदारश्च लक्ष्मणो नाम वीर्यवान् ॥ ३ ॥
अपूर्वभार्यया चार्थी तरुणः प्रियदर्शनः ॥ ३½ ॥

तदनेन ममानुजेन सङ्गम्य सफलीकुरु स्वरूपसौभाग्यं इति ॥

ननु 'अपूर्वभार्यया चार्थी', 'अकृतदारश्च लक्ष्मणः' इति रामेण कथमनृतमुक्तम् । लक्ष्मणस्य कृतदारत्वात् भार्याप्रार्थनानवगमाच्चेति चेन्न । परिहासरूपत्वेनानृतवचनेऽपि दोषाभावात् । तथा च **गौतमः**— [1] 'विवाहमैथुननर्मार्तसंयोगेषु अदोषमेकेऽनृतमिति' । **आपद्धर्मेऽपि** — [2] 'न नर्मयुक्तमनृतं हिनस्ति न स्त्रीषु राजन्न विवाहकाले । न गुर्वर्थे नात्मनो जीवितार्थे पञ्चानृतान्याहुरपातकानि ॥' इति ॥

नन्वेवमपि रामवचनं परिहासरूपमिति कथं निश्चितमिति चेन्न । 'क्रूरैरनार्यैः सौमित्रे परिहासः कथञ्चन । न कार्यः पश्य वैदेहीं कथञ्चित् सौम्य जीवतीम् । मन्यते तद्वचस्तथ्यं परिहासाविचक्षणा ॥' इति वचनपर्यालोचनया तदवगमसंभवात् ॥

ततो रामवचनमाकर्ण्य तदाशयानभिज्ञा निशाचरी सत्वरमुपसृत्य लक्ष्मणं कथितनिजवृत्तान्ता तेनापि सपरिहासं दासभूतस्य मम भार्यायास्तवापि दासीभावः कथमिव नातिक्लेशकर इत्यभिहिता

मन्यते तद्वचस्तथ्यं परिहासाविचक्षणा ॥ १३ ॥

ततो लक्ष्मणेन परित्यक्ता पुनरपि रामनिकटमागम्य 'भक्षितायां सीतायां निस्सपत्नाया दण्डकारण्यविहारः समधिकसुखकर एव' इत्यभिवीक्ष्य

---

1. २३ अध्याये २७ सूत्रं ।
2. १६५ अध्याये ३० श्लोकः ।

जनकनन्दिनीमेव भक्षयितुमभ्यधावत । तदनु मृत्युपाशसमामापतन्तीं निशाचरीं निगृह्य कुपितो रामभद्रो लक्ष्मणमेवमवादीत् ॥

क्रूरैरनार्यैस्सौमित्रे परिहासः कथञ्चन ।
न कार्यः पश्य वैदेहीं कथञ्चित्सौम्य जीवतीम् ॥ १९ ॥

अनेन समीचीनेन अनर्थाधायकं दुष्टजनैः संभाषणं परिहासार्थमपि न कर्तव्यमिति सूचितम् । तथा च **राजधर्मे**–[1] 'यस्यावाच्यं नैव[न] लोके-(स्मिन्ना)नाकार्यं चापि किञ्चन । वाचं तेन न सन्दध्यात् शुचिस्संक्लिष्ट-कर्मणा ॥ उच्चस्य नीचेन हि संप्रयोगं विगर्हयन्ति स्थिरबुद्धयो ये ।' इति ॥

तदधुना विरूपामिमां कर्णनासापहारेण पुनरुक्तवैरूप्यां कर्तु-मर्हति भवानिति ॥

इत्युक्तो लक्ष्मणस्तस्याः क्रुद्धो रामस्य पार्श्वतः ।
उद्धृत्य खड्गं चिच्छेद कर्णनासं महाबलः ॥ २१ ॥

अत्राज्ञामात्रेण विरूपकरणप्रतिपादनात् गुर्वाज्ञा अविचार्यैव झटिति कर्तव्या । तथा च **राजधर्मे** — [2] 'गुरवो हि परं धर्मं यं ब्रूयुस्तं तथा कुरु । गुरूणां हि प्रसादाद्धि श्रेयः परमवाप्स्यसि ॥ ' **कालिदासोपि**— [3] 'स शुश्रुवान्मातरि भार्गवेण पितुर्नियोगात्प्रहृतं द्विषद्वत् । प्रत्यग्रहीदग्रज-शासनं तत् आज्ञा गुरूणां ह्यविचारणीया ॥ ' इति ॥

तत्क्षणमेव लक्ष्मणेन विलक्षणीकृतावयवा निशाचरी खरतरेण रवेण निखिलमपि दण्डकावनं विनादयन्ती खरतरशासनमत्युग्रदर्शनं खरनामानं भ्रातरमुपेत्य निपत्य च भूमितले निखिलमपि निजवृत्तान्तमाख्यातुमुपचक्रमे ॥

इति अष्टादशः सर्गः ॥

---

1. ११४ अध्याये ११ श्लोकः १९. श्लोकस्य उत्तरार्धं च ।
2. १२३ अध्याये अन्तिमः श्लोकः ।
3. रघुवंशे १४ सर्गे ४६ श्लोकः ।

अथ एकोनविंशः सर्गः ॥

एकोनविंशे — तदनु विरूपितां तामवलोक्य रोषारुणीकृतलोचनः खरतरशासनः खराभिधानो राक्षसः साटोपमेवमवादीत्। केन वाविनीतेन विमानितासि? । को वा कालसर्पमासीनमङ्गुल्यग्रेण तुदति। न हि तं पश्यामि यः पुरन्दरमन्तरेण ममाहितं कुर्यात्। तदाख्याहि

देवगन्धर्वभूतानां ऋषीणाञ्च महात्मनाम् ।
कोऽयमेवं विरूपां त्वां महावीर्यश्चकार ह ॥ ६ ॥

इति तेनाभिहिता निशाचरी सबाष्पगद्गदपदमिदमभाषत ॥

तरुणौ रूपसंपन्नौ सुकुमारौ महाबलौ ।
पुण्डरीकविशालाक्षौ चीरकृष्णाजिनाम्बरौ ॥ १४ ॥

फलमूलाशनौ दान्तौ तापसौ धर्मचारिणौ ।
पुत्रौ दशरथस्यास्तां भ्रातरौ रामलक्ष्मणौ ॥ १५ ॥

गन्धर्वराजप्रतिमौ पार्थिवव्यंजनान्वितौ ।
देवौ वा दानवौ वा तौ न तर्कयितुमुत्सहे ॥ १६ ॥

तरुणी रूपसंपन्ना सर्वाभरणभूषिता।
दृष्टा तत्र मया नारी तयोर्मध्ये सुमध्यमा ॥ १७ ॥

ताभ्यामुभाभ्यां संभूय प्रमदामधिकृत्य ताम् ।
इमामवस्थां नीताहं यथाऽनाथा सती तथा ॥ १८ ॥

एष मे प्रथमः कामः कृतस्तात त्वया भवेत् ।
तस्यास्तयोश्च रुधिरं पिबेयमहमाहवे ॥ १९ ॥

इति वदन्त्यां तस्यां महाबलान् चतुर्दशराक्षसान् अचिरादेव तया सह रामं प्रति प्रेषयामास ॥

इति एकोनविंशः सर्गः ॥

अथ विंशः सर्गः ॥

विंशे — अथ निशितशूलधारिभिः निशाचरैः सह पर्णशालाङ्गणमागतां निशाचरीमवलोक्य, संस्थाप्य जनकनन्दिनीरक्षणाय लक्ष्मणं, आदाय चामीकरभूषितं चापं धर्मैकमना रामभद्रस्तानेवमवोचत् — पितृवचनगौरवेण दण्डकावनविहाराय समावद्धकक्षेण मया निखिलमुनिजनसंरक्षणाय पापसमाचारान् निशाचरान् हन्तुमायुधमवलम्बितम् ।

तिष्ठतैवात्र सन्तुष्टा नोपसर्पितुमर्हथ ।
यदि प्राणैरिहार्थो वो निवर्तध्वं निशाचराः ॥ १० ॥

अनेन युद्धार्थं प्रवृत्तः शत्रुः सान्त्वेनैव निवर्तनीयः । अनिवृत्ते च तस्मिन्, प्रहर्तव्यमिति सूचितम् । तथा च **वनपर्वणि** — [1] 'यदा वाचा न तिष्ठन्ति धार्तराष्ट्राः सराजकाः । अनुज्ञाताश्च गन्धर्वाश्चित्रसेनेन भारत ॥ प्रगृहीतायुधास्सर्वे धार्तराष्ट्रानभिद्रवन् ।' इति । तत्रैव **स्थलान्तरे** — [2] 'साम्नैव तु यथा भीम मोक्षयेथास्सुयोधनम् । तथा सर्वैरुपायैस्त्वं यतेथाः कुरुनन्दन ॥ न साम्ना प्रतिपद्येत यदि गन्धर्वराक्षसौ । पराक्रमेण मृदुना मोक्षयेथास्सुयोधनम् ॥ अथासौ मृदुयुद्धेन न मुञ्चेद्भीम कौरवान् । सर्वोपायैर्विमोच्यास्ते निगृह्य परिपन्थिनः ॥' इति ।

इति वदन्तं रामभद्रमवलोक्य कोपारुणीकृतनयना निशाचराः,

---

1. १४१ अध्याये ७ श्लोकस्य उत्तरार्धं ९, १० श्लोकयोः उत्तरपूर्वार्धे च ।
2. १४३ अध्याये १६—१८ श्लोकाः ।

का हि ते शक्तिरेकस्य बहूनां रणमूर्धनि ।
अस्माकमग्रतः स्थातुं किं पुनर्योद्धुमाहवे ॥ १४ ॥

इत्यभिधाय निशितानि शूलानि चिक्षिपुः । तानि च शूलानि तावद्भिरेव काञ्चनभूषितैः शरैः प्रच्छिद्य समादाय चापरान्,

रुक्मपुंखांश्च विशिखान् लक्ष्यानुद्दिश्य राक्षसान् ।
मुमोच राघवो बाणान् वज्रानिव शतक्रतुः ॥ १९ ॥

ते भिन्नहृदया भूमौ छिन्नमूला इव द्रुमाः ।
निपेतुः शोणिताद्राँगा विकृता विगतासवः ॥ २० ॥

तानवलोक्य संत्रस्ता निशाचरी खरनामानं भ्रातरमुपेत्य निपत्य च भूमितले रक्षोगणवधमाचख्यौ ॥

इति विंशः सर्गः ॥

अथ एकविंशः सर्गः ॥

एकविंशे — तदनु तदनुजेन निशाचरवरेण विषण्णवदनामनर्थाय समागतां निशाचरीमवलोक्य रिपुनिषूदनाय प्रहितेषु सदानुरक्तेषु; 'मया सनाथापि अनाथेव विलपन्ती किमिति धरातले चेष्टसे । उत्तिष्ठ तावत्, परित्यज्यतां वैक्लब्यं, अवलम्ब्यतां च धैर्यम्' इति परिसान्त्विता निशाचरी तमेवमाह — 'तवाज्ञया मया सह समागतानतिबलानपि निशाचरानचिरादेव रामशरनिकृत्तकन्धरानवलोक्य तत्कर्मसंत्रस्तमानसा समागतास्मि । तदधुना निखिलराक्षसकण्टकं दण्डकारण्यनिलयं रामभद्रं यदि नोद्धरिष्यसि, तवाग्रतः प्रियतरान् प्राणान् परित्यक्ष्यामि । न ह्युदारप्रकृतेर्महात्मनो रामभद्रस्य संमुखे स्वल्पवीर्यस्य तवावस्थातुं शक्ति-

रस्ति । अतो मन्ये रामतेजसाभिभूतस्त्वं अचिरादेव विनशिष्यसि, इत्येवमादि बहुप्रकारं विललाप ॥

इति एकविंशः सर्गः ॥

अथ द्वाविंशः सर्गः ॥

द्वाविंशे — तदाकर्ण्य रामकृतपरिभवमसहमानः खरो 'मानुषमल्पसारं रामभद्रं अधुनैव यमभवनं प्रेषयामि' इत्यभिधाय निखिलमुनिजनदूषणं दूषणनामानं सेनापतिमाहूय 'चतुर्दशसहस्रसंख्याकानखिललोकहिंसारतान् अतिबलान् निशाचरान् अधुनैवायोधनाय प्रस्थापय, उपस्थापय च दिव्यं रथवरं; समानय शरधिशक्तिखड्गचापान् । अहमिदानीमेव अरातिहननाय सेनायाः पुरत एव यातुमिच्छामि' इत्याज्ञापयामास ॥

तदाज्ञया च सर्वानपि योधमुख्यान् युद्धसन्नद्धान् विधाय निष्टप्तकनकमयकिङ्किणीशतविराजितं वैडूर्यमयकूबरं नानायुधसमलंकृतं रथवरं तत्क्षणमेवोपस्थापयामास । तदनु रोषारुणितलोचनः खरः पवनजवनतुरङ्गमयुक्तं तं रथवरमारुह्य युद्धसन्नद्धान् अनुचरानपि यात्रायै चोदयामास । तदनु तदाज्ञया जनस्थाननिलयानखिलान् निशाचरान् निर्गच्छतोऽवलोक्य सारथिरपि खराज्ञया सत्वरमेव रथमचोदयत् ॥

इति द्वाविंशः सर्गः ॥

अथ त्रयोविंशः सर्गः ॥

त्रयोविंशे — तं प्रयान्तं जनस्थानादशिवं शोणितोदकम् ।
अभ्यवर्षन्महामेघस्तुमुलो गर्दभारुणः ॥ १ ॥
निपेतुस्तुरगास्तस्य रथयुक्ता महाजवाः ।
समे पुष्पचिते देशे राजमार्गे यदृच्छया ॥ २ ॥

श्यामं रुधिरपर्यन्तं बभूव परिवेषणम् ।
अलातचक्रप्रतिमं परिगृह्य दिवाकरम् ॥ ३ ॥

ततो ध्वजमुपागम्य हेमदण्डसमुच्छ्रितम् ।
समाक्रम्य महाकायस्तस्थौ गृध्रः सुदारुणः ॥ ४ ॥

जनस्थानसमीपे तु समागत्य खरस्वराः ।
विस्वरान् विविधांश्चक्रुः मांसादा मृगपक्षिणः ॥ ५ ॥

व्याजह्रुश्च प्रदीप्तायां दिशि वै भैरवस्वनम् ।
अशिवं यातुधानानां शिवा घोरा महास्वनाः ॥ ६ ॥

प्रभिन्नगिरिसंकाशास्तोयशोणितधारिणः ।
आकाशं तदनाकाशं चक्रुर्भीमा बलाहकाः ॥ ७ ॥

बभूव तिमिरं घोरमुद्धतं रोमहर्षणम् ।
दिशो वा विदिशो वापि न च व्यक्तं चकाशिरे ॥ ८ ॥

क्षतजार्द्रसवर्णाभा सन्ध्या कालं विना बभौ ।
खरस्याभिमुखा नेदुः तथा घोरा मृगाः खगाः ॥ ९ ॥

कङ्कगोमायुगृध्राश्च चुक्रुशुर्भयशंसिनः ॥ १० ॥

नित्याऽशिवकरा युद्धे शिवा घोरनिदर्शनाः ।
नेदुर्बलस्याभिमुखं ज्वालोद्गारिभिराननैः ॥ ११ ॥

कबन्धः परिघाभासो दृश्यते भास्करान्तिके ।
जग्राह सूर्यं स्वर्भानुरपर्वणि महाग्रहः ॥ १२ ॥

प्रवाति मारुतश्शीघ्रं निष्प्रभोऽभूद्दिवाकरः ।
उत्पेतुश्च विना रात्रिं ताराः खद्योतसप्रभाः ॥ १३ ॥

संलीनमीनविहगा नलिन्यः शुष्कपङ्कजाः ।
तस्मिन् क्षणे बभूवुश्च विना पुष्पफलैर्द्रुमाः ॥ १४ ॥

उद्भूतश्च विना वातं रेणुर्जलधरारुणः ।
वीचीकूचीति वाश्यन्त्यः बभूवुस्तत्र शारिकाः ॥ १५ ॥

उल्काश्चापि सनिर्घाता निपेतुर्घोरदर्शनाः ।
प्रचचाल मही सर्वा सशैलवनकानना ॥ १६ ॥

खरस्य च रथस्थस्य नर्दमानस्य धीमतः ।
प्राकम्पत भुजस्सव्यः स्वरश्चास्यावसज्जत ॥ १७ ॥

सास्रा संपद्यते दृष्टिः पश्यमानस्य सर्वतः ।
ललाटे च रुजा जाता न च मोहान्न्यवर्तत ॥ १८ ॥

एवमग्रेऽपि मारीचवधानन्तरं स्वाश्रमप्रत्यागमनसमये रामस्यापि मध्ये-मार्गं कानिचित् दुर्निमित्तानि जातानि । [1] 'क्रूरस्वनोऽथ गोमायुर्विननादास्य पृष्ठतः ॥ स तस्य स्वरमाज्ञाय दारुणं रोमहर्षणम् । चिन्तयामास गोमायोः स्वरेण परिशङ्कितः ॥ अशुभं बत मन्येऽहं गोमायुर्वाश्यते यथा । स्वस्ति स्यादपि वैदेह्या राक्षसैर्भक्षणं विना ॥ निमित्तानि च घोराणि दृश्यन्तेऽद्य बहूनि च । तानि दृष्ट्वा निमित्तानि महाघोराणि राघवः । यथा वा मृगसंघाश्च गोमायुश्चैव भैरवम् । वाश्यन्ते शकुनाश्चैव प्रदीप्तामभितो दिशम् ॥ मनश्च मे दीनमिहाप्रहृष्टं चक्षुश्च सव्यं कुरुते विकारम् ।' इति ॥

अग्रे कबन्धदर्शनावसरेऽपि— [2] 'स्पन्दते मे दृढं बाहुरुद्विग्नमिव मे मनः । प्रायशश्चाप्यनिष्टानि निमित्तान्युपलक्षये ॥ ममैव हि निमित्तानि सद्यः शंसति संभ्रमम् ।' इति ॥

---

1. आरण्यकाण्डे ५७ सर्गे २ उ, ३, ४, १० पू० १२ पू० २२, २४ पू=५ श्लोकाः ।
2. आरण्यकाण्डे ६९ सर्गे २१ श्लोकः २२ श्लोकस्य उत्तरार्धं च ।

एवमेव युद्धकाण्डेपि —[1] 'लोकक्षयकरं भीमं भयं पश्याम्युपस्थितम् । निबर्हणं प्रवीराणां ऋक्षवानररक्षसाम् ॥ वाताश्च परुषा वान्ति कम्पते च वसुन्धरा । पर्वताग्राणि वेपन्ते पतन्ति धरणीरुहाः ॥ मेघाः क्रव्यादसंकाशाः परुषाः परुषस्वनाः । क्रूराः क्रूरं प्रवर्षन्ति मिश्रं शोणितबिन्दुभिः ॥ रक्तचन्दनसङ्काशा सन्ध्या परमदारुणा । ज्वलच्च निपतत्येतदादित्यादग्निमण्डलम् ॥ आदित्यमभिवाश्यन्ति जनयन्तो महद्भयम् । दीना दीनस्वराः घोरा न प्रशस्ता मृगद्विजाः ॥ रजन्यामप्रकाशश्च सन्तापयति चन्द्रमाः । कृष्णरक्तांशुपर्यन्तो यथा लोकस्य संक्षये ॥ ह्रस्वो रूक्षोऽप्रशस्तश्च परिवेषः सुलोहितः ॥ आदित्यमण्डले नीलं लक्ष्म लक्ष्मण दृश्यते । दृश्यन्ते न यथावच्च नक्षत्राण्यभिवर्द्धते । युगान्तमिव लोकस्य पश्य लक्ष्मण शंसति ॥ काकाः श्येनास्तथा गृध्राः नीचैः परिपतन्ति च । शिवाश्चाप्यशिवा वाचः प्रवदन्ति महास्वनाः ॥' इति ।

तत्रैव स्थलान्तरे —[2] 'रावणस्य विनाशाय राघवस्य जयाय च ॥ ववर्ष रुधिरं देवो रावणस्य रथं प्रति । वाता मण्डलिनस्तीक्ष्णा ह्यपसव्यं प्रचक्रमुः ॥ महद्गृध्रकुलं चास्य भ्रममाणं नभःस्थले । येन येन रथो याति तेन तेन प्रधावति ॥ सन्ध्यया चावृता लङ्का जपापुष्पनिकाशया । दृश्यते संप्रदीप्तेव दिवसेपि वसुन्धरा ॥ सनिर्घाता महोल्काश्च संप्रचेरुर्महास्वनाः । विषादयंस्ते रक्षांसि रावणस्य सदाहिताः ॥ रावणश्च यतस्तत्र प्रचचाल वसुन्धरा । रक्षसाञ्च प्रहरतां गृहीता इव बाहवः ॥ ताम्राः पीतास्सिताः श्वेताः पतिताः सूर्यरश्मयः । दृश्यन्ते रावणस्याङ्के पर्वतस्येव धातवः ॥ गृध्रैरनुगताश्चास्य वमन्तो ज्वलनं मुखैः । प्रणेदुर्मुखमीक्ष्यन्त्यः संरब्धमशिवं शिवाः ॥ प्रतिकूलं ववौ वायुः रणे पांसून्

1. युद्धकाण्डे २३ सर्गे ३ — १२ श्लोकाः ।
2 युद्धकाण्डे १०८ सर्गे १९ — ३२ श्लोकाः ।

समुत्किरन् । तस्य राक्षसराजस्य कुर्वन् दृष्टिविलोपनम् ॥ निपेतुरिन्द्राशनयः सैन्ये चास्य समन्ततः । दुर्विषह्यस्वना घोराः विना जलधराः स्वनम् ॥ दिशश्च प्रदिशस्सर्वा बभूवुस्तिमिरावृताः । पांसुवर्षेण महता दुर्दर्शं च नभोऽभवत् ॥ कुर्वन्त्यः कलहं घोरं शारिकास्तं रथं प्रति । निपेतुश्शतशस्तत्र दारुणा दारुणारुताः ॥ जघनेभ्यः स्फुलिंगांश्च नेत्रेभ्योऽश्रूणि सन्ततम् । मुमुचुस्तस्य तुरगाः तुल्यमग्निञ्च वारि च ॥ एवंप्रकारा बहवस्समुत्पाता भयावहाः । रावणस्य विनाशाय दारुणाः संप्रजज्ञिरे ॥' इति ॥

एवं खरवधे सन्निमित्तान्यग्रे रामवाक्ये—[1]'सधूमाश्च शरास्सर्वे मम युद्धाभिनन्दिनः । रुक्मपृष्ठानि चापानि विवेष्टन्ते च लक्ष्मण ॥ यादृशा इह कूजन्ति पक्षिणो वनचारिणः । अग्रतो नोभयं प्राप्तं संशयो जीवितस्य च ॥ संप्रहारस्तु सुमहान् भविष्यति न संशयः । अयमाख्याति मे बाहुः स्फुरमाणो मुहुर्मुहुः ॥ सन्निकर्षे तु नश्शूर जयं शत्रोः पराजयम् । सुप्रभं च प्रसन्नं च तव वक्त्रं च लक्ष्यते ॥' इति ।

एवं युद्धकाण्डेऽपि जयचिह्नानि प्रतिपादितानि—[2]'बभूव द्विगुणं वीर्यं बलं हर्षश्च संयुगे । रामस्यास्त्रबलं चैव शत्रोर्निधनकाङ्क्षिणः ॥ प्रादुर्बभूवुरस्त्राणि सर्वाणि विदितात्मनः । प्रहर्षाच्च महातेजाः शीघ्रहस्ततरोऽभवत् ॥' इति ॥

एवमन्यान्यपि दुर्निमित्तानि सन्निमित्तानि च तत्र तत्र बहूनि प्रतिपादितानि । तत्र निमित्तं नाम सुकृतदुष्कृतानुरूपतया प्राप्यमाणफलस्य ज्ञापकम् । तथा च ज्योतिर्निबन्धे— 'पूर्वजन्मकृतकर्मणः फलं पाकमेति नियमेन देहिनाम् । तत्प्रकाशयति दैवचोदितं प्रस्थितस्य शकुनं स्थितस्य च ॥ इति ।

---

1. आरण्यकाण्डे २४ सर्गे ५–८ श्लोकाः ।
2. युद्धकाण्डे १०५ सर्गे २५, २६ श्लोकौ ।

तच्च निमित्तमिन्द्रयमवरुणकुबेराग्निवाय्वादिदेवताभेदेन दर्शनशब्द-श्रवणसंकीर्तनगमनाङ्गस्फुरणस्खलनादिभेदेन च बहुविधम् । तत्रेन्द्रादिदेवताकानि दुर्निमित्तानि छन्दोगानां षड्विंशब्राह्मणे प्रतिपादितानि । तत्र प्रथमत इन्द्रदेवताकानि निमित्तानि—[1] 'अथ यदास्य मणिमाणिक्यकुम्भ-स्थालीदरणमायासो राजकुले विवादो वा यानच्छत्रशय्यासनावसथध्वज-गृहैकदेशप्रभञ्जनेषु गजवाजिमुख्या वा प्रमीयन्ते' इत्येवमादीनि ॥

तत्र मणिः स्थूलहारादिः । माणिक्यमस्यूतो मणिः । तदादीनां भेदनं दरणम् । आयासश्चित्तपीडा । राजकुलेन सह विवादो वा । यानमान्दोलिका, तदादीनां भञ्जनं भङ्ग, गजवाजिमुख्यानां नाशश्चेत्यैन्द्राणि ॥

तथा याम्यानि दुर्निमित्तानि—

अथ यदास्य प्रजायां पशुषु शरीरे वाऽरिष्टानि प्रादुर्भवन्ति व्याधयो वाऽनेकविधा अतिस्वप्नमतिभोजनमालस्यं व्रणमजीर्ण(मति)-निद्रेत्येवमादीनि । प्रजापशुभिरुपेतस्य शरीरे पीडा ज्वराद्युत्पत्तिः । अतिस्वप्नं दुःस्वप्नं । अस्वप्नमनिद्रा । अतिभोजनं भस्मकव्याधिना । अभोजन-मरुच्यादिना । अहेतुकमालस्यम् । व्रणं शस्त्रादिना ग्रन्थ्यादिना वा । अजीर्णं भुक्तस्याजरणम् । अतिनिद्रा च । इति यमदेवताकानि दुर्निमि-त्तानि ॥

अथ वरुणदेवताकानि—

अथ यदास्य क्षेत्रगृहसंस्थेषु धान्येष्वीतयः प्रादुर्भवन्ति । ईतयो-ऽनेकविधाः । आखुपतङ्गपिपीलिकामध्वकभौमकशुकशलभकसौक्ष्मका इति एवमादीनि तान्येतानि सर्वाणि वरुणदैवत्यान्यद्भुतानि ।

अस्य गृहस्थस्य क्षेत्रस्थेषु गृहस्थितेषु वा धान्येषु ईतयः । आखुः=

---

1. षड्विंशब्राह्मणे पञ्चमषष्ठप्रपाठकयोः

मूषिकः । पतङ्गः=पक्षिविशेषः । पिपीलिकाः प्रसिद्धाः । मधुका मधुमक्षिकाः । भौमकाः=भूमौ भवाः क्षुद्रजन्तवः । शुकाः=कीराः । शलभाः=सस्यभक्षकजन्तुविशेषाः । सौक्ष्मकाः=सूक्ष्मा जन्तुविशेषाः लतापुष्पफलादिष्वनुषक्ताः । इत्येतानि वारुणानि दुर्निमित्तानि ॥

अथ वैश्रवणदेवताकानि दुर्निमित्तानि—

अथ यदास्य कनकरजतवरवस्त्रवैडूर्यमुक्तामणिवियोगो भवति, आरम्भा वा विपद्यन्ते, अथवा अन्यानि क्रूराणि मित्राणि वा विरज्यन्ते, अरिष्टानि वा वयांसि गृहमध्यासन्ते, वाल्मीकभौमानि वा जायन्ते, छत्राकं वोपदृश्यते, मधूनि वा निलिप्यन्त इत्येवमादीनि वैश्रवणदैवत्यान्यद्भुतानीति ॥

कनकादिभ्यो वियोगः । कार्यारंभाणां निष्फलत्वं । क्रूरपिशाचादिदर्शनं । मित्रादिद्वेषः । अनिष्टसूचकपक्षीणां गृहारोहणम् । वाल्मीकं गृहे वल्मीकोत्पत्तिः । भौमानि भूम्युद्भवप्राणिजातानि । छत्राकं=कवकम् । गृहे मधूद्भवः । एवमादीनि सर्वाणि वैश्रवणदैवत्यान्यद्भुतानि ॥

अथाग्निदेवताकानि दुर्निमित्तानि—

अथ यदास्य पृथिवी तटति, स्फुटति, कूजति, कंपति, ज्वलति, रुदति, धूमायत्यकस्मात्सलिलमुद्गिरति, प्लवान्निमज्जति, निमग्नमुत्प्लवत्यकाले पुष्पफलमभिनिवर्ततीत्यश्वतरीगर्भो जायते, यदा मज्जति हस्तिनी, भूकम्पो जायते, प्रासादं भिनत्ति यत्र तत्र राजा विनश्यति । गौर्गृहमारोहेत् ग्राममहिषीत्येवमादीनि तान्येतानि सर्वाणि अग्निदैवत्यान्यद्भुतानि इति ॥

तटति शब्दं करोति । स्फोटनं, कूजनम् । कम्पनं अकाण्डे भूम्यादेः कंपनं । ज्वलनं अग्निसंबन्धं विना ज्वलनम् । रोदनं, अग्निं विना धूमः । निर्हेतुकसलिलोद्गमः । जले क्षिप्तपाषाणादेरमज्जनम् । नग्नस्य

मृतशरीरस्य जलमज्जनम् । अकाले वृक्षाणां पुष्पफलोद्गमः । अश्वतर्यप्रजेति श्रुत्या अप्रजात्वेन प्रसिद्धानामश्वतरीणां गर्भोत्पत्तिः । निर्निमित्तकं हस्तिनिमज्जनम् । गोग्राममहिषीणां गृहारोहणमित्येतानि दुष्टनिमित्तानि । एतेषु निमित्तेषु तत्रत्यो राजा नश्यति ॥

अथ वायव्यानि—

अथ यदास्य विवाता वाता वायन्तेऽभ्रेषु चापरूपाणि दृश्यन्ते (विरुद्धरूपा दृश्यन्ते) खरकरभमंथकंककपोतोल्लूककाकगृध्रश्येनभासवायसगोमायुसंस्थानि उपरि पांसुमांसपेश्यस्थिरुधिरवर्षाणि प्रवर्तन्ते काकमिथुनानि दृश्यन्ते रात्रौ मणिधनुं पश्येच्छशका ग्रामं प्रविशन्ति वृक्षाः स्रवन्ति रुधिराण्याकाशे राजकुलं वसतीत्येवमादीन्येतानि सर्वाणि वायुदैवत्यानि ॥

स हि विवातो वातमात्रभवः प्रचण्डवायुः । पर्वतादिषु निर्निमित्ततया विरुद्धरूपदर्शनम् । मन्थो मृगविशेषः एवमादीनां गृहे प्रवेशः । स्वस्य वा गृहस्य वोपरि पांसुः । मांसपेशी मांसखण्डः । अस्थ्यादिवर्षं । रात्रौ मणिधनुर्दर्शनम् । ग्रामे शशप्रवेशनम् । वृक्षेभ्यो रुधिरस्रावः । आकाशे गन्धर्वनगरदर्शनमित्येवमादीनि वायव्यान्यद्भुतानि निमित्तानि ॥

अथ सोमदैवत्यानि —

अथ यदास्य तारावर्षाणि, चोल्काः पतन्ति? निपतन्ति, धूमायन्ति दिशो, दह्यन्ति, केतवश्चोत्तिष्ठन्ति, गवां शृङ्गेषु धूमो जायते, गवां स्तनेषु रुधिरं स्रवति, अत्यर्थं हिमं निपततीत्येवमादीनि तान्येतानि सर्वाणि निमित्तान्यद्भुतानि सोमदैवत्यानि इति ।

तारावर्षाणि=नक्षत्रवृष्टिः । उल्कानिपतनं, दिक्षु धूमदर्शनं, विना अग्निं दिक्षु ज्वालादर्शनम् । धूमकेतुरित्येवमादीनि ॥

अथ वैष्णवानि —

अथ यदास्य अयुक्तानि यानानि प्रवर्तन्ते, देवतायतनानि प्रकम्पन्ते, देवताप्रतिमा हसन्ति, रुदन्ति, गायन्ति, नृत्यन्ति, स्फुरन्ति, स्विद्यन्ति, भिद्यन्ति, उन्मीलयन्ति, निमीलयन्ति, प्रतिप्रयान्ति नद्यः, कबन्धमादित्ये दृश्यते, विजले च परिविष्यते, केतुपताकछत्रवज्रविषाणानि प्रज्वलन्ति, अश्वानां च वालधीष्वंगाराः क्षरन्ति, आहतानि चर्माणि कनिक्रन्त इत्येवमादीनि तान्येतानि सर्वाणि विष्णुदैवत्यान्यद्भुतानीति ॥

युद्धे अश्वादिना विना स्वत एव रथादीनां प्रवृत्तिदर्शनं, निर्निमित्तं देवायतनकम्पः । आदित्ये तपति स्वच्छायायां कबन्धदर्शनम् । अवृष्टिकाले परिवेषः । वज्रगजविषाणादि निर्मितध्वजपताकादिज्वलनं, आहतचर्मणां भेर्यादीनां स्वतः शब्दोत्पत्तिः । इमानि वैष्णवनिमित्तानि ॥

अथ **रुद्रदैवत्यानि** —

अथ यदास्य गवां मानुषमहिष्यजाश्वोष्ट्राः प्रसूयन्ते, हीनाङ्गान्यतिरिक्ताङ्गानि विकृतरूपाणि जायन्ते, असंभवानि संभवन्ति, (अचलानि चलन्ति) असूयानि सूयन्ति, अबलानि बलन्ति, एवमादीनि तान्येतानि सर्वाणि रुद्रदैवत्यानीति ॥

मानुषीषु गवादिजननं, गोषु मनुष्यादिजननं, हीनातिरिक्ताङ्गजननं, असंभवानां शशविषाणसन्निभानामुत्पत्तिः, असंभावितगर्भाणां कन्याजरठावन्ध्यादीनां गर्भः, असमर्थानां सामर्थ्यमिति रुद्रदैवत्यानि ॥

अथ **सूर्यदैवत्यानि**—

अथ यदास्य मानुषाणामतिधृतिमतिदुःखं वा, पर्वताः स्फुटन्ति, निपतन्ति आकाशात्, भूमिः कम्पते, महाद्रुमा उन्मूलयन्ति, अश्मानः प्लवन्ति, तटाकानि प्रज्वलन्ति, चतुष्पादं पञ्चपादं वा भवतीत्येवमादीनि तान्येतानि सर्वाणि सूर्यदैवत्यान्यद्भुतानीति ॥

मानुषाणामतिधृतिमतिगर्वतं, पर्वतैकदेशविशरणं, आकाशात् पर्वतपतनं, कृत्स्नदेशकंपनं, द्रुमाणां समूलपातः, स्थूलाश्मनां प्लवनं, तटाके ज्वलनं, चतुष्पदां गवादीनां पञ्चषडादिपादत्वं, एतानि सौर्याण्यद्भुतानीति ॥

उक्तं निमित्तजातं यस्य राज्ञो देशे दृष्टं तस्याशुभकरम् । तेषाञ्च तत्तद्देवताकस्थालीपाकैः शान्तिरपि तत्रैवोक्तेति । इति देवताभेदेन निमित्तान्युक्तानि ॥

दर्शनरूपं निमित्तमुच्यते । दर्शनमपि स्वप्नप्रत्यक्षभेदेन भिन्नम् । स्वप्नदर्शनं च प्राग्भरतस्वप्नस्थले बहुधा प्रपञ्चितम् । प्रत्यक्षदर्शनमपि द्विविधं अशुभं शुभं चेति ॥

तत्राशुभदर्शनानि अर्णवे — 'एकं महीदेवमुभौ नरेन्द्रौ वैश्यत्रयं शूद्रचतुष्टयञ्च । दृष्ट्वा प्रयाणे विफलत्वमेति हरद्विजं छिन्नपदञ्च नग्नम् ॥'. हरद्विजः=शिवब्राह्मणः । 'गोधा सर्पः शशको जाहकश्च याने दृष्टः कृकलासोपि नेष्टः ।' जाहकः=वनमहिषः । याने=प्रयाणे । तत्रैव — 'तृणतैलारिकार्पासभस्मतैलतुषेन्धनम् । सामुद्रो गुडपंकाहिमत्तवान्तबुभुक्षिताः ॥ क्लीबास्थिव्याधिताभ्यक्ततक्रमण्डेन्धनान्त्यजाः । कार्षायी मुक्तकेशश्च याने दृष्टा न शोभनाः ॥ कुटुम्बकलहो गेहज्वलनं स्त्रीरजःस्वला । सन्न्यासी गुर्विणी वन्ध्या धूमांगारा न शोभनाः ॥ कृष्णधान्यानि विष्ठा च जटिलः पतितः खलः । व्यंगः खञ्जश्च नग्नश्च याने दृष्टा न शोभनाः ॥ युद्धं मार्जारयोर्नेष्टं याने महिषयोस्तथा । भिन्नं रिक्तं स्रवद्भाण्डं केशपाशार्गळायसम् ॥ अश्मावस्करपिण्याकं दुर्वाक्यं पथि हानिदम् । खरोष्ट्रमहिषारूढो याने दृष्टो न शोभनः ॥' इति ॥

मुहूर्तमार्तण्डेपि —[1] 'भस्मास्थीन्धनविट्तुषाश्मलवणोपानत्तृणाय-

1. यात्राप्रकरणे (१७ श्लोके प्रथमपादं विना) १७—१९ श्लोकाः ।

स्कराः । पिण्याकौषधकृष्णधान्यरुधिरं तक्रं सधूमानलः कार्पासारुणपुष्पचर्मलगुडास्तैलायसीकर्दमः ॥ मत्तो वान्तबुभुक्षिताशुचिखलाः मुण्डी जटी व्याधितः खञ्जव्यङ्गदिगम्बरा यतिररिः काषायमुक्तालकौ । चोराभ्यक्तमलाविलाश्च पतिताः पाश्यर्गली गुर्विणी वन्ध्याकृष्णवृषाहिभेकवरटा गोधा वराहः शश ॥ जांहोतुर्महिषः खरोष्ट्रमहिषारूढश्च रिक्तो घटः छिक्का प्राणिशिरोङ्गकम्पपदवीबन्धाः कुत्रागाहिवौ । पातो यानपलायनं श्वकलहः षण्डः क्षुतं गोऽर्वलब्धेश्मेति प्रतिबन्धकाः कुशकुनारिछक्कादिका मृत्युदाः ॥' पाशी=पाशहस्तः । अर्गळी=अर्गळाहस्तः । गुर्विणी=गर्भिणी । जांहोतुः=वनवृषभः ॥

शुभदर्शनानि अर्णवे— 'लक्ष्मीलक्षणलक्षितक्षितिपतिक्षीरेक्षुदण्डेक्षुणं क्षिप्रं क्षेमकरं प्रयाणसमये यातुः शुभार्थावहम् ॥' इति । **मुहूर्तमार्ताण्डेऽपि**—[1] 'वस्त्रालङ्करणानि पूर्णकलशस्तौर्यत्रिकं पुत्रवान् शङ्खादर्शनृपाश्च दन्तिसुरभिस्त्रीपुष्पधान्यानि च । दोलादीपविधूमवह्निसुरभिद्रव्याणि शुभ्रो वृषो वेश्याछत्रवितानचामरकुमार्यो मीनगोरोचने ॥ यद्यत्स्वान्तनितान्ततोषकरणं गोरोचनं (कोरुद्धृतं) गोमयं मृच्चांभोर्थघटान्वितस्सहचरो धौतांबरो मौत्रकः ॥ दूर्वादर्भरथाः पलास्त्रमदिरा वर्णी गुरुर्दैवविन् विप्रौ मित्रमृगावरोदनशवं सिद्धार्थदुग्धादि च ॥ कुर्वन्दक्षिणतः सदैतदितरद्वामं प्रकुर्वन् व्रजेत्' इति ॥

भारद्वाजोऽपि - 'राजा विप्रौ सुहृद्वेश्या सपुत्रा स्त्री कुमारिका । अभिरूपो नरः स्त्री वा गजो वाजी वृषः सितः ॥ रज्ज्वा धृतान्यवर्णा गौः सवत्सा च विशेषतः । उद्धृतं गोमयं मीनं मृत्तिका चोद्धृता तथा ॥ रजको धौतवस्त्रश्च वेश्या तौर्यत्रिकध्वनिः । जयमङ्गळशब्दश्च शान्तिपाठः प्रदीपिकाः ॥ दीपो वा प्रज्वलद्वह्निः पूर्णकुंभो नृपासनम् । मद्यं मांसञ्च रुचिरं भक्ष्याणि च फलानि च ॥ इक्षवो मधु तांबूलं वस्त्रालङ्करणानि च ।

---

1. यात्राप्रकरणे १६ श्लोकः १७ श्लोकैकदेशश्च ।

रौप्यं ताम्रं मणिं द्रव्यं स्वर्णं दर्पणमक्षताः ॥ वितानं चामरं छत्रं दूर्वा वर्धापनं ध्वजः । दोला चारुरथो वृद्धः पुत्रपौत्रार्थशुक्छुचिः ॥ चन्दनानि सुगन्धीनि तथा पुण्यानि रोचना । घृतं दधि फलं पेयं सिद्धमन्नं वचः शुभम् ॥ दैवज्ञः स्वगुरुर्देवः चित्तोत्साहकराणि च । दृष्ट्वैतानि नरो यायात् सर्वार्थान् लभते सुखम् ॥' इति ।

दीपिकाः करदीपिकाः । वर्धापनं वृद्धिकर्म शान्तिकपौष्टिकादि । द्रव्यं व्यावहारिकपणा दीनारादयः । पेयं मद्यं । देवः शिवविष्णुमूर्तिः ॥

'भारद्वाजशिखण्डिचाषनकुला हंसोज एते दृशं याता इष्टफलास्तु रासभरवो वामेपि पृष्ठेऽर्थदः । नद्युत्तारभयप्रवेशसमरद्यूतेषु नष्टेक्षणे व्याधौ स्युः शुभदा विलोमशकुना नाड्या इडाया भरे ॥ आद्ये दुश्शकुने निकृत्य च शुचिर्भूत्वाष्टधा वायवं कृत्वेयादपरेष्टवारमपरे दत्वा सुवर्णं व्रजेत् ।' भारद्वाजो नकुलः । चाषसंज्ञः छागः । बहिर्दृष्टमात्रः शुभः । नष्टेक्षणं नष्टद्रव्यगवेषणम् । विलोमशकुनाः प्रतिकूलाः पक्षिणः । इडाभरश्चन्द्रस्वरः । 'शृंगाल्युष्ट्रषडंघ्रिकाश्च नखिनः स्त्रीसंज्ञका वामतः काळीकुक्कुटपुंमृगाश्च सुरभिर्दक्षे मनोभीष्टदः ।' दक्षे=दक्षिणभागे । काळी खंजरिटी भारद्वाजसमाकृतिः किञ्चिन्न्यूनपुच्छी ॥

शुभशब्दश्रवणं द्विविधं मानुषतिर्यग्भेदात् । तत्र मानुषशुभशब्दश्रवणे ज्योतिर्निबन्धे—'प्रापय गच्छ विसर्जय निर्गच्छ विमुञ्च याहीति । सिद्धिकराः खल्वेते प्रमोदजयजीवशब्दाश्च ॥ यात्रोत्थितस्य शस्तं स्याज्जयमङ्गलपूर्वकम् । वाक्यं नान्यत्तथा सर्वं चित्तोत्साहकरं तथा ॥' इति । तिर्यक्छुभशब्दाश्च हयहेषितगीतरवाः । तथाहि—'वृषभेभगर्जिता निनदाः । मुनिनृपदैवतकीर्तनमङ्गलपुण्याहघोषाश्च ॥' इति । 'खरशब्दः शुभो वामे पृष्ठे चापि यियासताम् ।' इति च ॥

अशुभशब्दश्रवणं ज्योतिर्निबन्धे—'मार्जारस्य रवं युद्धः दर्शनं च न शोभनम् । क्षुतं सर्वत्र विघ्नाय मरणायैव गोक्षुतम् ॥' इति । 'रोदनं न शुभं याने वाहनस्य पलायनम् ॥' इति च ॥

एवं दग्धादिदिगभिमुखतया गोमाय्वादिवाशितमशुभकरम् । इतरासु पञ्चसु शान्ताख्यासु शुभदम् । दग्धादिदिक्स्वरूपं ज्योतिर्निबन्धे—'दग्धा दिगुक्ता दिननाथमुक्ता विवस्वदाप्ता भवति प्रदीप्ता । सा धूमिता यां सविता प्रयायात् शेषा दिगन्ताः किल पञ्च शान्ताः ॥' इति । अस्यार्थः — सूर्येण विमुक्ता दग्धा ; सूर्याधिष्ठिता ज्वलिता । सूर्येण गम्या धूमिता इति । इतराः पञ्च शान्ता इति च ॥

यामभेदेन दग्धादिव्यवस्थामाह— 'दग्धा दिगैशी ज्वलिता दिगैन्द्री धूमान्विता चानलवत्प्रभाते । प्रत्येकमेवं प्रहराष्टकेण भुङ्क्ते दिशोऽष्टौ सविता क्रमेण ॥' तत्र दिनस्याष्टौ प्रहराः । तत्र प्रथमे प्रहरे ऐन्द्र्यां सूर्यः ; सा ज्वलिता । ईशान्या दिक् सूर्येण विमुक्ता, सा दग्धा । यत्र गमिष्यत्याग्नेय्यां सा धूमिता । इतराः पञ्च शान्ता इति प्रथमे यामे ॥

द्वितीये तु आग्नेय्यां सूर्यः, सा ज्वलिता । तस्य पृष्ठतः ऐन्द्री दग्धा ; पुरस्ताद्याम्या धूमिता । एवंप्रकारेण तृतीयादियामेषु क्रमेण सूर्यो याम्यादि-दिशमधितिष्ठति तत्तद्यामे सा सा ज्वलिता । सूर्यमुक्ता दग्धा । सूर्यगम्या धूमिता ॥

दग्धादिदिक्षु फलतारतम्यमप्याह— 'दग्धेषु दग्धं ज्वलितं ज्वलत्सु फलं ज्वलिष्यत्यथ धूमितेषु । शेषासु शान्तासु सदा नराणां सिद्ध्यन्ति कार्याणि सुखेन सम्यक् ॥' तत्रापि दग्धदिगभिमुखतया गोमायुवाशन-कार्यमतीतं भवति । ज्वलिते कार्यहानिर्वर्तमाना भवति । धूमिते विनाशमेष्यतीति विवेकः ॥

शुभकीर्तनं ज्योतिर्निबन्धे — 'जाहकाहिशशसूकरगोधाकीर्तनं शुभमुदाहृतमाद्यैः। नो रुतं न च विलोकनमेषामन्यथा गदितमृक्षकपीनाम् ।।' जाहको=वनमहिषः। तदादीनां कीर्तनं शुभकरम्। तस्य विलोकनं तद्रुतश्रवणं चाशुभकरम्। ऋक्षकपीनां तु कीर्तनमशुभं; शब्दविलोकने शुभकरे। हंसस्य दर्शनकीर्तनशब्दश्रवणानि सर्वाण्यपि शुभकराणि। 'हंसस्य दर्शनं शब्दः तन्नामश्रवणं शुभम्।' शब्दस्तत्कर्तृकध्वनिः ।।

शुभगमनविषये ज्योतिर्निबन्धे — 'घूकिका भवनगोधिका हळा पिङ्गळा पिकवधूः कपोतिका। सूकरी पुरुषसंज्ञिका शिवा वामतः खलु यियासतां शुभाः ।।' पुरुषसिंहिकाश्च। घूकिका घूकवधूः। भवनगोधिका पल्ली। पिङ्गळा महाराष्ट्राणां तेनैव नाम्ना प्रसिद्धा। 'वामे राजशुको याने प्रपठन् सर्वसिद्धिदः। अजरावश्वशकुने गोवच्च महिषी स्मृता ।। चुच्छुन्दरी मूषिकोऽष्टनखिनो वामतः शुभाः। पृष्ठे वामे शुभा पल्ली याने नेष्टाग्रयाम्यगा ।।' इति ।। राजशुकः=शुकश्रेष्ठः। वामपार्श्वे दृष्टः, स्थितो, गतो वा सर्वसिद्धिदः। चुच्छुन्दरी=गन्धमूषी। 'प्रदक्षिणगैः काकैर्मृगराजैर्गमः शुभः।' इति च। गमो=यात्रा। 'प्रस्थानं गमनं गमः' इति निघण्टुः। 'मृगा विहङ्गाश्च गताः प्रदक्षिणं मही श्रिताः काङ्क्षितकार्यसिद्धये। मृगा व्रजन्तः परमोजसंख्यया नृपावलोके शकुनः प्रयाणवत् ।।' ओजसंख्या=विषमसंख्या। 'मार्गं बध्नाति सूत्रेण ऊर्णनाभो न शोभनः। श्वा वामोऽभिमुखश्शस्तो शृङ्गी वामगतः शुभः ।।'

अङ्गस्पन्दनं —

'मूर्ध्नि स्फुरत्याशु पृथिव्यवाप्तिः स्थानप्रवृद्धिश्च ललाटदेशे। भ्रूघ्राणमध्ये प्रियसङ्गमः स्यात् नासाक्षिमध्ये च सहायलाभः ।। दृगन्तमध्ये स्फुरितेऽर्थसंपत् सोत्कण्ठता स्यात्स्फुरिते दृगादौ। जयो दृशोऽथ स्फुरणे रणे स्यात् प्रियश्रुतिः प्रस्फुरिते च कर्णे ।। योषित्प्रवृद्धिः स्फुरिते च गण्डे

घ्राणे तु सौमुख्यमुदौ भवेताम् । भोज्येष्टसङ्गावधरोष्ठयोश्च स्कन्धे गळे भोगविवृद्धिलाभौ ॥ स्पन्दो भुजस्येष्टसमागमाय स्पन्दः करस्य द्रविणाप्तिहेतुः । स्पन्दश्च पृष्ठस्य पराजयाय स्पन्दो जयायोरसि मानवानाम् ॥ पार्श्वप्रकम्पे भवति प्रमोदः स्तनप्रकम्पे विषयस्य लाभ । कटिप्रकम्पेपि बलप्रमोदौ नाभिप्रकम्पेपि च देशनाशः ॥ स्फिक्पायुकम्पे धनवाहनाप्तिः वराङ्गकम्पे वरयोषिदाप्तिः । मुष्कप्रकम्पे तनयस्य जन्म वस्तिप्रकम्पे युवतिप्रवृद्धिः ॥ दोष्णः प्रकम्पे पुनरूरुपृष्ठे उर पुरस्यार्थसहायलाभः । स्याज्जानुकम्पेऽरिवरेण सन्धिः जङ्घाप्रकम्पेपि च लाभनाशः । स्थानाप्तिरूर्ध्वं चरणस्य कम्पे यात्रा सलाभांघ्रितलप्रकम्पे ॥ पुंसां यदा दक्षिणदेहभागे स्त्रीणां तु वामावयवेषु जातः ॥ स्पन्दः फलानि प्रदिशत्यवश्यं निहन्ति चोक्ताङ्गविपर्ययेण ॥'

सुबलनस्य ज्योतिर्निबन्धे — 'द्वारघातो दशासङ्गः वलनं पाणिपादयोः ।' इति । उत्पलपरिमलेपि — 'दैवतयात्राशकटाक्षचक्रयुगकेतुभङ्गपतनानि । समपर्यासनसादनसङ्गाश्च देशनृपाशुभदाः ॥' दैवतं= शिवविष्ण्वादि । यात्रासंबन्धिनः शकटस्य तदीयाक्षस्य चक्रस्य युगस्य च केतोर्वा भङ्गपतनानि । शकटस्य वाहनस्य वा समपर्यासनं समभूमौ विपरिवर्तनं, सादनं भुवि मग्नता, अवयवविशरणं वा, सङ्गो लग्नता अचलत्वमिति यावत् । एतत्सर्वं देशस्य राज्ञो वा अशुभदं इति ॥

बहुषु प्रस्थितेषु जायमानं निमित्तं शुभमशुभं वा तत्तद्बुद्ध्यनुरूपं फलं प्रयच्छति । तथा च ज्योतिर्निबन्धे — 'एकत्र सार्थे व्रजतां बहूनां यो यादृशं पश्यति दैवयोगात् । यानादिकानां शकुनस्य तादृक् फलं नरो विन्दति निर्विकल्पम् ॥' बहुषु गच्छत्सु निमित्ते जाते तद्दर्शनसमनन्तरमेव यस्य बुद्धौ यादृशं फलं दैवयोगात् स्फुरति तादृशमेव तस्य फलं भवति निर्विकल्पं निस्संशयमिति यावत् ॥

दुर्निमित्तानि सर्वाणि नातिलङ्घनीयानि। तथा च **ज्योतिर्निबन्धे** — 'वरं श्रयेद्दुर्जनकृष्णसर्पं वरं क्षिपेत्सिंह्मुखे स्वमङ्गम्। वरं तरेद्वारिनिधिं भुजाभ्यां नोल्लङ्घयेद् दुश्शकुनं कदापि ॥'

एतादृशनिमित्तस्यापि प्रथमप्रयाणे पंचभिः षड्भिर्वा प्राणायामैः दोषपरिहारः। द्वितीयेऽष्टभिः, तृतीयेऽगमनमेवेत्युक्तं **ज्योतिर्निबन्धे**। मनःप्रसादे न किञ्चिदित्याह — 'निमित्तराशिरेकतो नृणां मनस्तथैकतः। अतो यियासतां बुधैर्मनोविशुद्धिरिष्यते ॥' इति। 'आद्ये विरुद्धे शकुने नियच्छेत् प्राणान्नृपः पञ्च च षट् च यायात्। अष्टौ द्वितीये शकुने तृतीये व्यावृत्य नूनं गृहमभ्युपेयात् ॥' सर्वस्य दुर्निमित्तजातस्यापवादमाह **ज्योतिर्निबन्धे** — 'अपि प्रहीणस्य समस्तलक्षणैः क्रियाविहीनस्य निकृष्टजन्मनः। प्रदक्षिणीकृत्य शशाङ्कशेखरं प्रयास्यतः कस्य न सिद्धिरिष्यते ॥' इति ॥

इमानि दुर्निमित्तानि भीष्मपर्वणि प्रतिपादितानि — [1] 'ज्योतींषि प्रतिकूलानि दारुणा मृगपक्षिणः। उत्पाता विविधा वीराः दृश्यन्ते क्षत्रनाशनाः ॥ उल्काभिर्हि प्रदीप्ताभिर्बध्यते पृतना तव। वाहनान्यप्रहृष्टानि रुदन्ति विविशां पते ॥ गृध्राश्च पर्युपासन्ते सैन्यानि च समन्ततः। नगरं न यथापूर्वं तथा राजनिदेशनम् ॥ शिवाश्चाशिवनिर्घोषैर्दीप्तास्सेवन्ति वै दिशः। द्विधाभूत इवादित्य उदये प्रत्यदृश्यत। ज्वलन्त्या शिखया भूयो भानुमानुदितो रविः ॥ ववाशिरे च दीप्तायां दिशि गोमायुवायसाः। लिप्समानाः शरीराणि मांसशोणितभोजनाः ॥'

[2] 'श्येना गृध्राश्च काकाश्च कङ्काश्च सहिता बलैः। संपतन्ति नगाग्रेषु

---

1. 'ज्योतींषि प्रतिकूलानि' इत्यादिकाः 'मांसशोणितभोजनाः' इत्यन्ताः सार्धपञ्चश्लोकाः मुद्रितपुस्तके न दृश्यन्ते।

2. भीष्मपर्वणि द्वितीयेध्याये 17 श्लोकमारभ्य तृतीयेध्याये 45 श्लोकान्तम्।

समवायांश्च कुर्वते ॥ अत्युग्रं च प्रपश्यन्ति युद्धमानन्दिनो द्विजाः । क्रव्यादा भक्षयिष्यन्ति मांसानि गजवाजिनाम् ॥ निर्दयं चाभिवाशन्तो भैरवा भयवेदिनः । कङ्काः प्रयान्ति मध्येन दक्षिणामभितो दिशम् ॥ उभे पूर्वापरे सन्ध्ये नित्यं पश्यामि भारत ॥ उदयास्तमने सूर्यं कबन्धैः परिवारितम् ॥ श्वेतलोहितपर्यन्ताः कृष्णग्रीवास्सविद्युतः । त्रिवर्णपरिघास्सन्धौ भानुमन्तमवारयन् ॥ ज्वलितार्केन्दुनक्षत्रं निर्विशेषदिनक्षयम् । अहोरात्रं मया दृष्टं तद्भयाय भविष्यति ॥ अलक्ष्मः प्रभया हीनः पौर्णमासीञ्च कार्तिकीम् । चन्द्रोऽभूदग्निवर्णश्च पद्मवर्णे नभस्तले ॥ स्वप्स्यन्ति निहता वीरा भूमिमावृत्य पार्थिवाः । राजानो राजपुत्राश्च शूराः परिघबाहवः । अन्तरिक्षे वराहस्य वृषदंशस्य चोभयोः । प्रणादं युध्यतो रात्रौ रौद्रं नित्यं प्रलक्षये ॥ देवताप्रतिमाश्चैव प्रकम्पंति हसन्ति च । वमन्ति रुधिरं चास्यैः स्विद्यन्ति प्रपतन्ति च ॥ अनाहता दुन्दुभयः प्रणदन्ति विशांपते । अयुक्ताश्च प्रवर्तन्ते क्षत्रियाणां महारथाः ॥ कोकिलाः शतपत्राश्च चाषाभासाः शुकास्तथा । सारसाश्च मयूराश्च वाचो मुञ्चन्ति दारुणाः ॥ गृहीतशस्त्राः क्रोशन्ति वर्मिणो वाजिपृष्ठगाः । अरुणोदये प्रदृश्यन्ते शतशश्शलभव्रजाः ॥ उभे सन्ध्ये प्रकाशेते दिशो दाहमचिन्तिते । पर्जन्यः पांसुवर्षी च मांसवर्षी च भारत ॥ या चैषा विश्रुता राजंस्त्रैलोक्ये साधुसम्मता । अरुन्धती तथाप्येष वसिष्ठः पृष्ठतः कृतः ॥ रोहिणीं पीडयन्नेष स्थितो राजन् शनैश्चरः ॥ व्यावृत्तं लक्ष्म सोमस्य भविष्यति महद्भयम् ॥ अनभ्रे च महाघोरः स्तनितः श्रूयते स्वनः । वाहनानां च रुदतां निपतन्त्यश्रुबिन्दवः ॥' इति ॥

भीष्मपर्वणि व्यास उवाच—'खरा गोषु प्रजायन्ते रमन्ते मातृभिस्सुताः । अनार्तवं पुष्पफलं दर्शयन्ति वनद्रुमाः ॥ गर्भिण्यो जातपुत्राश्च जनयन्ति विभीषणान् । क्रव्यादाः पक्षिणश्चापि सहाश्नन्ति परस्परम् ॥ त्रिविषाणाश्चतुर्नेत्राः पञ्चपादा द्विमेहनाः । द्विशीर्षाश्च

द्विपुच्छाश्च दंष्ट्रिणः पशवोऽशिवाः ॥ जायन्ते विवृतास्याश्च व्याहरन्तोऽशिवा गिरः । त्रिपदाः शिखिनस्तार्क्ष्याश्चतुर्दंष्ट्रा विषाणिनः ॥ तथैवान्याश्च दृश्यन्ते स्त्रियो वै ब्रह्मवादिनाम् । वैनतेयान्मयूरांश्च जनयन्ति पुरे तव ॥ गोवत्सं वडवा सूते श्वा सृगालं महीपते । कुक्कुरान् करभांश्चैव शुकांश्चाशुभवादिनः ॥ स्त्रियः काश्चित्प्रजायन्ते चतस्रः पञ्च कन्यकाः । जातमात्राश्च नृत्यन्ति गायन्ति च हसन्ति च ॥ पृथग्जनस्य सर्वस्य क्षुद्रकाः प्रहसन्ति च । नृत्यन्ति परिगायन्ति वेदयन्तो महद्भयम् ॥ प्रतिमाश्चालिखन्त्येते सशस्त्राः कालचोदिताः । अन्योन्यमभिधावन्ति शिशवो दण्डपाणयः ॥ अन्योन्यमवमृद्नन्ति नगराणि युयुत्सवः । पद्मोत्पलानि वृक्षेषु जायन्ते कुमुदानि च ॥ विषवा[विष्वग्वा]ताश्च वान्त्युग्रा रजो नाप्युपशाम्यति ॥ अभीक्ष्णं कम्पते भूमिरर्कं राहुरुपैति च ॥ श्वेतो ग्रहस्तथा चित्रां समतिक्रम्य तिष्ठति ॥ अभावं हि विशेषेण कुरूणां तत्र पश्यति ॥ धूमकेतुर्महाघोरः पुष्यं चाक्रम्य तिष्ठति ॥ सेनयोरशिवं घोरं करिष्यति महाग्रहः ॥ मघास्वङ्गारको वक्रं श्रवणे च बृहस्पतिः । भगं नक्षत्रमाक्रम्य सूर्यपुत्रेण पीड्यते ॥ शुक्रः प्रोष्ठपदे पूर्वे समारुह्य विरोचते । उत्तरे तु परिक्रम्य सहितः समुदीक्षते श्वेतो ग्रहः प्रज्वलितः सधूम इव पावकः । ऐन्द्रं तेजस्विनक्षत्रं ज्येष्ठामाक्रम्य तिष्ठति ॥ ध्रुवं प्रज्वलितं घोरं अपसव्यं प्रवर्तते ॥ रोहिणीं पीडयत्येवमुभौ च शशिभास्करौ ॥ चित्रास्वात्यन्तरे चैवाधिष्ठितः पुरुषो ग्रहः । वक्रानुवक्रं कृत्वा च श्रवणं पावकप्रभः ॥ ब्रह्मराशिं समावृत्य लोहिताङ्गो व्यवस्थितः । सर्वसस्यपरिच्छन्ना पृथिवी सस्यमालिनी ॥ पञ्चशीर्षा यवाश्चापि शतशीर्षाश्च शालयः । प्रधानास्सर्वलोकस्य यास्वायत्तमिदं जगत् ॥ ता गावः प्रस्नुता वत्सैः शोणितं प्रक्षरन्त्युत । निश्चेरुरर्चिषश्चापात् खड्गाश्च ज्वलिता भृशम् ॥ व्यक्तं पश्यन्ति शस्त्राणि संग्रामं समुपस्थितम् । अग्निवर्णो यथा भासः शस्त्राणामुदकस्य च ॥ कवचानां ध्वजानां च भविष्यति महान् क्षयः । पृथिवी

शोणितावर्ता ध्वजोडुपसमाकुला ॥ कुरूणां वैशसे राजन् पाण्डवैस्सह भारत ।
दिक्षु प्रज्वलितास्याश्च व्याहरन्ति मृगद्विजाः ॥ अत्याहितं दर्शयन्तो
वेदयन्ति महद्भयम् । । एकपक्षाक्षिचरणः शकुनिः खचरो निशि ॥ रौद्रं
वदति संरब्धः शोणितं छर्दयन्निव । शस्त्राणि चैव राजेन्द्र प्रज्वलन्तीव
संप्रति ॥ सप्तर्षीणामुदाराणां समवच्छाद्य वै प्रभाम् । संवत्सरस्थायिनौ
च ग्रहौ प्रज्वलितावुभौ ॥ विशाखायाः समीपस्थौ बृहस्पतिशनैश्चरौ ।
चन्द्रादित्यावुभौ ग्रस्तावेकाह्ना हि त्रयोदशीं । अपर्वणि ग्रहं यातौ
प्रजासंक्षयमिच्छतः । अशोभिता दिशस्सर्वाः पांसुवर्षैस्समन्ततः ॥
उत्पातमेघा रौद्राश्च रात्रौ वर्षन्ति शोणितम् । कृत्तिकां पीडयंस्तीक्ष्णो
नक्षत्रं पृथिवीपतेः ॥ अभीक्ष्णं वाता वायन्ते धूमकेतुमवस्थिताः । विषमं
जनयन्त्येते आक्रन्दजननं महत् ॥ त्रिषु सर्वेषु सर्वत्र नक्षत्रेषु विशांपते ।
गृध्रः संपतते शीर्षे जनयन्भयमुत्तमम् ॥ चतुर्दशीं पञ्चदशीं भूतपूर्वां च
षोडशीम् । [इमां तु नाभिजानेऽहममावास्यां त्रयोदशीम् ।] चन्द्रसूर्या-
वुभौ ग्रस्तावेकमासीं त्रयोदशीम् ॥ अपर्वणि ग्रहेणैतौ प्रजाः संक्षप-
यिष्यतः । [मांसवर्षं पुनस्तीव्रमासीत् कृष्णचतुर्दशीम् ।] शोणितैर्वक्त्र-
संपूर्णा अतृप्तास्तत्र राक्षसाः ॥ प्रतिस्रोतो महानद्यः सरितः शोणितोदकाः ।
फेनायमानाः कूपाश्च कूर्दन्ति वृषभा इव ॥ पतन्त्युल्काः सनिर्घाताः
शक्राशनिसमप्रभाः । अद्य चैव निशां व्युष्टामनयं समवाप्स्यथ ॥
विनिस्सृत्य महोल्काभिस्तिमिरं सर्वतो दिशम् । अन्योन्यमुपतिष्ठद्भिस्तत्र
चोक्तं महर्षिभिः ॥ भूमिपालसहस्राणां भूमिः पास्यति शोणितम् । कैलास-
मन्दराभ्यां तु तथा हिमवता विभो ॥ सहस्रशो महाशब्दः शिखराणि
पतन्ति च । महाभूता भूमिकम्पे चत्वारः सागराः पृथक् ॥ वेलामुद्वर्त-
यन्तीव क्षोभयंतो वसुन्धरां । वृक्षानुन्मथ्य वान्त्युग्राः [वाताः शर्करा-
कर्षिणः । आभग्नाः सुमहावातैः अशनीभिः समाहताः । वृक्षाः पतन्ति
चैत्याश्च] ग्रामेषु नगरेषु च ॥ नीललोहितपीतश्च भवत्यग्निर्हुतो द्विजैः ।

वामार्चिर्दुष्टगन्धश्च मुञ्चन् वै दारुणं स्वनम् ॥ स्पर्शा गन्धा रसाश्चैव विपरीता महीपते । धूमं ध्वजाः प्रमुञ्चन्ति कम्पमाना मुहुर्मुहुः ॥ मुञ्चन्त्यङ्गारवर्षञ्च भेर्यश्च पटहास्तथा । शिखराणां समृद्धानामुपरिष्टात्समन्ततः ॥ वायसाश्च रुवन्त्युग्रं वामं मण्डलमाश्रिताः । पकापकेति सुभृशं वावाश्यन्ते वयांसि च ॥ निलीयन्ते ध्वजाग्रेषु क्षयाय पृथिवीक्षिताम् । ध्यायन्तः प्रकिरन्तश्च व्याला वेपथुसंयुताः ॥ दीनास्तुरङ्गमास्सर्वे वारणास्सलिलाश्रयाः ।' इति ।

एवंभूतान् सोपद्रवसूचकानकालसमुत्थितान् महोत्पातानप्यविगणय्य निजभुजबलसमार्जितजयप्रशस्तिमेव प्रथयन्तमखिलजनतर्जनं निशाचरमवलोक्य तदनुयायिनी वाहिनी,

प्रहर्षमतुलं लेभे मृत्युपाशावपाशिता ॥ २६ ॥

तदवलोकनाय देवगन्धर्वचारणादयः समेत्य समवलोक्य च वाहिनीं सञ्जातकौतुकाः,

स्वस्ति गोब्राह्मणेभ्यस्तु लोकानां येऽभिसंमताः ।
जयतां राघवस्संख्ये पौलस्त्यान्रजनीचरान् ॥ २८ ॥

इति ब्रुवाणाः समरसन्दर्शनसमुत्सुका बभूवुः । अनेन दुष्टनिग्रहाय प्रवृत्तस्य धार्मिकस्य सर्वेऽपि जयं प्रार्थयन्त इति सूचितम् ॥

तथा च कर्णपर्वणि — [1] 'अर्जुनो जयतां कर्ण इति शक्रोऽभ्यभाषत।' इति । तत्रैव ब्रह्ममहेश्वरावपि — [2] 'महात्मा फल्गुनश्चापि सत्यधर्मरतस्सदा । विजयस्तस्य नियतं जायते नात्र संशयः ॥' इति ॥

राजधर्मेऽपि प्रतिपादितानि — [3] 'जैत्राया यानि रूपाणि

1. ८७ अध्याये ५८ श्लोकस्य पूर्वार्धं ।
2. ८७ अध्याये ७२ श्लोकः ।
3. १०२ अध्याये २,५.—१४.श्लोकाः ।

भवन्ति भरतर्षभ । पृतनायाः प्रशस्तानि तानि वक्ष्यामि सर्वशः ॥ उदीर्णमनसो योधा वाहनानि च भारत । यस्यां भवन्ति सेनायां ध्रुवस्तस्याः परो जयः ॥अन्वे तान्वायवो वान्ति तथैवेन्द्रधनूंषि च । अनुप्लवन्ति मेघाश्च तथादित्यस्य रश्मयः ॥ गोमायवश्चानुकूला बलगृध्राश्च सर्वशः । अन्वयेयुर्यदा सेनां तदा सिद्धिरनुत्तमा ॥ प्रसन्नभाः पावक ऊर्ध्वरश्मिः प्रदक्षिणावर्तशिखो विधूमः । पुण्या गन्धाश्चाहुतीनां प्रवान्ति जयस्यैतद्भाविनो रूपमाहुः ॥ गंभीरशब्दाश्च महास्वनाश्च शङ्खाश्च भेर्यश्च नदन्ति यत्र । युयुत्सवश्चाप्रतीपा भवन्ति जयस्यैतद्भाविनो रूपमाहुः ॥ इष्टा मृगाः पृष्ठतो वामतश्च संप्रस्थितानां च गमिष्यतां च । जिघांसतां दक्षिणाः सिद्धिमाहुर्ये त्वग्रतस्ते विनिषेधयन्ति ॥ माङ्गल्यशब्दान् शकुना वदन्ति हंसाः क्रौञ्चाः शतपत्राश्च भासाः । हृष्टा योधाः प्रस्थिताः खड्गवन्तो जयस्यैतद्भाविनो रूपमाहुः ॥ शस्त्रैर्यन्त्रैः कवचैः केतुभिश्च स्व[सु]भानुभिर्मुखवर्णैश्च यूनाम् । भ्राजिष्यती दुष्प्रतिवीक्षणीया येषां चमूस्तेऽभिभवन्ति शत्रून् ॥ शुश्रूषवश्चानभिमानिनश्च परस्परं सौहृदमास्थिताश्च । येषां योधाः सौहृदमन्वतिष्ठन् जयस्यैतद्भाविनो रूपमाहुः ॥ शब्दाः स्पर्शास्तथा गन्धा विचरन्ति मनःप्रियाः । धैर्यं च विशते योधान् विजयस्य मुखं हि तत् ॥' इति । **तत्रैव स्थलान्तरे**—[1]'अथ शस्त्र[त्रु]प्रतीघातं आपदर्थं परायणम् । सप्तर्षीन् पृष्ठतः कृत्वा युद्ध्येरन्नचला इव ॥ [अनेन विधिना शत्रून् जिगीषेतापि दुर्जयान् ॥] यतो वायुर्यतस्सूर्यः यतश्शुक्रस्ततो जयः । पूर्वं पूर्वं ज्याय एषां सन्निपाते युधिष्ठिर ॥' इति ।

अनागतविधानं तु कर्तव्यं जयमिच्छता ।
आपदं शङ्कमानेन पुरुषेण विपश्चिता ॥ ११ ॥

अनेन आपच्छङ्कायां अनागतविधाने श्रेयो भवत्येव । अनागत-

---

1. १०१ अध्याये १८ श्लोकस्य उत्तरार्धं १९, २० श्लोकौ च ।

विधानाभावे श्रेयःप्राप्तौ सन्देहो व्यतिरेको वा भवतीति सूचितम् ॥ तथा **चापद्धर्मे** युधिष्ठिरं प्रति भीष्मः—[1]'अनागतविधाता च प्रत्युत्पन्नमतिस्तथा। द्वाविमौ सुखमेधेते दीर्घसूत्रो विनश्यति ॥ अत्रैव चेदमव्यग्रः शृणुष्वाख्यानमुत्तमम्। दीर्घसूत्रमुपाश्रित्य कार्याकार्यविनिश्चये ॥' इति।

प्रभूतमत्स्ये नातिगाधे जलह्रदे दीर्घकालज्ञः प्रत्युत्पन्नप्रतिभो दीर्घसूत्रश्चेति त्रयो मत्स्याः परस्परसुहृदो बभूवुः। अथ कदाचिद्धीवरैः मत्स्यग्रहणबुद्ध्या नानामुखैर्निस्सारिते जले प्रक्षीयमाणजलाशयमालोक्य दीर्घदर्शी सुहृदावितरौ प्रत्याह — तदधुना सलिलौकसामस्माकंभियमापत्समुपस्थिता। यावदेव न निःशेषं जलं निर्गच्छति ततः प्रागेवानेनैव स्रोतसा वयमन्यत्र गच्छामः। [2]'अनागतमनर्थं हि सुनयैर्यः प्रबाधते। न संशयमवाप्नोति रोचतां भो व्रजामहे ॥' इति ॥

ततस्त्वरा न कार्येति प्रतिषेधन्तं दीर्घसूत्रिणं, तत्कालोचितं किञ्चित् बुद्धिवैभवेन करिष्याम इति वदन्तं प्रत्युत्पन्नप्रतिभं च परित्यज्य, नातः परमस्माकमवस्थानमुचितमिति तेनैव स्रोतसा निर्गच्छन् दीर्घदर्शी झटिति गंभीरं सलिलाशयं जगाम। प्रत्युत्पन्नमतिस्तु मत्स्योपजीविभिर्जलाशये आलोडिते निखिलझषगणैः सहावाप्य बन्धनं रज्जुमालारूपेण ग्रथनसमसमयमेव स्वयमपि ग्रथितमत्स्यमध्यं प्रविश्य ग्रथनरज्जुं स्वयमेव मुखेन गृह्णन् प्रक्षालनाय जलाशयान्तरमानीते मत्स्यदामनि मन्दं मन्दं मुखगृहीतां रज्जुं विसृज्य अगाधं जलाशयं प्रविवेश ॥

[3]'दीर्घसूत्रस्तु मन्दात्मा हीनबुद्धिरचेतनः। मरणं प्राप्तवान् मूर्खो

---

1. १३७ अध्याये आद्यौ श्लोकौ।
2. १३७ अध्याये ८ श्लोकः।
3. १३७ अध्याये १७—२० श्लोकाः। 'अनागतविधानं च + यथा झषौ' इति श्लोकस्तु मुद्रितपुस्तके न दृश्यते ॥

यथैवोपहतेन्द्रियः ॥ एवं प्राप्ततमं कालं यो मोहान्नावबुद्ध्यते । स विनश्यति वै क्षिप्रं दीर्घसूत्रो यथा झषः ॥ आदौ न कुरुते श्रेयः कुशलोऽस्मीति यः पुमान् । स संशयमवाप्नोति यथा संप्रतिपत्तिमान् ॥ अनागतविधानं च यो नरः कुरुते क्षणात् ॥ श्रेयः प्राप्नोति स व्यक्तं दीर्घदर्शी यथा ह्यसौ ॥ अनागतविधाता च प्रत्युत्पन्नमतिस्तथा । द्वाविमौ सुखमेधेते दीर्घसूत्रो विनश्यति ॥' इति ॥

तस्माद्गृहीत्वा वैदेहीं शरपाणिर्धनुर्धरः ।
गुहामाश्रय सौमित्रे शीघ्रेण [घ्रं त्वं] वचनान्मम ॥ १२ ॥
[गुहामाश्रय शैलस्य दुर्गां पादपसंकुलाम् ॥]

प्रतिकूलितुमिच्छामि न हि वाक्यमिदं त्वया ।
शापितो मम पादाभ्यां गम्यतां वत्स मा चिरम् ॥ १३ ॥

इत्यभिहितो लक्ष्मणः

सशरं धनुरादाय यथाज्ञप्तमथाकरोत् ॥ १५ ॥

ततो रामभद्रः प्रत्यासन्नमरातिसैन्यमवलोक्य, समाबध्य विविधायुधाभेद्यं कवचं, आदाय चामीकरविभूषितं चापं, सर्वदिक्षु चक्षुर्विक्षिपन्, सकलनिशाचरश्रवणबाधिर्यसंपादननिपुणैः ज्यास्वनैः दश दिशः पूरयामास ॥

तदालोकनोत्सुकाः पुण्यकर्माणः सिद्धचारणाः समेत्य गगनप्रदेशे परस्परमेवमवोचन् ॥

स्वस्ति गोब्राह्मणानां च लोकानां ये हि सङ्गताः ।
जयतां राघवो युद्धे पौलस्त्यान् रजनीचरान् ॥ २१ ॥

चक्रहस्तो यथा युद्धे सर्वानसुरपुङ्गवान् ।
एवमुक्त्वा पुनः प्रोचुरालोक्य च परस्परम् ॥ २२ ॥

चतुर्दशसहस्राणि रक्षसां क्रूरकर्मणाम् ।
एकश्च रामो धर्मात्मा कथं युद्धं भविष्यति ॥ २३ ॥

इति राजर्षयस्सिद्धास्सगणाश्च द्विजर्षभाः ।
जातकौतूहलास्तस्थुः विमानस्थाश्च देवताः ॥ २४ ॥

तदनु यातुधानानीकगतानामन्योन्यमभिगर्जतां अनुक्षणं जृंभमाणानाञ्च वीराणां सिंहनादेन अविरतसुवर्णकोणाभिहतदुन्दुभिशब्देन च वित्रासिता वनमृगाः सत्वरमभिदुद्रुवुः ॥

अथ युद्धसमुद्यतयातुधाननिधनाय सत्वरमुदग्रकोपसमाविष्टस्य प्रचण्डानिलदोधूयमानज्वालाकलापयुगान्तानलकल्पस्य सकलजनदुष्प्रेक्ष्यस्य,

तस्य क्रुद्धस्य रूपं तु रामस्य ददृशे तदा ।
दक्षस्येव क्रतुं हन्तुं उद्यतस्य पिनाकिनः ॥ ३५ ॥

प्रविष्टं तेजसा रामं संग्रामशिरसि स्थितम् ।
दृष्ट्वा सर्वाणि भूतानि भयार्तानि प्रदुद्रुवुः ॥ ३६ ॥

अनेन महाबलानां पुरुषाणां युद्धाभिमुखानां उत्साहातिशयेन दुर्निरीक्ष्यं रूपं भवतीति सूचितम् । तथा च कर्णपर्वणि अर्जुन एवंरूपो निरूपितः — [1]'संच्छाद्यमानः समरे परैः परबलान्तकृत् ! दर्शयन्रौद्रमात्मानं पाशहस्त इवान्तकः ॥' इति ॥

सौप्तिकेपि— [2]'तस्य लोहितखड्गस्य दीप्तरक्तस्य युद्ध्यतः । अमानुष इवाकारो बभौ परमभीषणः ॥ ये त्वजाग्रत कौरव्याः तेपि शब्देन मोहिताः ।

1. ५६ अध्याये १०० श्लोकस्य उत्तरार्धं १०१ श्लोकस्य पूर्वार्धंच ।

2. ८ अध्याये ४४—४६ श्लोकाः ।

निरीक्ष्यमाणा ह्यन्योन्यं द्रौणिं दृष्ट्वा प्रविव्यथुः ॥ तद्रूपं तस्य ते दृष्ट्वा क्षत्रियाः शत्रुकर्शिताः । राक्षसं मन्यमानास्तं नयनानि न्यमीलयन् ॥' इति ॥

इति चतुर्विंशः सर्गः ॥

अथ पञ्चविंशः सर्गः ॥

पञ्चविंशे — अथ सानुचरेण खरतरशासनेन खरेण प्रासपट्टसपरिघादिनानाविधायुधैर्विभिन्नगात्रं रामभद्रमवलोक्य,

विषेदुर्देवगन्धर्वाः सिद्धाश्च परमर्षयः ।
एकं सहस्रैर्बहुभिस्तदा दृष्ट्वा समावृतम् ॥ १५ ॥

ततो मण्डलीकृतकार्मुकेण रामेण समुत्सृष्टाः सायकाः, साङ्गदान्बाहून्, सहाभरणान् हस्तान्, सशिरस्त्राणानि शिरांसि, कनकमयानि वर्माणि, अग्र्याणि च चापानि, सकाञ्चनसन्नाहान् वाजिनः, सगजारोहान् गजवरान्, अन्यानपि पदातिमुख्यान्,

चिच्छिदुर्बिभिदुश्चापि रामचाप[बाणा]गुणच्युताः ।

एवमभिहन्यमानान् निशाचरान् अशरणानवलोक्य दूषणाभिधानो निशाचरः क्रुद्धान्तक इव तमभ्यधावत् । ततस्तदाश्रयनिर्भयैः परिवृत्य सालतालशिलाशूलादिविविधायुधैः अनवकाशमाकाशं कुर्वाणैः सैनिकैः समावृता दश दिशोऽवलोक्य रामः

स कृत्वा भैरवं नादमस्त्रं परमभास्वरम् ।
संयोजयत गान्धर्वं राक्षसेषु महाबलः ॥ ३६ ॥

तदनु तदस्त्रान्निष्क्रान्तैर्विशिखैः युगपदभिहतानां निशाचराणां छिन्नभिन्नविदारितैस्सोष्णीषैः उत्तमाङ्गैः साङ्गदैः बाहुभिः सविभूषणैः

अन्यैरप्यवयवैः संप्रकीर्णं प्रकीर्णशक्तिशूलतोमरं संचूर्णितरथचक्रचामरमति-भयंकरं अवनितलं बभूव ॥

इति पञ्चविंशः सर्गः ॥

अथ षड्विंशः सर्गः ॥

षड्विंशे— तदवलोक्य रोषाकुलमानसेन दूषणेन प्रेषितैः पञ्चसाहस्रैः निशाचरैः समन्तादवकीर्यमाणमनेकशरशस्त्रवृक्षशिलानिकरं वज्रसमानसारैः शरैः परिहृत्य रामभद्रः संमुखमभिपततो दूषणस्य संछिद्य चापं अभिहत्य हयान् निपात्य सारथिं तदपि रक्षो वक्षःस्थले जघान ॥

अथ प्रतप्तकाञ्चनपट्टवेष्टितं परवसोक्षितं परिघं परिगृह्य संमुखमेवाभिद्रवतो दूषणस्य

द्वाभ्यां शराभ्यां चिच्छेद सहस्ताभरणौ भुजौ ॥ १२ ॥
स कराभ्यां विकीर्णाभ्यां पपाताशु विदूषणः ।
विषाणाभ्यां विकीर्णाभ्यां मनस्वी च (व) महागजः ॥

अत्रान्तरे संहत्याभिमुखमभिपततां सेनाग्रयायिनां प्रबलतरमायुधसंपातमवलोक्य दाशरथिः,

महाकपालस्य शिरः चिच्छेद परमेषुभिः ।
असंख्येयैस्तु बाणौघैः प्रममाथ प्रमाथिनम् ॥ १९ ॥
स्थूलाक्षस्याक्षिणी तीक्ष्णैः पूरयामास सायकैः ॥ २० ॥

तदनु नासीरसमागताननतिबलपराक्रमान् निशाचरान् तदनुगतपदातिपंचसहस्रीमपि पञ्चसाहस्रैर्विशिखैः विगलितप्राणान् कुर्वाणं दाशरथिमवलोक्य तत्कर्मविस्मयस्तिमितमानसः खरः सुमहता रथेन तमाससाद ॥

इति षड्विंशः सर्गः ॥

अथ सप्तविंशः सर्गः ॥

सप्तविंशे—खरन्तु रामाभिमुखं प्रयान्तं वाहिनीपतिः ।
राक्षसस्त्रिशिरा नाम सन्निवर्त्येदमब्रवीत् ॥ १ ॥

मां नियोजय विक्रान्तं सन्निवर्तस्व साहसात् ॥ २ ॥

अनेन भृत्यवर्गैः युद्धाय प्रवृत्तं प्रभुं निवर्त्य स्वेन युद्धं कर्तव्यमिति सूचितम् । तथा च द्रोणपर्वणि रात्रियुद्धेऽश्वत्थामानं प्रति कृपः—[1]'अयुक्तमिव पश्यामि तिष्ठत्स्वस्मासु मानद । स्वयं युद्धाय यद्राजा रणे यात्यसहायवान् ॥' इति । तथा दुर्योधनं प्रत्यश्वत्थामा—[2]'मयि जीवति गान्धारे न युद्धं कर्तुमर्हसि । मामनादृत्य कौरव्य तव नित्यं हितैषिणम् ॥ न हि ते संभ्रमः कार्यः पार्थस्य विजयं प्रति । अहमावारयिष्यामि पार्थं तिष्ठ सुयोधन ॥' इति ।

एवं सन्निवर्त्य युद्धाभिमुखेन त्रिशिरसा तीक्ष्णाग्रैः शरैः ताडितोपि रामभद्रः तज्जनितखेदमप्यविगणय्य त्रिभिः शरैः तं विशिरसमकरोत् ॥

इति सप्तविंशः सर्गः ॥

अथ अष्टाविंशः सर्गः ॥

अष्टाविंशे—स दृष्ट्वा राक्षसं सैन्यमविषह्यं महाबलः ।
हतमेकेन रामेण त्रिशिरोदूषणावपि ॥ २ ॥

तद्बलं हतभूयिष्ठं विमनाः प्रेक्ष्य राक्षसः ।
आससाद रणे रामं नमुचिर्वासवं यथा ॥ ३ ॥

---

1. १५९ अध्याये ८१ श्लोकः ।
2. १५९ अध्याये ८४, ८५ श्लोकौ ।

अथ विविधशस्त्रास्त्रशिक्षालाघवं प्रकटीकुर्वता निशाचरेण विमुक्तैर्विशिखैर्निरवकाशमाकाशमवलोक्य रामचन्द्रोपि कल्पानलकल्पैः विशिखैः निबिडतरं गगनतलं चकार। एवमन्योन्यवधसंरम्भात् सरभसं युध्यमानयोरुभयोः खरपराक्रमः खरः, शरशतैः दाशरथिमभिहत्य निपात्य च मुष्टिदेशात् ससायकं चापं चामीकरभूषितं कवचमपि धरातले निपातयन्, सहस्रसंख्यान् विशिखान् रामोरसि पातयामास। तत्कर्मविस्मयस्तिमितमानसो राघवो निशाचरवधे कृतत्वरो महर्षिदत्तं वैष्णवं धनुरादाय प्रमुक्तैर्विशिखैः

बिभेद रामः संक्रुद्धः खरस्य समरे ध्वजम्।
स दर्शनीयो बहुधा विकीर्णः काञ्चनो ध्वजः।
जगाम धरणीं सूर्यः देवतानामिवाज्ञया ॥ २३ ॥

भूमेर्गमनमस्तमयपर्वते बोध्यम् ॥

शिरस्येकेन बाणेन द्वाभ्यां बाह्वोरथार्पयत्।
त्रिभिश्चन्द्रार्धवक्त्रैश्च वक्षस्यपि जघान च ॥ २७ ॥

ततोस्य युगमेकेन चतुर्भिश्चतुरो हयान्।
षष्ठेन तु शिरः संख्ये खरस्य रथसारथेः ॥ २९ ॥

प्रभग्नधन्वा विरथो हताश्वो हतसारथिः।
गदापाणिरवप्लुत्य तस्थौ भूमौ खरस्तदा ॥ ३२ ॥

तत्कर्म रामस्य महारथस्य
समेत्य देवाश्च महर्षयश्च।
अपूजयन् प्राञ्जलयः प्रहृष्टाः
तदा विमानाग्रगताः समेताः ॥ ३३ ॥

इति अष्टाविंशः सर्गः ॥

अथ एकोनत्रिंशः सर्गः ॥

एकोनत्रिंशे— खरं तु विरथं रामः गदापाणिमवस्थितम् ।
मृदुपूर्वं महातेजाः परुषं वाक्यमब्रवीत् ॥ १ ॥

गजाश्वरथसंबाधे बले महति तिष्ठता ।
कृतं सुदारुणं कर्म सर्वलोके जुगुप्सितम् ॥ २ ॥

उद्वेजनीयो भूतानां नृशंसः पापकर्मकृत् ।
त्रयाणामपि लोकानामीश्वरोऽपि न तिष्ठति ॥ ३ ॥

अनेन लोकोद्वेगकरस्य क्रूरस्य पापकारिणः क्षिप्रं नाशो भवतीति सूचितम् । तथा च **राजधर्मे**—[1] 'अधर्मशीलो यो राजा बलादेव प्रवर्तते । सहैव परिवारेण क्षिप्रमेवावसीदति ॥' इति । **उद्योगपर्वण्यपि**–[2] 'यस्मात् त्रस्यन्ति भूतानि मृगव्याधान्मृगा इव । सागरान्तामपि महीं लब्ध्वा स परिहीयते ॥' इति ॥

कर्म लोकविरुद्धं तु कुर्वाणं क्षणदाचर ।
तीक्ष्णं सर्वजनो हन्ति सर्पं दुष्टमिवागतम् ॥ ४ ॥

अनेन लोकविरुद्धं कर्म न कर्तव्यमिति सूचितम् । तथा च **विष्णुपुराणे**—[3] 'परित्यजेदर्थकामौ धर्मपीडाकरौ नृप । धर्ममप्यसुखोदर्कं लोकविक्रुष्टमेव च ॥' इति । **मनुरपि**—[4] 'अस्वर्ग्यं लोकविद्विष्टं धर्म-

---

1. ९२ अध्याये ८, ९ श्लोकयोः पूर्वोत्तरार्धे ।
2. ३४ अध्याये २६ श्लोकः ।
3. तृतीयेंशे एकादशाध्याये ७ श्लोकः ।
4. अष्टमेध्याये १२७ श्लोके उत्तरार्धं तु 'अस्वर्ग्यं च परत्रापि तस्मात्तत्परिवर्जयेत्' इत्येव दृश्यते । न तु यथात्र दर्शितं ।

मप्याचरेन्न तु ।' इति । उद्योगपर्वण्यपि — [1] 'वध्यः सर्प इवानार्यः सर्वलोकस्य दुर्मतिः ।' इति ॥

लोभात् पापानि कुर्वाणः कामाद्वा यो न बुद्ध्यते ।
भ्रष्टः पश्यति तस्यान्तं ब्राह्मणी करकादिव ॥ ५ ॥

अनेन कामलोभौ पापाधायकौ वर्जनीयाविति सूचितम् । तथा च उद्योगे विदुरनीतौ — [2] 'त्रिविधं नरकस्येदं द्वारं नाशनमात्मनः । कामः क्रोधस्तथा लोभस्तस्मादेतत्त्रयं त्यजेत् ॥' इति ॥

न चिरं पापकर्माणः क्रूरा लोकजुगुप्सिताः ।
ऐश्वर्यं प्राप्य तिष्ठन्ति छिन्नमूला इव द्रुमाः ॥ ७ ॥

अनेन लोकजुगुप्सितानां पापिष्ठानां प्राप्तैश्वर्याणामपि अचिरेण ऐश्वर्यनाशो भवतीति सूचितम् । तथा च भारते राजधर्मे — [3] 'पापेन कर्मणा वित्तं लब्ध्वा पापः प्रहृष्यति । स वर्धमानः स्तेयेन पापः पापेषु सज्जते ॥ न धर्मोऽस्तीति मन्वानः शुचीनवहसन्निव । अश्रद्दधानश्च भवेत् विनाशमुपगच्छति ॥ महादृतिरिव ध्मातः सुकृतेनैव वर्धते । ततः समूलो ह्रियते नदीकूलादिव द्रुमः ॥' इति । मनुरपि — [4] 'अधर्मेणैधते तावत् ततो भद्राणि पश्यति । ततः सपत्नान् जयति समूलं विनश्यति ॥' इति ।

अवश्यं लभते कर्ता फलं पापस्य कर्मणः ।
घोरं पर्यागते काले द्रुमाः पुष्पमिवार्तवम् ॥ ८ ॥

1 ७३ अध्याये २७ श्लोकस्य पूर्वार्धं ।

2. ३३ अध्याये ६६ श्लोकः ।

3. ९५ अध्याये १--२१ श्लोकाः ।

4. चतुर्थाध्याये १७४ श्लोकः ।

अनेन पापं कर्म स्वल्पमपि वृथा न गच्छति। किन्तु परिपाके दुःखं प्रयच्छत्येवेति सूचितम्। तथा च मनुः—[1] 'नाधर्मश्चरितो लोके सद्यः फलति गौरिव। शनैरावर्तमानस्तु कर्तुर्मूलानि कृन्तति॥ यदि नात्मनि पुत्रेषु न चेत्पौत्रेषु नप्तृषु। न त्वेव तु कृतोऽधर्मः कर्तुर्भवति निष्फलः॥' इति।

न चिरात् प्राप्यते लोके पापानां कर्मणां फलम्।
सविषाणामिवान्नानां भुक्तानां क्षणदाचर॥ ९॥

अनेन उत्कृष्टपापस्य अचिरादेव फलं भवतीति सूचितम्। तदुक्तमभियुक्तैः—'त्रिभिर्वर्षैस्त्रिभिर्मासैः त्रिभिः पक्षैस्त्रिभिर्दिनैः। अत्युत्कटैः पुण्यपापैरिहैव फलमश्नुते॥' इति॥

पापमाचरतां घोरं लोकस्याप्रियमिच्छताम्।
अहमासादितो राजा प्राणान् हन्तुं निशाचर॥ १०॥

अनेन लोकोपद्रवकरः राज्ञा अवश्यं शिक्षणीय इति सूचितम्। तथा च मनुः—[2] 'अधार्मिकांस्त्रिभिर्न्यायैर्निगृह्णीयात् प्रयत्नतः। निरोधनेन दण्डेन (बन्धेन) विविधेन वधेन च॥' इति॥

विदुरनीतावपि—[3] 'गुरुरात्मवतां शास्ता राजा शास्ता दुरात्मनाम्। अन्तः प्रच्छन्नपापानां शास्ता वैवस्वतो यमः॥' इति। **प्राचीना अपि**—'अज्ञो वा यदि वा विपर्ययगतज्ञानोऽथ सन्देहभृत् दृष्टादृष्टविरोधि कर्म कुरुते यस्तस्य गोप्ता गुरुः। निस्सन्देहविपर्यये सति पुनर्ज्ञाने विरुद्धक्रियं राजा चेत्पुरुषं न शास्ति तदयं प्राप्तः प्रजाविप्लवः॥' इति॥

---

1. चतुर्थाध्याये १७२, १७३ श्लोकौ।
2. अष्टमाध्याये ३१० श्लोकः।
3. ३५ अध्याये ७१ श्लोकः।

एवमुक्तस्तु रामेण क्रुद्धस्संरक्तलोचनः ।
प्रत्युवाच ततो रामं प्रहसन्क्रोधमूर्छितः ॥ १५ ॥

विक्रान्ता बलवन्तो वा ये भवन्ति नरर्षभाः ।
कथयन्ति न ते किञ्चित तेजसा स्वेन गर्विताः ॥ १७ ॥

अनेन गर्वेण आत्मस्तुतिर्न कर्तव्या । तथा चापस्तंबः—[1] 'आत्मप्रशंसां परगर्हामिति च वर्जयेत् ' इति । द्रोणपर्वणि रात्रियुद्धे कर्णं प्रति कृपः — [2] 'अब्रुवन् कर्ण युद्धयस्व कत्थसे बहु सूतज । अनुक्त्वा विक्रमेत् यस्तु तद्वै सत्पुरुषव्रतम् ॥ ' इति ॥

तर्हि निषिद्धात्मस्तुतिः कथं रामेण कृतेति चेन्न । आत्मस्तुतेर्निषिद्धत्वेऽपि युद्धकाले वीरवादस्य स्वपराक्रमानुसारेणोत्साहाभिवृद्ध्यर्थं परतिरस्कारार्थञ्च करणे दोषाभावात् । महतां प्रशंसादर्शनाच्च । तथा च तत्रैव कर्णः — [3] 'शूरा गर्जन्ति सततं प्रावृषीव बलाहकाः । फलं चाशु प्रयच्छन्ति बीजमुप्तं क्षिताविव ॥ दोषमत्र न पश्यामि शूराणां रणमूर्धनि ॥' इति ।

महतामाचारे उद्योगपर्वणि परशुरामं प्रति भीष्मवचनं — [4] 'पश्य मे बाहुवीर्यं च विक्रमं चातिमानुषम् । तत्करिष्ये कुरुक्षेत्रे योत्स्ये विप्र त्वया सह ॥' [5] 'तत्र त्वं निहतो राम मया शरशताञ्चितः । लप्स्यसे निर्जितान् लोकान् शस्त्रपूतो महारणे ॥ व्यपनेष्यामि ते दर्पं

1. प्रथमप्रश्ने ७ पटले २४ सूत्रं ।
2. १५९ अध्याये १९ श्लोकः ।
3. १५९ अध्याये २५ श्लोकस्य उत्तरार्धं २६ श्लोकश्च ।
4. १७९ अध्याये ५६ श्लोकस्य पूर्वार्धं ५७ श्लोकस्य पूर्वार्धं च ।
5 १७८ अध्याये ५८ श्लोकः , ६१ उत्तरार्धं ६२ श्लोकः ६३ पूर्वार्धं ६४-श्लोकश्च ।

पौराणं ब्राह्मणब्रुव । यच्चापि कत्थसे राम बहुशः परिषत्सु वै [वत्सरे] ॥ निर्जिताः क्षत्रियाः सर्वे मयैकेनेति नः श्रृणु । न तदा जायते [जातवान्] भीष्मः क्षत्रियो वाथ मद्विधः ॥ यस्ते युद्धमयं दर्पं कामञ्च व्यपनाशयेत् । सोऽहं जातो महाबाहो भीष्मः परपुरंजयः ॥ व्यपनेष्यामि ते दर्पं युद्धे राम न संशयः ॥' इति ।

तथा तत्रैव भीष्मं प्रति **परशुरामवचनमपि**—[1] 'भाषितं ते करिष्यामि तदागच्छ परन्तप । तत्र त्वां निहतं तात (माता) मया शरशतार्दितम् ॥ जाह्नवी पश्यतां भीष्म गृध्रकङ्कबलाशनम् ॥' इति ।

'अनुक्त्वा विक्रमेद्यस्तु' इति पूर्वोदाहृतवचनं तु असमर्थेन कत्थनं न कर्तव्यमित्येतत्परम् । तथा च **तत्रैव**— 'वृथा शूरा न गर्जन्ति शारदा इव तोयदाः । सामर्थ्यमात्मनो ज्ञात्वा ततो गर्जन्ति पण्डिताः ॥' तथात्रैव अनन्तरश्लोके **खरः**—

प्राकृतास्त्वकृतात्मानो लोके क्षत्रियपांसनाः ।
निरर्थकं विकत्थन्ते यथा राम विकत्थसे ॥ १८ ॥ इति ।

तस्माद्रामकृतवीरवादो न दोषाय । खरस्तु कोपात, असमर्थो राम इति भ्रान्त्या उक्तवानिति न कोपि दोषः ॥

तदधुना निखिलनिशाचरनिषूदनं भगवन्तमभिहत्य हतबान्धवानां निशाचराणां आस्रप्रमार्जनं करोमीत्यभिधाय खरेण विनिपातितां गदां,

अन्तरिक्षगतां रामः चिच्छेद बहुधा शरैः ॥ ३० ॥
सा विकीर्णा शरैर्भिन्ना पपात धरणीतले ।

---

1. १७८ अध्याये ६६ श्लोकस्य उत्तरार्धं ६७ श्लोकश्च ।

गदा मन्त्रौषधबलैः व्यालीव विनिपातिता ॥ ३१ ॥

अनेन मन्त्रौषधिबलैः विषादिनाश उक्तो भवति ॥

इति एकोनत्रिंशः सर्गः ॥

अथ त्रिंशः सर्गः ॥

त्रिंशे — तदनु रघुकुलतिलकः खरकरविनिस्सृतां अशनिसमां तां गदामभिहत्य सस्मितमेवमवादीत् —

एतत्ते बलसर्वस्वं दर्शितं राक्षसाधम ।
शक्तिहीनतरो मत्तो वृथा त्वमभिगर्जसि ॥ २ ॥

नीचस्य क्षुद्रशीलस्य मिथ्यावृत्तस्य रक्षसः ।
प्राणानपहरिष्यामि गरुत्मानमृतं यथा ॥ ५ ॥

इत्येवमतिनिर्भर्त्सनपरं रामभद्रमवलोक्य खरतरशासनः खरः सरोषमेवमवादीत् —

दृढं खल्ववलिप्तोऽसि भयेष्वपि च निर्भयः ।
वाच्यावाच्ये ततो हि त्वं मृत्युवश्यो न बुद्ध्यसे ॥ १४ ॥

कालपाशपरिक्षिप्ता भवन्ति पुरुषा हि ये ।
कार्याकार्यं न जानन्ति ते निरस्तषडिन्द्रियाः ॥ १५ ॥

अनेन मरणसमये जनानां बुद्धिभ्रंशो भवतीति सूचितम् । तथा च **सभापर्वणि** अर्हणे युधिष्ठिरं प्रति भीष्मः —[1] 'विप्लुता चास्य भद्रं ते बुद्धिर्बुद्धिमतां वर । चेदिराजस्य कौन्तेय सर्वेषां च महीक्षिताम् ॥ आदातुं च नरव्याघ्र यं यमिच्छत्ययं तदा । तस्य विप्लवते बुद्धिरेवं चेदिपतेर्यथा ॥' इति ॥

---

1. ४० अध्याये १२, १३ श्लोकौ ।

एवमभिधाय सभ्रूभङ्गमितस्ततो दत्तदृष्टिः अविदूरे प्ररूढं महान्तं सालं बाहुभ्यामुत्क्षिप्य रामाय चिक्षेप । तमापतन्तं सालं अशनितुल्यवेगैः खगैः शतशो विनिर्भिद्य रोषारुणितलोचनेन रामेण बाणसहस्रेण निर्भिन्न-हृदयो निशाचरः पुनरेव राममभिदुद्राव ॥

तमापतन्तं सुक्रुद्धं कृतास्त्रो रुधिराप्लुतम् ।
अपासर्पत्प्रतिपदं किञ्चित्त्वरितविक्रमः ॥ २३ ॥

ननु शूराणामपसर्पणं युद्धे निषिद्धम् । तथा च गौतमः—[1]'संग्रामे संस्थानमनिवृत्तिश्च' इति । मनुरपि—[2]'न निवर्तेत संग्रामात् क्षत्रधर्म-मनुस्मरन् ।' इति । एवञ्च निषिद्धमपसर्पणं महावीरेण रामेण कथं कृतमिति चेन्न । शरण्यं पुरुषान्तरं प्रार्थयमानस्य भीत्या पलायनस्य दोषत्वेपि शत्रु-वधावकाशलाभाय क्रियमाणस्य शत्रुकृतप्रहारवैफल्यकरणाय वा क्रियमाणस्य ईषदपसर्पणस्यादोषत्वात् ॥

तथा च गदापर्वणि [3]'तमभ्याशगतं राज्ञो रणे प्रेक्ष्य वृकोदरः । अवाक्षिपद्गदां तस्मै वेगेन महता बली ॥ अवक्षेपं तु तं दृष्ट्वा पुत्रस्तव विशां पते । अवासर्पत्ततः स्थानात्सा मोघा न्यपतद्भुवि ॥ मोक्षयित्वा प्रहारं तं सुतस्तव ससंभ्रमात् । भीमसेनं तु गदया प्राहरत्कुरुसत्तमः ॥' इति । एवं रथिनोः पदातिनोर्वा युध्यतोः सर्वत्रापसर्पणं अवगम्यते । अतोऽत्र शत्रुवधायापसर्पणं न दोषावहम् । भीत्या पलायनस्य तु दोषत्वं च राजधर्मे—[4]'पृष्ठतो भीरवसंख्ये वर्तन्तेऽधमपूरुषाः । शूरात् शरण-

---

1. दशमाध्याये १५ सूत्रं ।
2. सप्तमाध्याये ८७ श्लोकस्य उत्तरार्धं ।
3. ५८ अध्याये ३६–३८ श्लोकाः ।
4. ९७ अध्याये १५ श्लोकः, १८ श्लोकश्च । न भयादित्यंतिममर्धं तु न दृश्यते ।

मिच्छन्तः पर्जन्यादिव जीवनम् ॥ संग्रामेनीकवेलायां उत्कृष्टोभिपतत्युत । पतत्यभिमुखः शूरः पराङ् भीरुः पलायते ॥ न भयाद्विनिवर्तेत तस्य लोका यथा मम ।' इति ॥

एवञ्च शत्रुवधं कामयमानस्य रामस्य धनुषि बाणसन्धानादि-सौकर्यायापसर्पणं रामेण कृतं भूषणमेव न तु दूषणम् । अत एव मूले अपसर्पणे कृतास्त्रत्वमेव हेतुत्वेन महर्षिणा उपन्यस्तम् । अत एव अपसर्पण-समनन्तरमेव शत्रुवधाय बाणसन्धानं, तेन च खरवधोऽपि [इति] अनन्तरश्लोकेन खरवधाय शरसन्धानमोक्षणादिप्रतिपादनमुपपन्नं भवति । भीत्या अपसर्पणे पुनः शरमोक्षानुपपत्तेरिति ॥

अथ रक्षोवधकृतत्वरेण ऐक्ष्वाकेन रामचन्द्रेण दिव्ये धनुषि सन्धाय विमुक्तः शरवरो रक्षोवक्षो विक्षोभयामास । तेन च महेन्द्रदत्तेन बाणेन भृशमभिहतो राक्षसः

निपपात खरो भूमौ दह्यमानः शराग्निना ।
रुद्रेण तु विनिर्दग्धः श्वेतारण्ये यथान्तकः ॥

तत्कर्मसन्तुष्टमानसाः परमर्षयो राजर्षयश्च रामभद्रमभिगम्य सहर्षमेवमब्रुवन् —

एतदर्थं महातेजा महेन्द्रः पाकशासनः ।
शरभङ्गाश्रमं पुण्यमाजगाम पुरन्दरः ॥ ३० ॥

आनीतस्त्वमिमं देशमुपायेन महर्षिभिः ।
एषां वधार्थं क्रूराणां रक्षसां पापकर्मणाम् ॥

तदिदं नः कृतं कार्यं त्वया दशरथात्मज ।
सुखं धर्मं चरिष्यन्ति दण्डकेषु महर्षयः ॥ ३२ ॥

तदनु गीर्वाणगणा अभिहत्य देवदुन्दुभीन् हर्षोत्कर्षेण पुष्पवर्षं विमुञ्चन्तः परस्परमेवमवोचन् —

अर्धाधिकमुहूर्तेन रामेण निशितैः शरैः ।
चतुर्दशसहस्राणि रक्षसां कामरूपिणाम् ॥ ३४ ॥

खरदूषणमुख्यानां निहतानि महाहवे ।
अहो वीर्यमहो दाक्ष्यं विष्णोरिव हि दृश्यते ॥ ३५ ॥

इत्यभिधाय यथापथं गतेषु सर्वेषु लक्ष्मणोपि सीतया सह गिरिकन्दराद्विनिष्क्रम्य स्वाश्रमं प्रविशन् अशेषमुनिजनपूज्यमानं विजयिनं रामचन्द्रमवलोक्य सन्तुष्टहृदयो बभूव ॥

तं दृष्ट्वा शत्रुहन्तारं महर्षीणां सुखावहम् ।
बभूव हृष्टा वैदेही भर्तारं परिषस्वजे ॥ ३९ ॥

अत्र तमित्यनेन क्षत्रियाणां मुख्यधर्मभूतदुष्टनिग्रहशिष्टपरिपालनाय निखिलमुनिजनकदनकररक्षोवधपूर्वकं शरणागतमुनिजनरक्षणं प्रतिज्ञाय, अनपराधिराक्षसजनवधो नोचित इति वैदेहीकृतप्रतिषेधमपि, 'अप्यहं जीवितं जह्यां त्वां वा सीते सलक्ष्मणाम्' इति प्रकारेण अनादृत्य, 'चतुर्दशसहस्राणि रक्षसां भीमकर्मणाम् । एकश्च रामो धर्मात्मा कथं युद्धं भविष्यति ॥' इति ऋषिजनानामपि संशयिते युद्धे क्रूरतरान् राक्षसान् हत्वा, अन्वर्थो यो रामः तादृशः परामृश्यते । तथा च 'शत्रुहन्तारं महर्षीणां सुखावहम्' इति, अन्वर्थमिति च विशेषणान्युपपन्नानि भवन्ति । अत एव एतेऽर्था उत्तरश्लोकाभ्यामुपसंहृताः —

मुदा परमया युक्ता दृष्ट्वा रक्षोगणान् हतान् ।
रामं चैवाव्यथं दृष्ट्वा तुतोष जनकात्मजा ॥ ४० ॥

ततस्तु तं राक्षसमङ्घमर्दनं
सभाज्यमानं मुदितैर्महर्षिभिः ।
पुनः परिष्वज्य शशिप्रभानना
बभूव हृष्टा जनकात्मजा तदा ॥ ४१ ॥

इति त्रिंशः सर्गः ॥

अथ एकत्रिंशः सर्गः ॥

एकत्रिंशे—तदनु जनस्थाननिलयानखिलानपि निशाचरान् रामभद्रेण नामावशेषितानकंपनमुखादवगम्य कोपसंरक्तलोचनो दशाननो नागराज इव मुहुर्मुहुर्निःश्वसन् अधुनैव सानुचरं रामभद्रं अभिहन्तुमिच्छामीत्यवदत् । तदन्वकम्पनोऽपि अविज्ञातपराक्रमं दशाननमेवमवादीत्—

शृणु राजन्यथावृत्तं रामस्य बलपौरुषम् ॥ २२ ॥

असाध्यः कुपितो रामो विक्रमेण महायशाः ।
आपगायाः सुपूर्णाया वेगं परिहरेच्छरैः ॥ २३ ॥

सतारग्रहनक्षत्रं नभश्चाप्यवसादयेत् ।
असौ रामस्तु मज्जन्तीं श्रीमानभ्युद्धरेन्महीम् ॥ २४ ॥

भित्वा वेलां समुद्रस्य लोकानाप्लावयेद्विभुः ।
वेगं सोपि समुद्रस्य वायुं वा विधमेच्छरैः ॥ २५ ॥

संहृत्य वा पुनर्लोकान्विक्रमेण महायशाः ।
शक्तस्स पुरुषव्याघ्रः स्रष्टुं पुनरपि प्रजाः ॥ २६ ॥

न हि रामो दशग्रीव शक्यो जेतुं त्वया युधि ।
रक्षसां वापि लोकेन स्वर्गः पापजनैरिव ॥ २७ ॥

अनेन पापिष्ठैः स्वर्गः प्राप्तुं न शक्यत इत्युक्तम् । तथा च **बोधायनः**—[1] 'न दिवास्वापशीलेन न च सर्वान्नभोजिना । नभो गन्तुं नैव शक्यं आरूढपतितेन वा ॥' [2] 'न वै देवान् पीवरोऽसंयतात्मा रोरूयमाणः ककुदी समश्नुते । चलतुंदी रभसः कामवादी कृशास इत्यणवस्तत्र यान्ति ॥' इति । अनेन सुकृतिनां स्वर्गः पापिष्ठानां नरक इति सूचितम् । तथा च **राजधर्मे** — [3] 'राजा चरति चेद्धर्मं देवत्वायैव कल्पते । स चेदधर्मं चरति नरकायैव गच्छति ॥' इति ॥

तदधुना तद्धयोरार्य जिज्ञासमानेन भवता रामभार्या अपहरणीया । अपहृतायां च तस्यां,

स तया रहितः कामी रामो हास्यति जीवितम् ॥ इति ।

तदाकर्ण्य मुदितमना दशाननो गगनतलसञ्चारचतुरेण रथवरेण उत्पत्य गगनतलं, निपत्य च मारीचाश्रमं, तत्कृतसपर्यासन्तुष्टहृदयो रावणः तमेव रामभार्यापहरणे सहायं प्रार्थयामास । तदाकर्ण्य चकितमना मारीचस्तमित्थमाचचक्षे —

आख्याता केन सा सीता मित्ररूपेण शत्रुणा ।
त्वया राक्षसशार्दूल को न नन्दति निन्दितः ।
सीतामिहानयस्वेति को ब्रवीति ब्रवीहि मे ॥ ४२ ॥

रक्षोलोकस्य सर्वस्य कः शृङ्गं छेत्तुमिच्छति ।
प्रोत्साहयति कश्च त्वां स हि शत्रुर्न संशयः ॥ ४३ ॥

आशीविषमुखाद्दंष्ट्रामुद्धर्तुं चेच्छति त्वया ।
कर्मणाऽनेन केनासि कापथं प्रतिपादितः ॥ ४४ ॥

---

1. बोधायनधर्मसूत्रे द्वितीयप्रश्ने द्वितीयेऽध्याये २४ सूत्रम् ।
2. बोधायनधर्मसूत्रे प्रथमप्रश्ने ५ अध्याये ३२ सूत्रम् ।
3. ९० अध्याये ४ श्लोकः ।

सुखसुप्तस्य ते राजन् प्रहृतं केन मूर्धनि ॥ ४५ ॥

विशुद्धवंशाभिजनाग्रहस्तः
तेजोमदः संस्थितदोर्विषाणः ।
उदीक्षितुं रावण नैव युक्तः
स संयुगे राघवगन्धहस्ती ॥ ४६ ॥

असौ रणान्तस्थितिसान्धिवालो
विदग्धरक्षोमृगहा नृसिंहः ।
सुप्तस्त्वया बोधयितुं न युक्तः
शराङ्गपूर्णो निशितासिदंष्ट्रः ॥ ४७ ॥

चापावहारे भुजवेगपङ्के
शरोर्मिमाले सुमहाहवौघे ।
न रामपातालमुखेऽतिघोरे
प्रस्कन्दितुं राक्षसराज युक्तम् ॥ ४८ ॥

प्रसीद लङ्केश्वर राक्षसेन्द्र
लङ्कां प्रसन्नो भव साधु गच्छ ।
त्वं स्वेषु दारेषु रमस्व नित्यं
रामस्सभार्यो रमतां वनेषु ॥ ४९ ॥

एवमुक्तो दशग्रीवो मारीचेन च रावणः ।
न्यवर्तत पुरीं लङ्कां विवेश च पुरो[गृहो]त्तमम् ॥ ५० ॥

इति एकत्रिंशः सर्गः ॥

अथ द्वात्रिंशः सर्गः ॥

द्वात्रिंशे — अथ शूर्पणखा लङ्कापुरमपि जनस्थानमिव विजनस्थानं काकुत्स्थेन कारयितुमिव दशवदनभवनमाजगाम । तत्र च विचित्रतरविमानमध्यगे काञ्चनमयासने सुखासीनं, देवासुरसंप्रहारसमाक्रान्तचतुर्दन्तकुन्तसन्तताभिहतैः समन्युशतमन्युदंभोळिसंप्रहारैः चक्रधरचक्रविक्षेपणैः विसंस्फुटितवक्षःस्थलं, कुबेरवनप्रमुखानां संक्रन्दननन्दनवनोद्यानानां विक्रमेण विनाशयितारं, विंशतिभुजप्रतापग्रीष्मोष्मणा सहस्रभानुमपि सङ्कुचितभानुं, चन्द्रमसमपि मलीमसं कुर्वाणं, अत्युग्रतपःप्रसादितपितामहवरमहिम्ना अमानुषेभ्यो देवगन्धर्वादिभ्यः संप्राप्तावध्यभावं, संक्षोभकं अक्षोभ्यबुद्धीनां, उच्छेत्तारं धर्माणां, अभिमर्शकं परदाराणां, भेत्तारं पर्वतेन्द्राणां, प्रयोक्तारं सर्वास्त्राणां, कायकान्तिविजितेन्द्रनीलमणिं, आमुक्तकनकमयकुण्डलं, सकललोकविरावणं रावणमवलोक्य तत्पुरतः क्रुद्धेव निपत्य तमेवं अवादीत् ॥

इति द्वात्रिंशः सर्गः ॥

अथ त्रयस्त्रिंशः सर्गः ॥

त्रयस्त्रिंशे — प्रमत्तः कामभोगेषु स्वैरवृत्तो निरङ्कुशः ।
समुत्पन्नं भयं घोरं बोद्धव्यं नावबुद्ध्यसे ॥ २ ॥

अनेन कामभोगेषु स्वैरवृत्तो भयं न जानातीति सूचितम् । तथा च नीतिः—[1] 'अर्थातुराणां न गुरुर्न बन्धुः कामातुराणां न भयं न लज्जा । क्षुधातुराणां न रुचिर्न पक्वं विद्यातुराणां न सुखं न निद्रा ॥' इति ॥

---

1. नीतिसाराख्ये शतके ।

सक्तं ग्राम्येषु भोगेषु कामवृत्तं महीपतिम् ।
लुब्धं न बहु मन्यन्ते श्मशानाग्निमिव प्रजाः ॥ ३ ॥

अनेन ग्राम्यसुखासक्तं लुब्धं प्रजा न बहु मन्यन्त इति सूचितम् । तथा **चानुशासनिके** — 'यतितः कार्यकरणे षड्भागकृतलक्षणः । ग्राम्यधर्मं न सेवेत स्वच्छन्देनार्थकोविदः ॥' इति । लोभपरित्यागे **आपद्धर्मे**— [1]'लुब्धः क्रूरस्त्यक्तधर्मा निकृतिः शठ एव च । कृतघ्नश्चाधमो लोके परित्याज्यश्शुभार्थिना ॥' इति ।

स्वयं कार्याणि यः काले नानुतिष्ठति पार्थिवः ।
स तु वै सह राज्येन तैश्च कार्यैर्विनश्यति ॥ ४ ॥

अनेन अविचारस्य सकलराज्यनाशकत्वादुचितकाले स्वयमेवाखिलमपि कार्यं विचारयेदिति सूचितम् । तथा च **राजधर्मे**—[2]'चारान्मन्त्रञ्च कोशं च दण्डं चैव विशेषतः । अनुतिष्ठेत्स्वयं राजा सर्वं ह्यत्र प्रतिष्ठितम् ॥' इति ।

अयुक्तचारं दुर्दर्शं अस्वाधीनं नराधिपम् ।
वर्जयन्ति नरा दूरात् नदीपङ्कमिव द्विपाः ॥ ५ ॥

अनेन प्रयुक्तचारः सुदर्शनश्च भवेदिति सूचितम् । तथा च **राजधर्मे**— [3]'उदासीनारिमित्राणां सर्वमेव चिकीर्षितम् । पुरे जनपदे चैव ज्ञातव्यं चारचक्षुषा ॥' इति । [4]'नित्यं राष्ट्रमवेक्षेत गोभिस्सूर्य

---

1. १६८ अध्याये ६ श्लोकस्य पूर्वार्धं १६ श्लोकस्य पूर्वार्धं च । 'परित्याज्यः शुभार्थिना' इत्यत्र 'न सन्धेयः कदाचन' इति पाठ भेदो दृश्यते ।

2. ८६ अध्याये २० श्लोकः ।

3. ८६ अध्याये २१ श्लोकः ।

4. १२० अध्याये ३२ श्लोकः ।

इवोदितः । चारान्स्वानुचरान् विन्द्यात्तथा बुद्ध्यानुसंच्च(च)रेत् ॥' इति । सर्वेद्रष्टृत्वं च भारते कच्चिदध्याये —[1] 'कच्चिद्दर्शयसे नित्यं मनुष्यान् समलङ्कृतान् । उत्थाय काले कालज्ञस्सह पाण्डव मन्त्रिभिः ॥' इति ।

आश्रमवासकेऽपि —[2] 'प्रागेव हि पश्येथाः ये कुर्युर्व्ययकर्म ते । अलङ्कारमथो भोज्यमत ऊर्ध्वं समाचरेः ॥ पश्येथाश्च ततो योधान् सदा त्वं प्रतिहर्षयन् । दूतानां च चराणां च प्रदोषस्ते सदा भवेत् ॥ सदा चापररात्रान्ते भवेत्कार्यार्थनिर्णयः । मध्यरात्रे विहारस्ते मध्याह्ने च सदा भवेत् ॥ सर्वे त्वौपयिकाः कालाः कार्याणां भरतर्षभ । तथैवालंकृतः काले तिष्ठेथा भूरिदक्षिण ॥' इति ॥

ये न रक्षन्ति विषयमस्वाधीना नराधिपाः ।
ते न वृद्ध्या प्रकाशन्ते गिरयस्सागरे यथा ॥ ६ ॥

अनेन विषयारक्षणे अनर्थो भवतीति सूचितम् । तथा च **मनुः** —[3] 'मोहाद्राजा स्वराष्ट्रं यः कर्शयत्यनवेक्षया । सोऽचिराद्भ्रश्यते राज्याज्जीविताच्च सबान्धवः ॥ शरीरं कर्शनात्प्राणाः क्षीयन्ते प्राणिनां यथा । तथा राज्ञामपि प्राणाः क्षीयन्ते राष्ट्रकर्शनात् ॥ राष्ट्रस्य संग्रहे नित्यं विधानमिदमाचरेत् । सुसंगृहीतराष्ट्रो हि पार्थिवः सुखमेधते ॥' इति ॥

आत्मवद्भिर्विगृह्य त्वं देवगन्धर्वदानवैः
अयुक्तचारश्चपलः कथं राजा भविष्यसि ॥ ७ ॥

अनेन बलवद्विरोधो न कर्तव्य इति सूचितम् । तथा **चोद्योगे**

---

1. सभापर्वणि ५ अध्याये ८६ श्लोकः ।
2. पञ्चमाध्याये ३२—३५ श्लोकाः ।
3 सप्तमाध्याये १११—११३ श्लोकाः ।

विदुरः—[1] 'अकामान्कामयति यः कामयानान् परित्यजेत् । बलवन्तं च यो द्वेष्टि तमाहुर्मूढचेतसम् ॥' इति ।

त्वं तु बालस्वभावश्च बुद्धिहीनश्च राक्षस !
ज्ञातव्यं तु न जानीषे कथं राजा भविष्यसि ॥ ८ ॥

अनेन बुद्धिहीनो राजा न तिष्ठतीत्युक्तम् । तथा च उद्योगे—[2] 'यः प्रमाणं न जानाति स्थाने वृद्धौ तथा क्षये । कोशे जनपदे दण्डे न स राज्येऽवतिष्ठते ॥' इति ।

यस्मात्पश्यन्ति दूरस्थान् सर्वानर्थान्नराधिपाः ।
चारेण तस्मादुच्यन्ते राजानो दीर्घचक्षुषः ॥ १० ॥

अनेन चारेण व्यवहिता अपि अर्था अवश्यं विचारणीया इति सूचितम् । तथा च राजधर्मे—[3] 'बाह्यमाभ्यन्तरं चैव पौरजानपदं तथा । चारैः सुविदितं कृत्वा ततः कर्म प्रयोजयेत् ॥' इति ।

तीक्ष्णमल्पप्रदातारं प्रमत्तं गर्वितं शठम् ।
व्यसने सर्वभूतानि नाभिधावन्ति पार्थिवम् ॥ १५ ॥

अनेन एतादृशस्य आपत्सु न कोपि साहाय्यं करोतीति सूचितम् । तथा च कामन्दके — 'लुब्धस्यासंविभागित्वान्न युध्यन्तेऽनुजीविनः । लुब्धानुजीवितैः खेदान्नि [त्स] हीनैर्विनिहन्यते ॥' इति ।

अतिमानिनमग्राह्यं आत्मसंभावितं नरम् ।
क्रोधनं व्यसने हन्ति स्वजनोऽपि महीपतिम् ॥ १६ ॥

---

1. ३३ अध्याये ३२ श्लोकः ।
2. ३४ अध्याये १० श्लोकः ।
3. ८६ अध्याये १९ श्लोकः ।

अनेन स्वजनः ऐश्वर्यदशायां क्रोधनं समये प्रहरतीति सूचितम् । तथा च राजधर्मे —[1] 'यद्वृत्तमुपजीवन्ति प्रकृतिस्थस्य मानवाः । तदेव विषमस्थस्य स्वजनोपि न मृष्यते ॥' इति ॥

नानुतिष्ठति कार्याणि भयेषु न बिभेति च ।
क्षिप्रं राज्याच्च्युतो दीनस्तृणैस्तुल्यो भविष्यति ॥ १७ ॥
शुष्ककाष्ठैर्भवेत्कार्यं लोष्टैरपि च पांसुभिः ।
न तु स्थानात् परिभ्रष्टैः कार्यं स्याद्वसुधाधिपैः ॥ १८ ॥
उपभुक्तं यथा वासः स्रजो वा मृदिता यथा ।
एवं राज्यात्परिभ्रष्टः समर्थोपि निरर्थकः ॥ १९ ॥
अप्रमत्तस्ततो राजा सर्वज्ञो विजितेन्द्रियः ।
कृतज्ञो धर्मशीलश्च स राजा तिष्ठते चिरम् ॥ २० ॥

अनेन धार्मिकस्य राज्यं चिरं तिष्ठतीति सूचितम् । तथा च कामन्दके—[2] 'प्रजानुरागधर्माच्च दुःखोच्छेद्यो हि धार्मिकः ॥' इति ॥

नयनाभ्यां प्रसुप्तोपि जागर्ति नयचक्षुषा ।
व्यक्तक्रोधप्रसादश्च स राजा पूज्यते जनैः ॥ २१ ॥

एतादृशो जनैः पूज्यो भवतीति सूचितम् । तथा च राजधर्मे —[3] 'देवतेव हि सर्वार्थं कुर्याद्राजा प्रसादितः । वैश्वानर इव क्रुद्धः समूलमपि निर्दहेत् ॥' इति ।

परावमन्ता विषयेषु सङ्गवान्
न देशकालप्रविभागतत्त्ववित् ।

1. ९३ अध्याये ३ श्लोकः ।
2. षष्ठे सर्गे ६ श्लोकः ।
3. ८२ अध्याये ३० श्लोकः ।

अयुक्तबुद्धिर्गुणदोषनिश्चये
विपन्नराज्यो नचिराद्विपत्स्यसे ॥ २३ ॥

अनेन सुसमृद्धराज्यस्थोऽपि राजा एतैर्दोषैरचिरात् राज्यभ्रष्टो भवतीति, राज्ञा बलिष्ठेनापि शत्रुर्दुर्बल इति अवमतिः न कर्तव्येति च सूचितम् । तथा च उद्योगे विदुरः — [1] 'सुदुर्बलं नावजानाति कञ्चित् युक्तो रिपुं सेवते बुद्धिपूर्वम् । न विग्रहं रोचयते बलस्थैः काले च यो विक्रमते स धीरः ॥' इति ॥

इति त्रयस्त्रिंशः सर्गः ॥

अथ चतुस्त्रिंशः सर्गः ॥

चतुस्त्रिंशे — तदनु शूर्पणखया प्रकटतरं परिकीर्तितानशेषानपि दोषान् निजभुजबलावलेपेन अविचिन्तयता सकललोकविरावणेन रावणेन किमाकारो रामभद्रः? कीदृशोऽस्य पराक्रमः? कानि कानि चायुधानि खरमुखनिशाचरप्राणहानिकराणि? केन च कारणेन कुलपरम्परागतं प्राज्यं राज्यं परित्यज्य निखिलनिशाचरावासेऽस्मिन् देशे समागतः? इति पृष्टा शूर्पणखा तमेवमभिहितवती —

दीर्घबाहुर्विशालाक्षश्चीरकृष्णाजिनाम्बरः ।
कन्दर्पसमरूपश्च रामो दशरथात्मजः ॥ ५ ॥

भ्राता तस्य महातेजा गुणतस्तुल्यविक्रमः ।
अनुरक्तश्च भक्तश्च लक्ष्मणो नाम वीर्यवान् ॥ १२ ॥

सोऽयमधुना मुनिजनसमुचितवेषोऽपि धिक्कृतशक्रपराक्रमो विक्रमेण शक्रकार्मुकसदृक्षं चापमाकृष्य महाविषानाशीविषानिव रुक्मपुंखान् अनुक्षणं

1. ३३ अध्याये १०६ श्लोकः ।

प्रक्षिपन् रक्षोविक्षोभकरमतिभयंकरं रूपमावहति । यः खल्वर्धाधिकमुहूर्तेन प्रख्यातपराक्रमान् चतुर्दशसहस्रसंख्याकान् निशाचरान् असंख्यैः रुक्मपुंखैः विशिखैर्विमथ्य शतमखमुखमखभुजोऽखिलतपस्विनश्च निर्भयान् विधाय दण्डकारण्यमपि सकलमुनिजनशरण्यमतनुत ॥

रामस्य तु विशालाक्षी पूर्णेन्दुसदृशानना ।
धर्मपत्नी प्रिया भर्तुर्नित्यं प्रियहिते रता ॥ १४ ॥

यदि तस्यामभिप्रायो भार्यार्थे तत्र जायते ।
शीघ्रमुद्ध्रियतां पादो जयार्थमिह दक्षिणः ॥ २२ ॥

अनेन जयार्थं गन्तृभिर्दक्षिणचरणविन्यासपूर्वकमेव गन्तव्यमिति सूचितम् । तथा च ज्योतिर्निबन्धे **गर्गः**—'पूर्वं दक्षिणमुद्धृत्य पादं यायान्नराधिपः । द्वात्रिंशतं पदं गत्वा यानमारुह्य संव्रजेत ॥' इति । **वराहसंहितायामपि**—'दधिदूर्वाक्षतान् गन्धहेमरुक्ममणींस्तथा । दृष्ट्वा स्पृष्ट्वा व्रजेद्राजा दक्षिणेनांघ्रिणा तथा ॥' इति । इत्यभिधाय सपरिवारस्य खरस्य निधनहेतुभूतां आत्मावज्ञां च विज्ञापयामास ॥

इति चतुस्त्रिंशः सर्गः ॥

अथ पञ्चत्रिंशः सर्गः ॥

पञ्चत्रिंशे—तद्वचनश्रवणसमनन्तरं विसृष्टसकलसामाजिकमन्त्रिमण्डलः स्वबुद्ध्यैव गुणदोषविचारपूर्वकं इतिकर्तव्यतां निश्चित्य विशालां यानशालां प्रच्छन्न एव निर्गच्छन् दशमुखः सूतं संचोदयामास—'**रथः संयुज्यताम्**' इति ॥

अथ तत्क्षणमेव सारथिना समानीतं गगनगमनचतुरतुरगपरिकलितं

रथवरमास्थाय समुत्तीर्य पारावारं उल्लंघ्य नानानगोपशोभितान्पर्वतान्समतीत्य च स्त्रीरत्नशोभितानि नगराणि नानानियमनियमितान्तःकरणैः मुनिजनैः परिवृतं सुभद्रनामानं न्यग्रोधं पश्यन्नेव मारीचाश्रममाजगाम। ततो मुनिवृत्तिः मारीचोऽपि भोजनादिना तं सन्तर्प्य केन हेतुना पुनस्तूर्णमेवागतोऽसीत्यपृच्छत्॥

इति पञ्चत्रिंशः सर्गः॥

अथ षट्त्रिंशः सर्गः॥

षट्त्रिंशे— तदनु चतुर्दशसहस्रराक्षसानीकेन सह खरदूषणत्रिशिरसो विना वैरं विनिपात्य, कर्णनासापहरणेन भगिनीमपि विरूपितवन्तं रामं, निखिलमायाविशारदेन भवता रजतबिन्दुविचित्रितेन कपटहाटकमृगरूपेण विलोभितां सीतामपहृत्य, तद्विरहानलदयमानमानसं निर्भयमभिहन्तास्मीति दशाननसमुदीरितवचनमाकर्ण्य, रामशब्दश्रवणमात्रेण संत्रस्तहृदयो मारीचः कृताञ्जलिरेवमुवाच॥

इति षट्त्रिंशः सर्गः॥

अथ सप्तत्रिंशः सर्गः॥

सप्तत्रिंशे— सुलभाः पुरुषा राजन् सततं प्रियवादिनः।
अप्रियस्य तु पथ्यस्य वक्ता श्रोता च दुर्लभः॥ २॥

अनेन स्वप्रयोजनविरोधशङ्कया राजबुद्ध्यनुसारेण वक्तारो मन्त्रिणस्सुलभाः; किन्तु अनर्थपर्यवसायिनीं राजबुद्धिं तिरस्कृत्य शुभोदर्कवक्तारो मन्त्रिणो दुर्लभा इति सूचितम्। तथा च **उद्योगे विदुरनीतौ**—[1]'यो हि

---

1. ३७ अध्याये १६, १५ श्लोकौ।

धर्मं समाश्रित्य हत्वा भर्तुः प्रियाप्रिये । अप्रियाण्याह पथ्यानि तेन राजा सहायवान् ॥ सुलभाः पुरुषा राजन् सततं प्रियवादिनः । अप्रियस्य च पथ्यस्य वक्ता श्रोता च दुर्लभः ॥' इति ॥

त्वद्विधः कामवृत्तो हि दुश्शीलः पापमन्त्रितः ।
आत्मानं स्वजनं राष्ट्रं स राजा हन्ति दुर्मतिः ॥ ७ ॥

अनेन दुर्मन्त्रितः कामवृत्तो नयद्वेषी राजा सकलमन्त्रिवर्गेण ऐश्वर्येण सह नश्यतीत्युक्तम् । तथा च कामन्दके — [1]'अनात्मवान्नयद्वेषी वर्धयन्नरिसंपदः । प्राप्यापि महदैश्वर्यं सह तेन विनश्यति ॥' इति ॥

रामो विग्रहवान् धर्मस्साधुस्सत्यपराक्रमः ।
राजा सर्वस्य लोकस्य देवानां मघवानिव ॥ १३ ॥
कथं नु तस्य वैदेहीं रक्षितां स्वेन तेजसा ।
इच्छसि प्रसभं हर्तुं प्रभामिव विवस्वतः ॥ १४

तदलमनेनानर्थपरम्परानिदानभूतेन निरर्थकसमारंभेण ॥

दृष्टश्चेत्त्वं रणे तेन तदन्तं तव जीवितम् ॥ २१ ॥
जीवितं च सुखं चैव राज्यं चैव सुदुर्लभम् ।
यदीच्छसि चिरं भोक्तुं मा कृथा रामविप्रियम् ॥ २२ ॥

अनेन सर्वानर्थकारणभूतो बलवद्विरोधो न कार्य इति सूचितम् । तथा च प्राचीनाः — 'अनुचितकर्मारंभः स्वजनविरोधो बलीयसा स्पर्धा । प्रमदाजनविश्वासो मृत्युद्वाराणि चत्वारि ॥' इति ॥

स सर्वैस्सचिवैस्सार्धं विभीषणपुरोगमैः ।
मन्त्रयित्वा तु धर्मिष्ठैः कृत्वा निश्चयमात्मनः ॥ २३ ॥

---

1. स्वाम्यनुजीविवृत्ताख्ये षष्ठे सर्गे ४ श्लोकः ।

अनेन धर्मिष्ठैरेव सचिवैः आलोचनापूर्वकं कार्यजातमारभेतेति सूचितम् । तथा च --

दोषाणां च गुणानाञ्च संप्रधार्य बलाबलम् ।
आत्मनश्च बलं ज्ञात्वा राघवस्य च तत्वतः ॥
हिताहितं विनिश्चित्य क्षमं त्वं कर्तुमर्हसि ॥ २४ ॥

अनेन स्वपरबलविचारपूर्वकं, गुणदोषविचारपूर्वकं च समीहितमारभेतेति सूचितम् । तथा च **मनुः** -- [1]'यदा मन्येत भावेन हृष्टं पुष्टं स्वकं बलम् । परस्य विपरीतं च तदा यायाद्रिपुं प्रति ॥ यदा तु स्यात्परिक्षीणो वाहनेन बलेन च । तदासीत प्रयत्नेन शनकैस्सान्त्वयन्रिपुम् ॥' इति । [2]'स्वशक्तिं परशक्तिञ्च नित्यं विद्यात्परात्मनोः । पीड्यानि चैव सर्वाणि व्यसनानि तथैव च ॥ आरभेत ततः कार्यं सञ्चिन्त्य गुरुलाघवम् ।' इति ॥

इति सप्तत्रिंशः सर्गः ॥

अथ अष्टत्रिंश-एकोनचत्वारिंशौ सर्गौ ॥

अष्टत्रिंशैकोनचत्वारिंशयोः -- कदाचिदखिलमुनिजनकदनमाचरतो मम शिक्षणाय विश्वामित्रसमानीतेन दाशरथिना विमुक्तः शरवरो मामादाय गंभीरे सागरांभसि प्राक्षिपत् । तदनु चिरात् चेतनां प्राप्य लङ्कामुपागमम् । तन्मया वार्यमाणोपि रामेण विरोधमाचरन् सनिशाचरां लङ्कापुरीं क्षिप्रमेव आत्मना सह विनष्टां द्रष्टासि ॥

अकुर्वन्तोपि पापानि शुचयः पापसंश्रयात् ।
परपापैर्विनश्यन्ति मत्स्या नागह्रदे यथा ॥ २६ ॥

---

1. सप्तमेध्याये १७१, १७२, श्लोकौ ।
2. नवमाध्याये २९८ श्लोकस्य उत्तरार्धं २९९ श्लोकश्च ।

अनेन स्वतोऽदुष्टा अपि दुष्टसहवासेन नश्यन्ति। अतो दुष्टसहवासो न कार्य इति सूचितम्। तथा च विदुरनीतौ—[1]'असन्त्यागात् पापकृतामपापांस्तुल्यो दण्डः स्पृशते मिश्रभावात्। शुष्केणार्द्रं दह्यते मिश्रभावात् तस्मात् पापैः सह सन्धिं न कुर्यात्॥' इति।

भव स्वदारनिरतः स्वकुलं रक्ष राक्षस॥ ३१॥
परदाराभिमर्शात्तु नान्यत्पापतरं महत्॥ २९॥

अनेन सर्वपापापेक्षया अधिकतरं परदारगमनं वर्जनीयमिति सूचितम्। तथा च मनुः—[2]'वैरिणं नोपसेवेत सहायं चैव वैरिणः। अधार्मिकं तस्करं च परस्यैव च योषितम्॥ न हीदृशमनायुष्यं लोके किञ्चन विद्यते। यादृशं पुरुषस्येह परदारोपसेवनम्॥' इति। [3]'तत्समुत्थो हि लोकस्य जायते वर्णसङ्करः। येन मूलहरो धर्मः सर्वनाशाय कल्पते॥' इति। [4]'आयुष्कामेन वप्तव्यं न जातु परयोषिति।' इति च॥

एवमस्मि तदा मुक्तः कथञ्चित्तेन संयुगे।

ततः कदाचित्तापसोऽयमित्यवज्ञया मृगरूपमुपगृह्य निशाचराभ्यामनुचराभ्यां सह जिघांसुस्तमभ्यधावम्। तेन च विमुक्तेषु विशिखेषु पलायिते च मयि मदनुचरौ निशाचरौ शमितौ। तदनु कथञ्चित् प्राप्तजीवितः समुद्भ्रान्तचेतनोऽहम्—

वृक्षे वृक्षे च पश्यामि चीरकृष्णाजिनाम्बरम्।
गृहीतधनुषं रामं पाशहस्तमिवान्तकम्॥ १५॥

---

1. ३४ अध्याये ७ श्लोकः।
2. चतुर्थाध्याये १३३, १३४ श्लोकौ।
3. अष्टमाध्याये ३५३ श्लोकः।
4. नवमाध्याये ४१ श्लोकस्य उत्तरार्धं।

रकारादीनि नामानि रामत्रस्तस्य रावण ।
रत्नानि च रथाश्चैव त्रासं सञ्जनयन्ति मे ॥ १८ ॥

न ते रामकथा कार्या यदि मां द्रष्टुमिच्छसि ॥ २० ॥

इदं वचो बन्धुहितार्थिना मया
यथोच्यमानं यदि नाभिपत्स्यसे ।
सबान्धवस्त्यक्ष्यसि जीवितं रणे
हतोऽद्य रामेण शरैरजिह्मगैः ॥ २६ ॥

इति अष्टत्रिंश-एकोनचत्वारिंशौ सर्गौ ॥

अथ चत्वारिंशः सर्गः ॥

चत्वारिंशे— तं पथ्यहितवक्तारं मारीचं राक्षसाधिपम् ।
अब्रवीत् परुषं वाक्यमयुक्तं कालचोदितः ॥ २ ॥
संपृष्टेन तु वक्तव्यं सचिवेन विपश्चिता ।
उद्यताञ्जलिना राज्ञे य इच्छेद्भूतिमात्मनः ॥ ९ ॥

अनेन राज्ञा पृष्टैरेव राजोपजीविभिः मर्यादापूर्वकं वक्तव्यमिति सूचितम् । पृष्टेनैव वक्तव्यमित्यत्र विराटपर्वणि —[1] 'न जातु शिक्षेद्राजानमपृच्छन्तं कदाचन । गच्छन्नपि परां भूमिमपृष्टो ह्यनियोजितः ॥ जात्यन्ध इव मन्येत मर्यादामनुचिन्तयन् ॥' इति ।

सोपचारेण वक्तव्यमित्यत्र कामन्दकः —[2] 'प्रविष्टस्सम्यगुचिते स्थाने तिष्ठन् सुवेषवान् । यथाकालमुपासीत राजानं विनयान्वितः ॥

---

1. चतुर्थाध्याये १६ श्लोकस्य पूर्वार्धं २० श्लोकश्च ।
2. षष्ठसर्गे १७—२८ श्लोकाः ।

परस्थानासनं क्रौर्यं औद्धत्यं मत्सरं त्यजेत् । विगृह्य कथनं चैव न कुर्यात् ज्यायसा सह ॥ विप्रलम्भञ्च मायां च दम्भं स्तेयञ्च वर्जयेत् । पुत्रेभ्यश्च नमस्कुर्याद्वल्लभेभ्यश्च भूपतेः ॥ न नर्मसचिवैस्सार्धं किञ्चिदप्यप्रियं वदेत् । ते हि मर्माण्यभिन्नन्ति प्रहासेनैव संसदि ॥ भर्तुरेवासने दृष्टिं मुहुर्नान्यत्र निक्षिपेत् । ब्रूयात् किमयमित्यस्य तिष्ठेदास्यं विलोकयन् ॥ कोऽत्रेत्यहमिति ब्रूयात्सम्यगाज्ञापयेति च । आज्ञां चावितथां कुर्यात् यथाशक्त्यवलम्बितः ॥ उच्चैः प्रहसनं कासं ष्ठीवनं कुत्सनं तथा । जृम्भणं गात्रभङ्गं च पर्वस्फोटं च वर्जयेत् ॥ प्रविश्य सानुरागस्य चित्तं चित्तज्ञसम्मतः । समर्थयंश्च तत्पक्षं साधु भाषेत भावितम् ॥ तन्नियोगेन च ब्रूयात् अर्थं सुपरिनिश्चितम् । सुखप्रबन्धगोष्ठीषु वादे वा वादिना मृतम् ॥ विजानन्नपि न ब्रूयात् भर्तुः क्षिप्रोत्तरं वचः ॥ प्रवीणोपि हि मेधावी वर्जयेदभिमानिताम् ॥ यद्य-प्युच्चैर्विजानीयान्नीचैस्तदपि कीर्तयेत् ॥ कर्मणां तस्य वैशिष्ट्यं कथये-द्विनयान्वितः ॥ जयाज्ञापय जीवेति नाथ देवेति चादरात् । आज्ञां तस्य प्रतीच्छन्तो भृत्याः कुर्युरुपासनम् ॥' इति ।

नन्वेवं सति नीतिज्ञो मारीचो रावणेनापृष्टः कथमुक्तवानिति चेत्, तन्न । उन्मत्तेन राज्ञा प्रश्नाकरणेपि कार्यात्ययप्रसक्तौ निगृह्यापि वक्तव्यत्वात् । तथा **चोद्योगे**— [1]'शुभं वा यदि वा पापं द्वेष्यं वा यदि वा प्रियम् । अपृष्टस्तस्य तद्ब्रूयात् यस्य नेच्छेत्पराभवम् ॥' इति । **कामन्दकेपि**—— [2]'आपद्युन्मार्गगमने कार्यकालात्ययेषु च । अपृष्टोपि हितान्वेषी ब्रूयात् कल्याणभाषितम् ॥' इति ॥

तथा च पृष्टेनैव वक्तव्यमिति कथं वक्तुं शक्यत इति चेन्न । पृष्टेनैव वक्तव्यमित्येतस्य स्वस्थावस्थराजविषयत्वात् । आपदि उत्पथं प्रतिपन्ने

1. ३४ अध्याये ४ श्लोकः ।
2. षष्ठसर्गे २९ श्लोकः ।

च राजनि केशग्रहणपूर्वकमपृष्टेनापि वक्तव्यमेव । तथा **चोद्योगे** विदुरं प्रति भगवद्वाक्यम् — [1] 'व्यसने क्लिश्यमानञ्च यो मित्रं नाभिपद्यते । अनर्थज्ञो यथाशक्ति तं नृशंसं विदुर्बुधाः ॥ आ केशग्रहणान्मित्रमकार्यात्संनिवर्तयन् । अवाच्यः कस्यचिद्भवति कृतयत्नो महाबलः ॥' इति ।

प्रत्युत निगृह्य कार्यं वक्तुः श्लाघ्यतामाह **कामन्दकः** — [2] 'सज्जमानमकार्येषु सुहृदो वारयन्ति ये । न केवलं ते सुहृदो गुरवो गुरवो हि ते ॥' इति । एवं निगृह्य वचनमापन्नराजविषयम् । पृष्टेन वक्तव्यमित्येतत् स्वस्थावस्थराजविषयमित्युभयोर्विषयभेदादविरोध इति ॥

पञ्च रूपाणि राजानो धारयन्त्यमितौजसः ।
अग्नेरिन्द्रस्य सोमस्य यमस्य वरुणस्य च ॥ १२ ॥
औष्ण्यं तथा विक्रमं च सौम्यं दण्डं प्रसन्नताम् ।
धारयन्ति महात्मानो राजानः क्षणदाचर ॥
तस्मात्सर्वास्ववस्थासु मान्याः पूज्याश्च पार्थिवाः ॥ १३ ॥

अनेनाग्न्यादिदिक्पालरूपत्वात् राजा पूज्यो मान्यश्चेति सूचितम् । तथा च **राजधर्मे** — [3] 'कुरुते पञ्च रूपाणि कालयुक्तानि यस्सदा । राजा भोजो विराट् सम्राट् क्षत्रियो भूपतिर्मतः । य एभिः स्तूयते शब्दैः कस्तं नार्चितुमिच्छति ॥' इति ॥

तदधुना निखिलमायाविशारदेन भवता रजतबिन्दुविचित्रितेन कपटहाटकमृगरूपेण सुदूरमपवाहिताभ्यां रामलक्ष्मणाभ्यां विरहितां सीतामाहर्तुमिच्छामि ॥

---

1 ९३ अध्याये १०, ११ श्लोकौ ।

2. पञ्चमसर्गे ४२ श्लोकः ।

3. ६८ अध्याये ४१ श्लोकस्य पूर्वार्धं ५४ श्लोकश्च । नृपतेः इत्यत्र कुरुतै इति पाठः मुद्रितपुस्तके दृश्यते ।

एवं कृत्वा त्विदं कार्यं यथेष्टं गच्छ राक्षस ।
राज्यस्यार्धं प्रयच्छामि मारीच तव सुव्रत ॥ २३ ॥

न चेत्करोषि मारीच हन्मि त्वामहमद्य वै ।
राज्ञो हि प्रतिकूलस्थो न जातु सुखमेधते ॥ २६ ॥

अनेन राजद्वेषी न सुखं प्राप्नोति । तत्प्रसादे चैश्वर्यप्राप्तिरिति सूचितम् । तथा च मनुः — [1] 'त(य)स्य प्रसादे पद्मा श्रीर्विजयश्च पराक्रमे । मृत्युश्च वसति क्रोधे सर्वतेजोमयो हि सः ॥ यस्तु तं द्वेष्टि संमोहात् स विनश्यत्यसंशयम् । तस्य ह्याशु विनाशाय राजा प्रकुरुते मनः ॥' इति । राजधर्मेपि — [2] 'न हि राज्ञः प्रतीपानि कुर्वन्सुखमवाप्नुयात् । पुत्रो भ्राता वयस्यो वा यद्वाप्यात्मसमो भवत् ॥ राजाभिपन्नस्य कुतस्सुखानि राजाभ्युपेतं सुखिनं करोति ।' इति ॥

आसाद्य तं जीवितसंशयस्ते
मृत्युर्ध्रुवो ह्यद्य मया विगृह्य ।
एतद्यथावत्परिगृह्य बुद्ध्या
यदत्र कृत्यं कुरु तद्यथा त्वम् ॥

अनेन यत्र अयुद्धे आपत्प्राप्तिविनिर्णयः, युद्धे च संशयो जीवितस्य, तत्र युद्धं प्रवर्तितव्यमिति सूचितम् । तथा च उद्योग— 'यत्रायुद्धे ध्रुवो मृत्युः युद्धे जीवितसंशयः । तमेव कालं युद्धस्य प्रवदन्ति मनीषिणः ॥' इति ॥

इति चत्वारिंशः सर्गः ॥

---

1. सप्तमाध्याये ११, १२ श्लोकौ ।
2. ६८ अध्याये ४९, श्लोकः ५८ श्लोकस्य उत्तरार्धं च ।

अथ एकचत्वारिंशः सर्गः ॥

एकचत्वारिंशे— आज्ञप्तो रावणेनेत्थं प्रतिकूलं निशाचरः ।
अब्रवीत् परुषं वाक्यं मारीचो राक्षसाधिपम् ॥१॥

शत्रवस्तव सुव्यक्तं हीनवीर्या निशाचर ।
इच्छन्ति त्वां विनश्यन्तं उपरुद्धं बलीयसा ॥ ४ ॥

अमात्यैः कामवृत्तो हि राजा कुपथमाश्रितः ।
निग्राह्यः सर्वदा सद्भिर्न निगृह्यो निगृह्यसे ॥ ७ ॥

अनेन उत्पथं प्रतिपन्नो राजा निग्राह्य इति सूचितम् । तदुक्तं कामन्दके— [1]‘राजानं ये ह्युपेक्षन्ते सज्जमानं विकर्मसु । ते गच्छन्त्यकृतात्मानस्सह तेन पराभवम् ॥’ इति ॥

धर्ममर्थं च कामञ्च यशश्च जयतां वर ।
स्वामिप्रसादात्सचिवाः प्राप्नुवन्ति निशाचर ॥ ८ ॥

विपरीते तु तत्सर्वं व्यर्थं भवति रावण ।
व्यसनं स्वामिवैगुण्यात् प्राप्नुवन्तीतरे जनाः ॥ ९ ॥

अनेन सचिवानां स्वामिप्रसादात् श्रेयःप्राप्तिरिति सूचितम् । तथा च राजधर्मे — [2]‘राजा प्रगल्भं पुरुषं करोति राजा कृशं वै कुरुते मनुष्यम् । राजाभिपन्नस्य कुतस्सुखानि राजाभ्युपेतं सुखिनं करोति ॥’ इति ॥

राजमूलो हि धर्मश्च जयश्च जयतां वर ।
तस्मात्सर्वास्ववस्थासु रक्षितव्या नराधिपाः ॥ १० ॥

---

1. कामन्दके ६ सर्गे ५० श्लोकः ।
2. ६८ अध्याये ५८ श्लोकः ।

राज्यं पालयितुं शक्यं न तीक्ष्णेन निशाचर ।
न चापि प्रतिकूलेन नाविनीतेन राक्षस ॥ ११ ॥

अनेन तीक्ष्णेन राज्यपरिपालनं कुर्वन् क्षिप्रमेव विनश्यतीति सूचितम् । तथा च राजधर्मे — [1] 'आदाता ह्यनभिस्नेहो दण्डेनावर्तयन्प्रजाः । साहसप्रकृती राजा क्षिप्रमेव विनश्यति ॥' इति ।

ये तीक्ष्णमन्त्राः सचिवा भज्यन्ते सह तेन ते ।
विषमे तु रथाः शीघ्रा मन्दसारथयो यथा ॥ १२ ॥

अनेन तीक्ष्णमन्त्रिभी राज्ञो नाशो भवतीति । अतः समीचीनमन्त्री संपादनीय इति सूचितम् । तथा च राजधर्मे — [2] 'असत्पापिष्ठसचिवो वध्यो लोकस्य धर्महा । सहैव परिवारेण क्षिप्रमेव विनश्यति ॥' इति । 'व्यथयेद्धि स राजानं मन्त्रिभिस्सहितोऽनृजुः । मारुतोपहितश्छिद्रे प्रविश्याग्निरिव द्रुमम् ॥ [3] 'मुख्यानमात्यान्यो हित्वा निहीनान्कुरुते प्रियान् । स वै व्यसनमासाद्य गाधमार्तो न विन्दति ॥' इति । तथा च कामन्दके — [4] 'निरुन्धानास्सतां मार्गं भक्षयन्ति महीपतिम् । क्रूरात्मानस्तु सचिवाः तस्मात् सुसचिवो भवेत् ॥' इति । 'प्रख्यातवंशमक्रूरं लोकसंग्राहिणं शुचिम् । कुर्वीतात्महिताकाङ्क्षी परिवारं महीपतिः ॥' इति । तथा च पुराणसारे — 'क्रूरं व्यसनिनं स्तब्धमप्रगल्भमसमानुपम् । मूर्खमन्यायचिन्तञ्च नाधिपत्ये नियोजयेत् ॥ पण्डितेषु गुणास्सर्वे मूर्खे दोषा भवन्ति हि । तस्मान्मूर्खसहस्रेषु प्राज्ञमेकं नियोजयेत् ॥ तस्माद्भूमीश्वरोऽमात्यं धर्मकामार्थसिद्धये । गुणवन्तमुपादाय गुणहीनं विसर्जयेत् ॥ प्राज्ञे नियोजितेऽमात्ये सन्ति राज्ञ-

---

1. ९२ अध्याये १५ श्लोकः ।
2. ९२ अध्याये ९ श्लोकः ।
3. ९३ अध्याये ३२ श्लोकः ।
4. पञ्चमसर्गे ११ श्लोकः ।

स्त्रयो गुणाः । यशः स्वर्गनिवेशश्च पुष्कलश्च धनागमः ।। प्रभुत्वं समदृष्टित्वं राज्ञः स्याद्राजविद्यया । तामेव यो न जानाति नासौ मन्त्री न वा नृपः ।। दुर्मन्त्रिणं कमुपयान्ति न नीतिदोषाः सन्तापयन्ति कमपथ्यभुजं न रोगाः । कं स्त्री न दर्पयति कं न निहन्ति मृत्युः कं स्त्रीगतं न विषयाः परितापयन्ति ।।' इति ।

बहवस्साधवो लोके युक्तधर्ममनुष्ठिताः ।
परेषामपराधेन विनष्टास्सपरिच्छदाः ।। १३ ।।

अनेन समीचीनोपि राजा दुष्टसहवासेन नष्टो भवतीति सूचितम् । तथा च कामन्दके —[1] 'श्रुतशीलोपसंपन्नानकस्मादेव दुर्जनः । अन्तः प्रविश्य दहति शुष्कवृक्षमिवानलः ।।' इति ।।

स्वामिना प्रतिकूलेन प्रजास्तीक्ष्णेन रावण ।
रक्ष्यमाणा न वर्धन्ते मेषा गोमायुना यथा ।।

अवश्यं विनशिष्यन्ति सर्वे रावण राक्षसाः ।
येषां त्वं कर्कशो राजा दुर्बुद्धिरजितेन्द्रियः ।।

अनेन दुष्टेन राज्ञा रक्षिताः प्रजा नश्यन्तीति सूचितम् । तथा च कामन्दके —[2] 'असत्यता निष्ठुरताऽकृतज्ञता भयं प्रमादोऽलसता विषादिता । तथाभिमानो ह्यतिदीर्घसूत्रता तथाङ्गनाक्षादि विनाशनं श्रियः ।।' इति ।।

निवार्यमाणस्तु मया हितैषिणा
न मृष्यसे वाक्यमिदं निशाचर ।

---

1. चतुर्थसर्गे १६ श्लोकः ।
2. एकादशसर्गे ४० श्लोकः ।

परेतकल्पा हि गतायुषो नराः
हितं न गृह्णन्ति सुहृद्भिरीरितम् ॥ २० ॥

अयमर्थ **उद्योगे** — [1] 'यस्मै देवाः प्रयच्छन्ति पुरुषाय पराभवम् । बुद्धिं तस्यापकर्षन्ति सोऽवाचीनानि पश्यति ॥ बुद्धौ कलुषभूतायां विनाशे प्रत्युपस्थिते । अनयो नयसङ्काशो हृदयान्नापसर्पति ॥' इति ॥

इति एकचत्वारिंशः सर्गः ॥

अथ द्विचत्वारिंश-त्रिचत्वारिंश-चतुश्चत्वारिंशाः सर्गाः ॥

तेषु — तदनु मारीचः प्रयत्नशतैरप्यनिवार्यमाणे रावणे, तस्मिन् तदीयामेवाभ्यर्थनामभ्युपेत्य, तेन सहाधिरुह्य रथं, समेत्य रामाश्रमाभ्यर्णं, अवतीर्य च रथात्, परिगृह्य कपटहाटकमृगवेषं, सीतां वञ्चयितुं, पञ्चवटीमगाहत । तत्र च विचित्रितरूपधारिणं, मणिप्रवरशृङ्गं, इन्द्रनीलमणिश्रवणं, असितोत्पलवदनं, इन्दुधवलोदरं, अतिमनोहरं तं मृगवरमवलोक्य, जातकुतुका सीता, राममेवमवादीत् ॥

कामवृत्तमिदं रौद्रं स्त्रीणामसदृशं मतम् ।
वपुषा त्वस्य सत्वस्य विस्मयो जनितो मम ॥ २१ ॥

तदधुना समानेयोऽयं मृग इति । अनेन स्त्रीभिः कौतुके दृष्टिः न कर्तव्येति सूचितम् । तथा च **उद्योगपर्वणि विदुरनीतौ**— [2] 'अनाम्नायमला वेदाः ब्राह्मणस्याव्रतं मलम् । कौतूहलमला साध्वी विप्रवासमलाः स्त्रियः ॥' इति । **स्कान्दे स्त्रीधर्मे** 'दूरतो वर्जयेद्दोषान् समाजोत्सवदर्शनम् । न गच्छेत्तीर्थयात्रादिविवाहप्रेक्षणादिषु ॥' इति । ततः,

---

1. ३५ अध्याये ८१, ८२ श्लोकौ ।
2. ३९ अध्याये ७९, ८० श्लोकयोरुत्तरार्धे ।

शङ्कमानस्तु तं दृष्ट्वा लक्ष्मणो राममब्रवीत् ।
तमेवैनमहं मन्ये मारीचं राक्षसं मृगम् ॥ ५ ॥
चरन्तो मृगयां हृष्टाः पापेनोपधिना वने ।
अनेन निहता राजन् राजानः कामरूपिणा ॥ ६ ॥
मन्ये मायाविदो मायामृगरूपमिदं कृतम् ॥ ६½ ॥
मृगो ह्येवंविधो रत्नविचित्रो नास्ति राघव ।
जगत्यां जगतीनाथ माया ह्येषा न संशयः ॥ ८ ॥

इति लक्ष्मणवाक्यश्रवणजनितकोपा सीता राममेवमाह—

आर्यपुत्राभिरामोऽयं मृगो हरति मे मनः ।
आनयैनं महाबाहो क्रीडार्थं नो भविष्यति ॥ १० ॥
एवं सीतावचः श्रुत्वा तं दृष्ट्वा मृगमद्भुतम् ।
लोभितस्तेन रूपेण सीतया च प्रचोदितः ॥
उवाच राघवो हृष्टो भ्रातरं लक्ष्मणं वचः ॥ २३ ॥
पश्य लक्ष्मण वैदेह्याः स्पृहां मृगगतामिमाम् ॥ २३½ ॥

अत्र मृगयाव्यसनदोषान् जानन्नपि रामो, 'लोभितस्तेन रूपेण' इत्यनयोक्त्या महापुरुषाणामपि भवितव्यानुरूपतया बुद्धिव्यामोहो भवतीति सूचितम् ॥

मृगयाव्यसनदोषाश्च कामन्दके — [1]'यानक्षोभो यानपातो यानाभिहरणात्तथा । क्षुत्पिपासाश्रमायासाः शीतवातोष्णपीडनम् ॥ अभियातस्य संगत्या यानव्यसनजं महत् । दुःखप्रतप्तसिकताः कुशकण्टकभूमयः ॥ वृक्षसङ्कटता(लितात्) देशाल्लताकण्टकपातनम् । शैलपातलताजालस्थलवल्मीकपीडनम् । स्वसैन्यश्च स्वसैन्यैश्च परिभिन्नैर्निवारणम् ॥ ऋक्षवानरमातङ्ग-

1. सप्तव्यसनवर्गनामके १५ सर्गे १९—२६ श्लोकाः ।

सिंहव्याघ्रभयानि च। वनानां ध्वंसनं रोहो दिङ्मोहभ्रमणानि च। इत्यादि पृथिवीन्द्राणां मृगयाव्यसनं स्मृतम् ॥ जितश्रमत्वमायाम आममेदः-कफक्षयः। चरस्थिरेषु लक्ष्येषु स्थावर्णे सिद्धिरुत्तमा ॥ मृगयायां गुणानेतानाहुरन्ये न तत्क्षमम्। दोषाः प्राणहराः प्रायः तस्मात्तद्व्यसनं महत् ॥ ओमादया हि जीर्यन्ते योगेनैव दिवानिशम्। वरेषु [नवेषु] यत्र लक्ष्येषु बाणसिद्धिश्च जायेत ॥' इति ॥

महापुरुषाणां बुद्धिव्यामोहो भवतीत्यत्र **सभापर्वणि** धर्मः— [1]'असंभवे हेममयस्य जन्तोः तथापि रामो लुलुभे मृगाय। प्रायस्समासन्नपराभवाणां धियो विपर्यस्ततरा भवन्ति ॥' इति ॥ प्राचीना अपि—'रामो हेममृगं न वेत्ति नहुषो याने युनक्ति द्विजान् विप्रादेव सवत्सधेनुहरणे जाता मतिश्चार्जुने। द्यूते भ्रातृचतुष्टयं च महिषीं धर्मात्मजो दत्तवान् प्रायस्सत्पुरुषो ह्यनर्थसमये बुद्ध्या परित्यज्यते ॥' इति। **सभापर्वणि** — [2]'धातुर्नियोगाद्भूतानि प्राप्नुवन्ति शुभाशुभम्। न निवृत्तिस्तयोरस्ति देवितव्यं पुनर्यदि ॥ अक्षद्यूते समाह्वानं नियोगात्स्थविरस्य च। जानन्नपि क्षयकरं नातिक्रमितुमुत्सहे ॥' इति ॥

कस्य रूपमिदं दृष्ट्वा जाम्बूनदमयप्रभो।
नानारत्नमयं दिव्यं न मनो विस्मयं व्रजेत् ॥ २९ ॥
मांसहेतोरपि मृगान् विहारार्थं च धन्विनः।
घ्नन्ति लक्ष्मण राजानो मृगयायां महावने ॥ ३० ॥

अनेन राज्ञां मृगया न दोषायेति सूचितम्। तथा **चादिपर्वणि** मृगं प्रति पाण्डुः—[3]'अच्छद्मना मायया च मृगाणां वध इष्यते। स

1. ७६ अध्याये ५ श्लोकः।
2. ७६ अध्याये ३, ४ श्लोकौ।
3. ११७ अध्याये १३ श्लोकः।

एत्र धर्मो राज्ञां तु तद्धि त्वं किन्तु गर्हसे ॥' इति। नैषधे श्रीहर्षोऽपि-
[1]'अबलस्वकुलाशिनो झषान् निजनीडद्रुमपीडिनः खगान्। अनवद्य-
तृणार्दिनो मृगान् मृगयाऽघाय न भूभृतां घ्नताम् ॥' इति ॥

धनानि व्यवसायेन विचीयन्ते महावने।
धातवो विविधाश्चापि मणिरत्नसुवर्णिनः ॥ ३ ॥

तत्सारमखिलं नृणां धनं निचयवर्धनम्।
मनसा चिन्तितं सर्वं यथा शुक्रस्य लक्ष्मण ॥ ३१ ॥

मनसा चिन्तितं शुक्रस्य निचयवर्धनं इत्ययमर्थ उद्योगे सुपर्ण-नारदसंवादे—[2]'अथाह गालवं दीनं सुपर्णः पततां वरः। निर्मितं वह्निना भूमौ वायुना शोधितं तथा॥ यस्माद्धिरण्मयं सर्वं हिरण्यं तेन चोच्यते। धत्ते धारयते चेदमेतस्मात् कारणाद्धनम्॥ तदेतत्त्रिषु लोकेषु धनं तिष्ठति शाश्वतम्! नित्यं प्रोष्ठपदाभ्यां च शुक्रे धनपतौ तथा॥ मनुष्येभ्यस्समादत्ते शुक्रः चित्तार्जितं धनम्। अजैकपादहिर्बुध्न्यै रक्ष्यते धनदेन च॥ एवं न शक्यते लब्धुं अलब्धव्यं द्विजर्षभ॥' इति॥

अर्थी येनार्थकृत्येन संव्रजत्यविचारयन्।
तमर्थमर्थशास्त्रज्ञाः प्राहुरर्थ्याश्च लक्ष्मण ॥ ३२ ॥

तदधुना कुम्भसंभवमुनिरिव वातापिं अखिलमायाविशारदमध्यमुं वधिष्यामि ॥

इह त्वं भव सन्नद्धो यन्त्रितो रक्ष मैथिलीम्।
अस्यामायत्तमस्माकं यत्कृत्यं रघुनन्दन ॥ ४५ ॥

इत्यभिधाय जनकजामनोहारिणं हरिणमाहर्तुमनुजगाम। तदनु मायाभि-

---

1. द्वितीयसर्गे १० श्लोकः।

2. ११४ अध्याये १-४ श्लोकाः।

ज्ञेन मारीचेन सुदूरमपवाहितो रामभद्रः कोपाकुलहृदयः तद्वधाय दिनकरकरप्रकरप्रकाशं अरिमर्दनं शरवरं दृढधनुषि सन्धाय ब्रह्मविनिर्मितमस्त्रं प्रायुङ्क्त । तेन शरेण भृशमभिहतो मारीचो रामवचोनिभेन आर्तस्वरेण सह कार्तस्वरमयीं तनुं विजहौ । तदनु धरातलनिपतितं अपरमिव धराधरं निशाचरमवलोक्य पूर्वोदीरितं लक्ष्मणवचनं मनसि विचिन्तयन् आर्तस्वरश्रवणेन लक्ष्मणस्सीता च कामवस्थां गमिष्यत इति चिन्ताकुलितान्तःकरणः सत्वरमाश्रमं प्रति प्रतस्थे ॥

इति द्विचत्वारिंश-त्रिचत्वारिंश-चतुश्चत्वारिंशाः सर्गाः ॥

अथ पञ्चचत्वारिंशः सर्गः ॥

पञ्चचत्वारिंशे — अत्रान्तरे भर्तुरार्तस्वरसदृशमाक्रन्दनमाकर्ण्य विदीर्णहृदया हृदयदयितप्रेम्णा कर्तव्यमजानाना जानकी, 'जानीहि रक्षोवशमापन्नं भ्रातरं' इति सौमित्रिमादिदेश । ततश्च गुरोर्भ्रातुराज्ञापरिपालनाय गमनाय, मतिमकुर्वति लक्ष्मणे, तत्क्षणमेव समुत्पन्नकोपया सीतया,

सौमित्रे मित्ररूपेण भ्रातुस्त्वमसि शत्रुवत् ।
यस्त्वमस्यामवस्थायां भ्रातरं नाभिपद्यसे ॥ ५ ॥
इच्छसि त्वं विनश्यन्तं रामं लक्ष्मण मत्कृते । ५½ ॥
व्यसनं ते प्रियं मन्ये स्नेहो भ्रातरि नास्ति ते ॥ ६½ ॥

इत्यादिपरुषतरवचनैः निर्भर्त्सितोऽपि लक्ष्मणः सविनयमेवमवादीत्— 'आर्ये, अकार्यमिदं ममाख्यासि । विख्यातपराक्रमस्य लोकत्रयैकधनुर्धरस्य शौर्यराशेरार्यस्य कथमल्पसारात् मृगरूपधरात् निशाचरात् भयमाशङ्कसे । तत्प्रसीद; संत्यज्यतां सन्तापः; कुशलिना रामचन्द्रेण समागमनमेष्यसि । अहं तु,

न्यासभूता हि वैदेहि न्यस्ता मयि महात्मना ।
रामेण त्वं वरारोहे न त्वां त्यक्तुमिहोत्सहे ॥ १७ ॥

न्यासरक्षणं कर्तव्यमित्ययमर्थः प्राक् प्रपञ्चितः ॥

ततश्च कोपसंरक्तलोचनया सीतया—

अनार्यकरुणारंभ नृशंस कुलपांसन ।
अहं तव प्रियं मन्ये रामस्य व्यसनं महत् ॥ २२ ॥

नैतच्चित्रं सपत्नेषु पापं लक्ष्मण यद्भवेत् ।
त्वद्विधेषु नृशंसेषु नित्यं प्रच्छन्नचारिषु ॥ २३ ॥

सुदुष्टस्त्वं वने राममेकमेकोऽनुगच्छसि ।
मम हेतोः प्रतिच्छन्नः प्रयुक्तो भरतेन वा ॥ २४ ॥

इत्यादि सपरुषमभिधाय दलदरविन्दलोचनं इन्दुवदनं रामचन्द्रमन्तरेण क्षणमात्रमपि जीवितुं अशक्नुवती तव समक्षमेव गोदावरीनिपतनरज्जुबन्धनाग्निप्रवेशनविषभक्षणादिना प्राणांस्त्यक्ष्यामि ॥

न त्वहं राघवादन्यं पदापि पुरुषं स्पृशे ॥ २७ ॥

इति निर्दयमभिधाय सोदराभिघातं प्ररुरोद । तदनु निश्शङ्कमेव क्रूरतरं वदन्तीं सीतां विजितेन्द्रियः सौमित्रिरेवमुवाच—

उत्तरं नोत्सहे वक्तुं दैवतं भवती मम ।
वाक्यमप्रतिरूपं तु न चित्रं स्त्रीषु मैथिलि ॥ २८ ॥

स्वभावस्त्वेष नारीणामेवं लोकेषु दृश्यते ।
विमुक्तधर्माश्चपलास्तीक्ष्णा भेदकराः स्त्रियः ॥ २९ ॥

इत्यभिधाय राममन्वेषितुं जगाम । स्त्रीणां बन्धुभेदकत्वं च कामन्दके—

[1]'महान्तोपि हि भिद्यन्ते स्त्रीभिरद्भिरिवाचलाः ॥' इति । प्राचीना अपि—'लवणजलान्ता नद्यः स्त्रीभेदान्तानि बन्धुहृदयानि ॥' इति ॥

ननु, 'शतह्रदानां लोलत्वं शस्त्राणां तीक्ष्णतां तथा । गरुडानिलयोश्शैघ्र्यं अनुगच्छन्ति योषितः ॥' इति स्त्रीदोषानभिधाय, 'दोषैरेतैर्विवर्जिता' इत्यगस्त्यवचनेन [2]'त्वद्विधास्तु गुणैर्युक्ता दृष्टलोकपरावराः' इत्यनसूयावचनेन (च) स्त्रीदोषभूततीक्ष्णत्वाद्यभावावगमात् 'मम हेतोः प्रतिच्छन्नः' इति सीतायास्तीक्ष्णवचनं, 'तीक्ष्णा भेदकराः स्त्रियः' इति लक्ष्मणवचनं च विरुद्धमिति चेन्न । सीतावचनस्य भर्तुरार्तशब्दश्रवणसंजातखेदवशेन आपदि रामोऽवश्यं संरक्षणीय इत्येतदभिप्रायकत्वात् । लक्ष्मणवचनमपि अयुक्ततरसीतावचनश्रवणजनितकोपवशेन प्रवृत्तम् । अगस्त्यादिवचनं तु स्वतः सरला सीतेत्यभिप्रायकमिति न विरोधः ॥

तथा च युद्धकाण्डे स्वतस्सारल्यबोधकं उपद्रवकारिणीनां राक्षसीनां वधायोद्युक्तं हनूमन्तं प्रति सीतावचनम्— [3]'भाग्यवैषम्ययोगेन पुरा दुश्चरितेन च । मयैतत्प्राप्यते सर्वं स्वकृतं ह्युपभुज्यते ॥ पापानां वा शुभानां वा वधार्हाणां प्लवङ्गम । कार्यं करुणमार्येण न कश्चिन्नापराध्यति ॥ लोकहिंसाविहाराणां रक्षसां कामरूपिणाम् । कुर्वतामपि पापानि नैव कार्यमशोभनम् ॥' इति । एवञ्च भिन्नविषयत्वान्न कस्यापि विरोध इति ॥

इति पञ्चचत्वारिंशः सर्गः ॥

---

1. द्वितीयसर्गे ४५ श्लोकस्य पूर्वार्धं ।
2. अयोध्याकाण्डे ११७ सर्गे २७ श्लोकस्य पूर्वार्धं ।
3. युद्धकाण्डे ११६ सर्गे ४०, ४५-४६ श्लोकाः ।

अथ षट्चत्वारिंशः सर्गः ॥

षट्चत्वारिंशे — अत्रान्तरे धृतकाषायपटः कपटसंन्यासवेषो दशाननो रामलक्ष्मणविरहितां जनकनन्दिनीं अपहर्तुं पर्णशालाभ्यर्णमाससाद ।

तमुग्रं पापकर्माणं जनस्थानरुहा द्रुमाः ।
समीक्ष्य न प्रकम्पन्ते न प्रवाति च मारुतः ॥ ६ ॥
शीघ्रस्रोताश्च तं दृष्ट्वा वीक्षन्तं रक्तलोचनम् ।
स्तिमितं गन्तुमारेभे भयाद्गोदावरी नदी ॥ ७ ॥

ततः पर्णशालायामासीनामदुष्टहृदयां वैदेहीं दुष्टचेता निशाचरः सादरमिदं निजगाद —

का त्वं काञ्चनवर्णाभे पीतकौशेयवासिनि ।
कमलानां शुभां मालां पद्मिनीव हि बिभ्रती ॥ १५ ॥
ह्रीः कीर्तिः श्रीश्शुभा लक्ष्मीरप्सरा वा शुभानने ।
भूतिर्वा त्वं वरारोहे रतिर्वा स्वैरचारिणी ॥ १६ ॥
वरं माल्यं वरं भोग्यं वरं वस्त्रं च शोभने ।
भर्तारं च वरं मन्ये त्वद्युक्तमसितेक्षणे ॥ २६ ॥
कासि कस्य कुतश्च त्वं किंनिमित्तश्च दण्डकान् ।
एका चरसि कल्याणि घोरान्राक्षससेवितान् ॥ ३१ ॥
इति प्रशस्ता वैदेही रावणेन दुरात्मना ।
द्विजातिवेषपिहितं दृष्ट्वा रावणमागतम् ।
सर्वैरतिथिसत्कारैः पूजयामास मैथिली ॥ ३२ ॥

इति षट्चत्वारिंशः सर्गः ॥

अथ सप्तचत्वारिंशः सर्गः ॥

सप्तचत्वारिंशे — रावणेन तु वैदेही तथा पृष्टा जिहीर्षता ।
परिव्राजकलिङ्गेन शशंसात्मानमात्मना ॥ १ ॥
ब्राह्मणश्चातिथिश्चैव ह्यनुक्तो हि शपेत माम् ।
इति ध्यात्वा मुहूर्तं तु सीता वचनमब्रवीत् ॥

अत्र यद्यपि 'वीक्षिता वीक्षते नान्यं हसिता न हसत्यपि । भाषिता नाभिभाषेत सा साध्वी साधुलक्षणा ॥' इति **व्यासवचन**पर्यालोचनया परपुरुषाभिभाषणं निषिद्धम् । तथापि पत्यादिना भाषणे न दोषः । तथा च **शंखः** — 'न परपुरुषमभिभाषेत अन्यत्र वणिक्प्रव्रजितवैद्यवृद्धेभ्यः' इति । अत एवाग्रे रावणोऽयमिति निश्चयानन्तरं साक्षात्संभाषणमयुक्त-मित्यभिप्रायेण 'तृणमन्तरतः कृत्वा रावणं प्रत्यभाषत' इति तृणान्तरकरण-प्रतिपादनमुपपन्नम् ॥

यद्वा अन्यस्य वक्तुरभावात् स्वयमेव भाषितवतीत्यविरोधः । तथा च **वनपर्वणि** कोटिकास्यं प्रति द्रौपदीवचनं — [1] 'अहं ह्यरण्ये कथमेक-मेका त्वामालपेयं निरता स्वधर्मे । न त्वेव वक्तास्ति तवेह वाक्यमन्यो नरो वाप्यथवापि नारी ॥ एका ह्यहं संप्रति तेन वाचं ददानि वै भद्र निबोध चेदम् ।' इति । अत एवाग्रे रावणं प्रति सीतावचनम् — रोषरोदनताम्राक्षी भीमाक्षं राक्षसाधिपम् । रुदन्ती करुणं सीता ह्रियमाणे-दमब्रवीत् ॥' इति ।

पितृवचनपरिपालनाय वनं प्रविष्टो दाशरथिः । तस्याहं प्रिया सीता नाम । स च वन्यमाहर्तुं वनं प्रविष्टो यावदागच्छति तावदिहास्यतामिति एवं सीतासमुदीरितामतिमधुरां गिरमाकर्ण्य तीव्रतरं रावणः प्रत्युवाच—

---

1. २६६ अध्याये ३ श्लोकस्य उत्तरार्धं, २ श्लोकस्य उत्तरार्धं, ततः ३ श्लोकस्य पूर्वार्धं च ।

येन वित्रासिता लोकाः सदेवासुरपन्नगाः ।
अहं तु रावणो नाम सीते रक्षोगणेश्वरः ॥ २८ ॥

बह्वीनामुत्तमस्त्रीणामाहृतानामितस्ततः ।
सर्वासामेव भद्रं ते ममाग्रमहिषी भव ॥ २७ ॥

पञ्च दास्यस्सहस्राणि सर्वाभरणभूषिताः ।
सीते परिचरिष्यन्ति भार्या भवसि मे यदि ॥ ३० ॥

रावणेनैवमुक्ता सा कुपिता जनकात्मजा ।
प्रत्युवाचानवद्यांगी तमनादृत्य राक्षसम् ॥ ३१ ॥

महागिरिमिवाकम्प्यं महेन्द्रसदृशद्युतिम् [शंपतिम्] ।
महोदधिमिवाक्षोभ्यं अहं राममनुव्रता ॥ ३२ ॥

महाबाहुं महोरस्कं सिह्मविक्रान्तगामिनम् ।
नृसिह्मं सिह्मसङ्काशं अहं राममनुव्रता ॥ ३४ ॥

त्वं पुनर्जम्बुकः सिह्मीं मामिच्छसि सुदुर्लभाम् ।
नाहं शक्या त्वया स्प्रष्टुं आदित्यस्य प्रभा यथा ॥ ३६ ॥

पादपान् काञ्चनान्नूनं बहून् पश्यसि मन्दभाक् ।
राघवस्य प्रियां भार्यां यस्त्वमिच्छसि रावण ॥ ३७ ॥

मन्दरं पर्वतश्रेष्ठं पाणिना हर्तुमिच्छसि ।
कालकूटविषं पीत्वा स्वस्तिमान् गन्तुमिच्छसि ॥ ३९ ॥

अक्षि सूच्या प्रमृजसि जिह्वया लेढि च क्षुरम् ॥ ३९½ ॥
अवसज्य शिलां कण्ठे समुद्रं तर्तुमिच्छसि ॥ ४०½ ॥
अयोमुखानां शूलानामग्रे चरितुमिच्छसि ।
कल्याणवृत्तां यो भार्यां रामस्याहर्तुमिच्छसि ॥ ४२ ॥

यदन्तरं सिंहसृगालयोर्वने
यदन्तरं स्यन्दनिकासमुद्रयोः ।
सुराग्र्यसौवीरकयोर्यदन्तरं
तदन्तरं वै तव राघवस्य च ॥ ४४ ॥

यदन्तरं काञ्चनसीसलोहयोः
यदन्तरं चन्दनवारिपङ्कयोः ।
यदन्तरं हस्तिबिडालयोर्वने
तदन्तरं दाशरथेस्तवैव च ॥ ४५ ॥

यदन्तरं वायसवैनतेययोः
यदन्तरं मद्गुमयूरयोरपि ।
यदन्तरं सारसगृध्रयोर्वने
तदन्तरं दाशरथेस्तवैव च ॥ ४६ ॥

तस्मिन् सहस्राक्षसमप्रभावे
रामे स्थिते कार्मुकबाणपाणौ ।
हृतापि तेऽहं न जरां गमिष्ये
वज्रं यथा मक्षिकयावगीर्णम् ॥ ४७ ॥

अत्र रावणेन प्रियोक्त्या विलोभितापि सीता तं निराकृतवतीत्युक्त्या पतिव्रतानामेष धर्म इति सूचितम् । तथा च व्यासः—'लोभितापि परेणार्थैः सा सती लोकभूषणा । दैत्येन प्रार्थिता वापि बलेन विधृतापि वा ॥ वस्त्राद्यैर्वासिता वापि नैवान्यं भजते सती ॥' इति ॥

इति सप्तचत्वारिंशः सर्गः ॥

अथ अष्टचत्वारिंशः सर्गः ॥

अष्टचत्वारिंशे — एवं वदन्त्यां सीतायां निशाचराधिपः तस्याः पुनः प्रलोभनाय विक्रमार्जितामूर्जितां निजसम्पदं प्रपञ्चयामास—

भ्राता वैश्रवणस्याहं सापत्न्यो वरवर्णिनि ।
रावणो नाम भद्रं ते दशग्रीवः प्रतापवान् ॥ २ ॥

मद्भयात्तु परित्यज्य स्वमधिष्ठानमृद्धिमत् ।
कैलासं पर्वतश्रेष्ठमध्यास्ते नरवाहनः ॥ ५ ॥

यस्य तत्पुष्पकं नाम विमानं कामगं शुभम् ।
वीर्यादेवार्जितं भद्रे येन यामि विहायसम् ॥ ६ ॥ इति ।

तदधुना मध्येसमुद्रं सर्वतः सुभद्रं विद्रावितशेषसुरपरिषत्परम्परं लङ्कापुरमधिवसती भवती ललनाललामभूता मामपि लल बहुकालं; किमनेन तापसरूपधारिणा लघुतरस्त्रीवचसा प्राज्यं राज्यं परित्यक्तवता रामचन्द्रेणेति वादिनं रावणं कोपसंरक्तलोचना पङ्कजनयना परुषतरमेवमवादीत्—

कथं वैश्रवणं देवं सर्वभूतनमस्कृतम् ।
भ्रातरं व्यपदिश्य त्वमशुभं कर्तुमिच्छसि ॥ २१ ॥

अवश्यं विनशिष्यन्ति सर्वे रावण राक्षसाः ।
येषां त्वं कर्कशो राजा दुर्बुद्धिरजितेन्द्रियः ॥ २२ ॥ इति ॥

इति अष्टचत्वारिंशः सर्गः ॥

अथ एकोनपञ्चाशः सर्गः ॥

एकोनपञ्चाशे—रावणोऽपि कोपपरीतया सीतया निन्दितमात्मानमवगत्य मन्दरोपमदेहः पुनर्जनकजामनःप्रलोभनाय तत्क्षणमेव परित्यक्तभिक्षुवेषः परिगृहीतनिजरूपो दशाननः तामेवमवादीत्—

त्रिषु लोकेषु विख्यातं यदि भर्तारमिच्छसि ।
मामाश्रय वरारोहे तवाहं सदृशः पतिः ॥ ११ ॥
त्यज्यतां मानुषो भावो मयि भावः प्रणीयताम् ॥ १२½ ॥

इति वचनानि परिश्राव्य,

जग्राह रावणस्सीतां बुधः खे रोहिणीमिव ॥ १६ ॥
वामेन सीतां पद्माक्षीं मूर्धजेषु करेण सः ।
ऊर्वोस्तु दक्षिणेनैव परिजग्राह पाणिना ॥ १७ ॥

अत्र दशग्रीवोऽत्यन्तावमतिरूपं कुलक्षयकरं केशग्रहणं स्वस्य भवितव्यानुरूपतया कृतवान् । केशग्रहणस्य, सभानयनपरुषभाषणवस्त्रापहरणाद्यपेक्षया वधापेक्षया च अत्यन्तावमतिकरत्वं कुलक्षयकरत्वं च भारते प्रतिपादितम् ॥

तत्र सभानयनाद्यपेक्षया अवमतिकरत्वं उद्योगे—[1] 'यदि तेऽहमनुग्राह्या यदि तेऽस्ति कृपा मयि । धार्तराष्ट्रेषु वै कोपः सर्वः कृष्ण विधीयताम् ॥ इत्युक्त्वा मृदुसंहारं वृजिनाग्रं सुदर्शनम् । सुनीलमसितापाङ्गी सर्वगन्धाधिवासितम् ॥ सर्वलक्षणसंपन्नं महाभुजगवर्चसम् । केशपक्षं वरारोहा गृह्य सव्येन पाणिना ॥ पद्माक्षी पुण्डरीकाक्षमुपेत्य गजगामिनी । अश्रुपूर्णेक्षणा कृष्णा कृष्णं वचनमब्रवीत् ॥ अयं ते

---

1. ८२ अध्याये ३२—३६, ३९ श्लोकाः ।

पुण्डरीकाक्ष दुश्शासनकरोद्धृतः । स्मर्तव्यः सर्वकालेषु परेषां सन्धि-मिच्छता ॥ दुश्शासनभुजं श्यामं संछिन्नं पांसुकुण्ठितम् । यद्यहं न प्रपश्यामि का शान्तिर्हृदयस्य मे ॥' इति ॥

वनपर्वण्यपि — [1]'कुले महति जातास्मि दिव्येन विधिना किल । पाण्डवानां प्रिया भार्या स्नुषा पाण्डोर्महात्मनः ॥ कचग्रहमनुप्राप्ता सास्मि कृष्ण वरा सती । कृष्णः — [2]'रोदिष्यन्ति स्त्रियो ह्येवं येषां क्रुद्धासि भामिनि । सत्यं ते प्रतिजानामि राज्ञां राज्ञी भविष्यसि ॥' इति ॥

द्रोणपर्वणि वधापेक्षया केशग्रहणस्यात्यन्तावमतिकरत्वं च द्रोण-वधानन्तरं दुर्योधनादीन् प्रत्यश्वत्थामवचनात् अवगम्यते — [3]'गतस्तु वीरलोकाय पिता मम न संशयः । न शोच्यः पुरुषव्याघ्रः तथा मम न संशयः ॥ यत्तु धर्मप्रवृत्तस्सन् केशग्रहणमाप्तवान् । पश्यतां सर्वसैन्यानां तन्मे मर्माणि कृन्तति ॥' [4]'पित्रा तु मम सावस्था प्राप्ता निर्बन्धुना यथा । मयि शैलप्रतीकाशे पुत्रे शिष्ये च जीवति ॥ यन्मां द्रोणस्सुतं प्राप्य केशग्रहणमाप्तवान् । स तथाहं करिष्यामि यथा भारतसत्तम ॥ परलोकं गतस्यापि भविष्याम्यनृणः पितुः ।' [5]'शपे सत्येन कौरव्य इष्टा-पूर्तेन चैव हि ॥ अहत्वा सर्वपाञ्चालान् जीवेयं न कथञ्चन । धृष्टद्युम्नं च समरे हन्ताहं पापकारिणम् ॥ पाञ्चालानां वधं कृत्वा शान्तिं लप्स्यामि कौरव ।' इति ॥

---

1. १२ अध्याये २० श्लोकः २१ श्लोकस्य पूर्वार्धं च ।
2. १२ अध्याये २८, ३० श्लोकयोः पूर्वार्धे ।
3. १९५ अध्याये ७ श्लोकस्य उत्तरार्धं ८ श्लोकः ९ श्लोकस्य उत्तरार्धं च ।
4. १९५ अध्याये १९, २० श्लोकौ २१ श्लोकस्य पूर्वार्धं च ।
5. १९६ अध्याये १४ श्लोकस्य उत्तरार्धं १५ श्लोकस्य पूर्वार्धं १६ श्लोकस्य पूर्वार्धं १७ श्लोकस्य पूर्वार्धं च ।

अत एवाग्रे जटायुवधानन्तरं रावणविनाशस्य केशपक्षपरामर्शो मुख्यं निमित्तमिति प्रतिपादितं—

[1]जीवितान्ताय केशेषु जग्राहान्तकसन्निभः ॥ १४ ॥
प्रधर्षितायां सीतायां बभूव सचराचरम् ।
जगत्सर्वममर्यादं तमसान्धेन संवृतम् ॥ १५ ॥
न वाति मारुतस्तत्र निष्प्रभोऽभूद्दिवाकरः ॥ १६ ॥
दृष्ट्वा सीतां परामृष्टां दीनां दिव्येन चक्षुषा ।
कृतं कार्यमिति श्रीमान् व्याजहार पितामहः ॥ १७ ॥
प्रहृष्टा व्यथिताश्चासन् सर्वे ते परमर्षयः ।
दृष्ट्वा सीतां परामृष्टां दण्डकारण्यवासिनः ॥
रावणस्य विनाशं च प्राप्तं बुद्ध्वा यदृच्छया ॥ १८ ॥ इति ।

अत एव दशग्रीवः कुलक्षयरूपं फलं प्राप्तवान् । तत्समसमयपलायितासु वनदेवतासु, कुररीमिव राम रामेति भृशतरं क्रोशन्तीं रामसीमन्तिनीं अङ्केनादाय खरपरिकलितेन रथेन सहसा विहायसमनुससार ॥

तदनु निशाचराधमेन रावणेन नीयमाना जनकनन्दिनी समुद्भ्रान्तचित्तेव भृशमेवं चुक्रोश—

हा लक्ष्मण महाबाहो गुरुचित्तप्रसादक ।
ह्रियमाणां न जानीषे रक्षसा माममर्षिणा ॥ २४ ॥
जीवितं सुखमर्थांश्च धर्महेतोः परित्यजन् ।
ह्रियमाणामधर्मेण मां राघव न पश्यसि ॥ २५ ॥
ननु नामाविनीतानां विनेतासि परन्तप ।

---

1. आरण्यकाण्डे ५१ सर्गे ।

कथमेवंविधं पापं न त्वं शाधि[स्सि]हि रावणम् ॥ २६ ॥

न तु सद्योऽविनीतस्य दृश्यते कर्मणः फलम् ।
कालोऽप्यङ्गी भवत्यत्र सस्यानामिव पक्तये ॥ २७ ॥

अनेन कृतं कर्म कालमपेक्ष्यैव फलतीति सूचितम् । तथा च राजधर्मे व्यासः — [1] 'न कर्मणा लभ्यते चिन्तया वा नाप्यस्ति दाता पुरुषस्य कश्चित् । पर्याययोगाद्विहितं विधात्रा कालेन सर्वं लभते मनुष्यः ॥ न बुद्धिशास्त्राध्ययनेन शक्यं प्राप्तुं विशेषं मनुजैरकाले । मूर्खोऽपि चाप्नोति कदाचिदर्थान् कालो हि कार्यं प्रति निर्विशेषः ॥ नाभूतिकालेषु फलं ददन्ति शिल्पाश्च मन्त्राश्च तथौषधानि । तान्येव कालेन समाहितानि सिद्ध्यन्ति वर्धन्ति च भूतिकाले ॥ कालेन शीघ्राः प्रवहन्ति वाताः कालेन वृष्टिर्जलदानुपैति । कालेन पद्मोत्पलवत् जलं च कालेन पुष्यन्ति वनेषु वृक्षाः ॥ कालेन कृष्णाश्च सिताश्च रात्र्यः कालेन चन्द्रः प्रतिपूर्णबिम्बः । नाकालतः पुष्पफलं द्रुमाणां नाकालवेगास्सरितो वहन्ति ॥ नाकालमत्ताः खगपन्नगाश्च मृगद्विपाश्शैलमहामृगाश्च । नाकालतः स्त्रीषु भवन्ति गर्भाः नायान्त्यकाले शिशिरोष्णवर्षाः ॥ नाकालतो म्रियते जायते वा नाकालतो व्याहरते च बालः । नाकालतो यौवनमभ्युपैति नाकालतो रोहति बीजमुप्तम् ॥ नाकालतो भानुरुपैति योगं नाकालतोऽस्तं गिरिमभ्युपैति । नाकालतो ह्रीयते वर्धते च चन्द्रस्समुद्रश्च महोर्मिमाली ॥' इति ॥

हा कैकेयि, सकामा भवेदानीं । वनदेवताः, युष्मानामन्त्रये । रक्षसाऽपहृतां मां निवेदयत सानुजाय रामायेति । एवं सरित्सरोवरवनवनस्पतिमृगपतत्रिपाषाणतृणगुल्मलतादिकमपि संभाष्य न्यग्रोधस्थितं अपरमिव नगराजं पतगराजमेवमवादीत् —

1. २५ अध्याये ५—१२ श्लोकाः ।

जटायो पश्य मामार्य ह्रियमाणामनाथवत् ।
अनेन राक्षसेन्द्रेण करुणं पापकर्मणा ॥ ३९ ॥ इति ॥

इति एकोनपञ्चाशः सर्गः ॥

अथ पञ्चाशः सर्गः ॥

पञ्चाशे— ततः पर्वतकूटाभस्तीक्ष्णतुण्डः खगोत्तमः ।
वनस्पतिगतः श्रीमान् व्याजहार शुभां गिरम् ॥ २ ॥
कथं राजा स्थितो धर्मे परदारान् परामृशेत् ।
रक्षणीया विशेषेण राजदारा महाबल ॥ ६ ॥ इति ।

अनेन परदारा न ग्राह्याः । विशेषेण राजदारा इति सूचितम् । अत एव तद्ग्रहणे प्रायश्चित्तमाह पराशरः—[1]'चतुर्वर्णेषु सर्वेषु हितं वक्ष्यामि निष्कृतिम् । अगम्यागमने चैव शुद्धिं चान्द्रायणं चरेत् ॥' इति । 'ऋतावुपेयात्' इति शास्त्रात् गम्या स्वभार्या । अन्या अगम्या इति माधवाचार्याः । राजदारविषये व्याघ्रः —'आश्रितस्यापि विदुष आहिताग्नेश्च योगिनः । आचार्यस्य च राज्ञश्च भार्यां प्रव्रजितां तथा ॥ धात्रीं पुत्रीं च पौत्रीं च सखीं मातुस्तथैव च । पितुस्सखीं तथा गत्वा गुरुतल्पव्रतं चरेत् ॥' इति ॥

निवर्तय मतिं नीचां परदाराभिमर्शनात् ।
न तत्समाचरेद्धीरो यत्परोऽस्य विगर्हयेत् ॥ ७ ॥

अनेन लोकनिन्दितं कर्म न कर्तव्यमिति । तथा च विष्णुपुराणे—[2]'परित्यजेदर्थकामौ धर्मपीडाकरौ नृप । धर्ममप्यशुभोदर्कं लोकविक्रुष्टमेव

1. दशमाध्याये प्रथमः श्लोकः ।
2. तृतीयांशे ११ अध्याये ६ श्लोकः ।

च ॥' इति । कामन्दकेऽपि —[1] 'आयत्याञ्च तदात्वे च यत्स्यादास्वादपेशलम् । तच्छिन्नपि कुर्वीत न लोकद्विष्टमाचरेत् ॥' इति ॥

यथात्मनस्तथान्येषां दारा रक्ष्या विमर्शता ॥ ७ ॥

धर्ममर्थं च कामं च शिष्टाः शास्त्रेष्वनागतम् ।
व्यवस्यन्ति न राजानः पौलस्त्यकुलनन्दन ॥ ८ ॥

राजा धर्मश्च कामश्च द्रव्याणां चोत्तमो निधिः ।
धर्मश्शुभं वा पापं वा राजमूलात्प्रवर्तते ॥ ९ ॥

अनेन प्रजा राजानमनुसरन्तीति सूचितम् । इदं प्रागुक्तम् ॥

पापस्वभावश्चपलः कथं त्वं रक्षसां वर ।
ऐश्वर्यमिह संप्राप्तो विमानामिव दुष्कृती ॥ १० ॥

कामस्वभावो यो यस्य न स शक्यः प्रमार्जितुम् ।
न हि दुष्टात्मनामार्ये आवसत्यालये चिरम् ॥ ११ ॥

अनेन पापिष्ठस्य ऐश्वर्यं न भवति । प्राप्तं चेदपि चिरं न तिष्ठति । तथा च कामन्दकः —[2] 'धर्मात्वैजवनो राजा चिराय बुभुजे भुवम् । अधर्माच्चैव नहुषः प्रतिपेदे रसातलम् ॥' इति ॥

विषये वा पुरे वा ते यदा रामो महाबलः ।
नापराध्यति धर्मात्मा कथं तस्यापराध्यसि ॥ १२ ॥

अनेन अनपराधिषु समीचीनेषु अपराधो न कर्तव्य इति सूचितम् । तथा चोद्योगे दुर्योधनं प्रति भगवद्वचनम् —[3] 'आत्मानं कृन्तति ह्येष वनं

---

1. स्वाम्यनुजीविवृत्तनामके षष्ठसर्गे ६ श्लोकः ।
2. इन्द्रियविद्यावृद्धसंयोगनामके द्वितीयसर्गे ७ श्लोकः ।
3. १२४ अध्याये ४० श्लोकः ।

परशुना यथा । यस्सम्यग्वर्तमानेषु मिथ्या राजन् प्रवर्तते ॥' इति ।

स भारस्सौम्य भर्तव्यो यो नरं नावसादयेत् ।
तदन्नमपि भोक्तव्यं जीर्यते यदनामयम् ॥ १७ ॥

अनेन अशक्यं कर्म न कर्तव्यमिति सूचितम् । तथा च **कामन्दके**—[1]'शक्याशक्यपरिच्छेदं कुर्याद्बुद्ध्या प्रसन्नया । केवलं दन्तभङ्गाय दन्तिनः शैलताडनम् ॥' इति ॥

यत्कृत्वा न भवेद्धर्मो न कीर्तिर्वा यशो भुवि ।
शरीरस्य भवेत्खेदः कस्तत्कर्म समाचरेत् ॥ १८ ॥

अनेन निष्फलमायासकरं कर्म नारम्भणीयमिति सूचितम् । तथा च **मनुः**—[2]'न कर्म निष्फलं कुर्यादायत्यामसुखोदयम् ॥' इति ।

न शक्तस्त्वं बलाद्धर्तुं वैदेहीमनुपश्यतः ।
हेतुभिर्न्यायसंयुक्तां ध्रुवां वेदश्रुतीमिव ॥ २१ ॥

अनेन श्रुतिप्रतिपन्नोऽर्थो नाभासैस्तर्कैः बाधितुं शक्यत इति सूचितम् । तथा च **मनुः**—[3]'श्रुतिस्तु वेदो विज्ञेयो धर्मशास्त्रं तु वै स्मृतिः । ते सर्वार्थेष्वमीमांस्ये ताभ्यां धर्मो हि निर्बभौ । योऽवमन्येत ते तूभे हेतुशास्त्राश्रयान्नरः ॥ स साधुभिर्बहिष्कार्यो नास्तिको वेदनिन्दकः ।' इति । [4]'नैषा तर्केण मतिरापनेया' इति च । तदधुना रामविरहितां वैदेहीं परिगृह्य चोरवन्निर्गच्छन्तं,

वृन्तादिव फलं त्वां तु पातयेयं रथोत्तमात् ॥ २८ ॥

इत्यब्रवीत् ॥

इति पञ्चाशः सर्गः ॥

---

1. द्वादशसर्गे २९ श्लोकः । 2. चतुर्थाध्याये ७० श्लोकस्य उत्तरार्धं ।
3. द्वितीयाध्याये १०, ११ श्लोकौ ।
4. कठोपनिषदि प्रथमाध्याये द्वितीयवल्यां ९ ऋचि ।

अथ एकपञ्चाशः सर्गः ॥

एकपञ्चाशे — ततः परुषतरपक्षिराजवचनश्रवणजनितकोपो राक्षसाधिपः पतगेन्द्रमभिदुद्राव । तदनु गगनगतयोः प्रचण्डानिलविचलितनीरदयोरिव कोपाद्विचलितयोः पक्षिराक्षसयोः संप्रवृत्ते संप्रहारे पतगवरो निशाचरविमुक्तान् रुक्मपुंखान् विशिखान् परिगृह्य तीक्ष्णनखाभ्यां चरणाभ्यां चञ्चुपुटकोटिकुट्टनेन च तच्छरीरं सञ्जातव्रणमकरोत् । तदनु संजातकोपेन दशाननेन मृत्युदण्डनिभैः दशभिः मार्गणैः भिन्नगात्रोपि पतत्री सत्वरमभिपत्य सशरं चापं चरणाभ्यां बभञ्ज ॥

तदनु सज्जेनापरेण धनुषा शरान्वर्षतो राक्षसस्य चरणाभ्यामाभज्य धनुः, अवधूय च तीक्ष्णपक्षाभ्यां बाणगणं अभिहत्य च रथधुरावहान् चतुरान् चतुरः पिशाचवदनान् खरानाभज्य च मणिप्रवरविचित्रं रथं निपात्य च छत्रचामरे सारथेश्शिरस्तीक्ष्णतुण्डेन अखण्डयत् ॥

स भग्नधन्वा विरथो हताश्वो हतसारथिः ।
अङ्केनादाय वैदेहीं पपात भुवि रावणः ॥ २० ॥

ततः परिश्रान्तं पक्षिराजमवलोक्य सत्वरमुत्थाय, मैथिलीमादाय समुत्पतन्तं रावणं जटायुरेवमब्रवीत् —

अनुबन्धमजानन्तः कर्मणामविचक्षणाः ।
शीघ्रमेव विनश्यन्ति यथा त्वं विनशिष्यसि ॥ २६ ॥

यथा त्वया कृतं कर्म भीरुणा लोकगर्हितम् ।
तस्कराचरितो मार्गो नैष वीरनिषेवितः ॥ २९ ॥

परेतकाले यत्कर्म पुरुषः प्रतिपद्यते ।
विनाशायात्मनोऽधर्म्यं प्रतिपन्नोसि कर्म तत् ॥ ३१ ॥

पापानुबन्धो वै यस्य कर्मणः कर्म को नु तत् ।
कुर्वीत लोकाधिपतिः स्वयंभूर्भगवानपि ॥ ३२ ॥

इत्याभिधाय दुष्टवारणमाधोरण इव दशकन्धरकन्धरायां निपत्य तीक्ष्णाङ्कुश-निभैः नखैः कुन्तनिभचञ्चुपुटकोटिकुट्टनैश्च पार्श्वं विदार्य,

केशांश्चोत्पाटयामास नखपक्षमुखायुधः ॥ ३५ ॥
वामबाहून् दश तदा व्यपाहरदरिन्दमः ॥ ३८ ॥

तदनु पतगराजदष्टान्पन्नगानिव विषज्वालावलीयुक्तान् स्वभुजा-नवलोक्य कोपकलुषलोचनो दशाननः

सीतामुत्सृज्य मुष्टिभ्यां गृध्रराजं विपोथ्य च ॥ ३९½ ॥
पक्षौ पार्श्वं च पादौ च खड्गमुद्धृत्य सोऽच्छिनत् ॥ ४२ ॥

इति एकपञ्चाशः सर्गः ॥

अथ द्विपञ्चाशः सर्गः ॥

द्विपञ्चाशे— तदनु,

आलिङ्ग्य गृध्रं निहतं रावणेन बलीयसा ।
विललाप सुदुःखार्ता सीता शशिनिभानना ॥ ३ ॥

ननु, [1] 'भर्तुर्भक्तिं पुरस्कृत्य रामादन्यस्य वानर । नाहं स्प्रष्टुं तदा गात्रं इच्छेयं वानरोत्तम ॥ यदहं गात्रसंस्पर्शं रावणस्य गता बलात् । अनीशा किं करिष्यामि ह्यनाथा विवशा सती ॥' इति **सुन्दरकाण्डे** हनूमन्तं प्रति परपुरुषसंस्पर्शनमात्रमपि अनुचितमिति वक्ष्यति । एवं

1. सुन्दरकाण्डे ३७ सर्गे ६२, ६३ श्लोकौ ।

तादृशीयं सीता परपुरुषं जटायुषं कथमालिङ्गितवतीति चेन्न । दुष्टभावेन परपुरुषालिङ्गनस्य दोषत्वेऽपि दुःखपरिहाराय आतुरवृद्धस्पर्शने दोषाभावात् । तत्र गौतमः —[1] 'स्त्रीप्रेक्षणालंभने मैथुनशङ्कायाम्' इति । वर्जयेदिति शेषः । अत्र मिताक्षरा — प्रकर्षेण ईक्षणं अवयवशो निरूपणं, न यादृच्छिकदर्शनम् । आलंभनं स्पर्शनं । मैथुनशङ्कायामिति वचनात् बालायां वृद्धायां, आतुरायां स्वस्य च बालादेर्न दोष इति । एवं समानन्यायतया बालवृद्धातुराणां परपुरुषाणां स्त्रीभिः स्पर्शने कृतेऽपि न दोषः ॥

तथाच 'गृध्रराजः पुराणोऽसौ श्वशुरस्य सखा मम' इति सीतावचनात् वृद्धः श्वशुरसखश्च जटायुः स्वभयपरित्राणाय प्रवृत्तत्वात्, 'अन्नदाता भयत्राता पञ्चैते पितरस्तथा' इति वचनावगतपितृरूपश्च भवति । अत एतादृशस्य कृच्छ्रगतस्य स्पर्शने न दोष इति ॥

निमित्तं लक्षणज्ञानं शकुनिस्वरदर्शनम् ।
अवश्यं सुखदुःखेषु नराणामिह दृश्यते ॥ ४ ॥
नूनं राम न जानासि महद्व्यसनमात्मनः ।
धावन्ति नूनं काकुत्स्थं मदर्थं मृगपक्षिणः ॥ ५ ॥

इदञ्च शुभाशुभशकुनजातं कृत्स्नमपि प्राक् प्रपञ्चितम् । इति विलपन्तीं सीतामन्तकसन्निभो दशाननः केशेषु जग्राह । ततो रावणेन नीयमानायाः सीतायाः

चरणान्नूपुरं भ्रष्टं वैदेह्या रत्नभूषितम् ॥ ३५½ ॥
तस्याः स्तनान्तराद्भ्रष्टो हारस्ताराधिपद्युतिः ॥ ३८½ ॥

इति द्विपञ्चाशः सर्गः ॥

---

1. द्वितीयाध्याये २२ सूत्रं ।

अथ त्रिपञ्चाशः सर्गः ॥

त्रिपञ्चाशे — एवमतिवेगात् खमुत्पतन्तं रक्षोधिपमवलोक्य रोषारुणितलोचना सीता बहुविधं निर्भर्त्स्य तमेवमवादीत् —

ईदृशं गर्हितं कर्म कथं कृत्वा न लज्जसे ।
स्त्रियाश्च हरणं नीच रहिते च परस्य च ॥ ७ ॥

कथयिष्यन्ति लोकेषु पुरुषाः कर्म कुत्सितम् ।
सुनृशंसमधर्मिष्ठं तव शौण्डीर्यमानिनः ॥ ८ ॥

कुलाक्रोशकरं लोके धिक्ते चारित्रमीदृशम् ॥ ९ ॥

अनेन परदारापहरणं शूराणामधर्माधायकं अयशस्करं च भवतीति सूचितम् । तथा च विराटपर्वणि कीचकवधे —[1] 'अप्रार्थनीयामिह मां सूतपुत्राभिमन्यसे । विवर्जनं ह्यकार्याणां एतत्सत्पुरुषव्रतम् ॥ परदारास्मि भद्रं ते न युक्तं त्वयि सांप्रतम् । दयिताः प्राणिनां दारा धर्मं समनुचिन्तय ॥ परदारे न ते बुद्धिर्जातु कार्या कथञ्चन । मिथ्याभिगृध्रो हि नरः पापात्मा मोहसंस्थितः ॥ अयशः प्राप्नुयाद्घोरं महद्वा प्राप्नुयाद्भयम् ॥' इति ॥

परमं खलु ते वीर्यं दृश्यते राक्षसाधम ।
विश्राव्य नामधेयं हि युद्धे नापहृता त्वया ॥ ६ ॥

किं कर्तुं शक्यमेवं हि यज्जवेनैव धावसि ।
मुहूर्तमुप[मपि]तिष्ठस्व न जीवन् प्रतियास्यसि ॥ १० ॥

न हि चक्षुष्पथं प्राप्य तयोः पार्थिवपुत्रयोः ।
ससैन्योऽपि समर्थस्त्वं मुहूर्तमपि जीवितुम् ॥ ११ ॥

---

1. १४ अध्याये ३४ श्लोकस्य पूर्वार्धं ३६ श्लोकस्य उत्तरार्धं ३५ श्लोकः ३६ श्लोकस्य पूर्वार्धं ततः ३७ श्लोकश्च ।

बद्धस्त्वं कालपाशेन दुर्निवारेण रावण ।
क्क गतो लप्स्यसे शर्म मम भर्तुर्महात्मनः ॥ २३ ॥
स कथं राघवो वीरस्सर्वास्त्रकुशलो बली ।
न त्वां हन्याच्छरैस्तीक्ष्णैरिष्टभार्यापहारिणम् ॥ २५ ॥

अनेन अविजित्य शूरं तद्भार्यापहर्तुः न कापि सुखं भवति । किन्तु तेनैव वीरेण सपुत्रज्ञातिबान्धवस्य नाशो भवतीति सूचितम् । तथा च **वनपर्वणि** धौम्यः — [1] 'नेयं शक्या त्वया नेतुमविजित्य महारथान् । धर्मं क्षत्रस्य पौराणमवेक्षस्व जयद्रथ ॥ क्षुद्रं कृत्वा फलं पापं त्वं प्राप्स्यसि न संशयः । आसाद्य पाण्डवान् वीरान् धर्मराजपुरोगमान् ॥' इति । **तत्रैव** भीमोपि जयद्रथं प्रति — [2] 'न हि मे मोक्ष्यते जीवन् मूढस्सैन्धवको नृपः । पातालतलसंस्थोपि यदि शक्रोऽस्य सारथिः ॥' इति ।

विराटेपि द्रौपदी — [3] 'अन्तर्महीं वा यदि वोर्ध्वमुत्पतेः समुद्रपारं यदि वा प्रधावसि । तथापि तेषां न विमोक्षमर्हसि प्रमाथिनो देवसुता हि खेचराः ॥ तेषां प्रियां प्रार्थयतो न ते भुवं गत्वा दिवं वा शरणं भविष्यति । न वर्तते कीचक ते दृशा शुभं यातो न संजीवनमर्थयेत ॥' इति ॥

एवं वीरभार्यापहर्तुर्वधावमानादिकमवगम्यते । तत्र वधविषये **विराटे** भीमः — [4] 'अद्याहमनृणो भूत्वा भ्रातुर्भार्यापहारिणम् । शान्तिं लप्स्यामि परमां हत्वा सैरन्ध्रिकण्टकम् ॥ इत्येवमुक्त्वा पुरुषप्रवीरः तं कीचकं क्रोधसरागनेत्रः । आस्रस्तवस्त्राभरणं स्फुरन्तं उद्भ्रान्तनेत्रं व्यसुमुत्ससर्ज ॥

1. २६८ अध्याये २६, २७ श्लोकौ ।
2. २७१ अध्याये ४२ श्लोकः ।
3. १४ अध्याये ५०, ५२ श्लोकौ ।
4. २२ अध्याये ७९, ८०, ८२, ८६, ८७ श्लोकाः ।

तस्य पादौ च पाणी च शिरो ग्रीवां च सर्वशः । काये प्रवेशयामास पशोरिव पिनाकधृक् ॥ ततोऽग्निं तत्र प्रज्वाल्य दर्शयित्वा तु कीचकम् । पाञ्चालीं स तदा वीर इदं वचनमब्रवीत् ॥ प्रार्थयन्ति सुकेशान्ते ये त्वां शीलगुणान्विताम् । एवं ते भीरु वध्यन्ते कीचकः शोभते यथा ॥' इति ॥

एवमुपकीचकानामपि तद्बन्धूनां वधः प्रतिपादितः **तत्रैव**—[1]'विमुच्य द्रौपदीं तत्र प्राद्रवन्नगरं प्रति । द्रवतस्तांस्तु संप्रेक्ष्य स वज्री दानवानिव ॥ शतं पञ्चाधिकं भीमः प्राहिणोद्यमसादनम् । तत आश्वासयत्कृष्णां संप्रमुच्य विशांपते ॥ एवं ते भीरु वध्यन्ते ये त्वां क्लिश्यन्त्यनागसम् ॥' इति ।

अवमतिविषये **आरण्यपर्वणि** द्रौपदीप्रमाथे [2]'जयद्रथस्तु संप्रेक्ष्य भ्रातरावुद्यतावुभौ । प्राधावत्तूर्णमव्यग्रो जीवितेप्सुस्सुदुःखितः ॥ तं भीमसेनो धावन्तमवतीर्य रथाद्बली । अभिद्रुत्य निजग्राह केशपक्षेष्वमर्षणः ॥ समुद्यम्य च तं भीमो निष्पिपेष महीतले । शिरो गृहीत्वा राजानं ताडयामास चैव हि ॥ पुनस्संजीवमानस्य तस्योत्पतितुमिच्छतः । पदा मूर्ध्नि महाबाहुः प्राहरद्विलपिष्यतः । तस्य जानुं ददौ भीमो जघ्ने चैनमरत्निना ॥ संमोहमगमद्राजा प्रहारवरपीडितः । सरोषं भीमसेनं तु वारयामास फाल्गुनः ॥ दुश्शलायाः कृते राजा यत्तदाहेति कौरव ।

भीमः — नायं पापसमाचारो मत्तो जीवितुमर्हति । कृष्णायास्तदनर्हायाः परिक्लेष्टा नराधमः ॥ किन्तु शक्यं मया कर्तुं यद्राजा सततं घृणी । त्वञ्च बालिशया बुद्ध्या सदैवास्मान् प्रबाधसे ॥ एवमुक्त्वा सटास्तस्य पञ्च चक्रे वृकोदरः । अर्धचन्द्रेण बाणेन किञ्चिदब्रुवतस्तदा ॥ विकत्थयित्वा

---

1. २३ अध्याये २६ श्लोकस्य उत्तरार्धं २७ श्लोकः २८ श्लोकस्य उत्तरार्धं ३० श्लोकस्य पूर्वार्धं च ।

2. २७२ अध्याये १—१४ श्लोकाः १८ श्लोकस्य उत्तरार्धं च ।

राजानं ततः प्राह वृकोदरः। जीवितुं चेच्छसे मूढ हेतुं मे गदतः शृणु ॥ दासोऽस्मीति तथा वाच्यं संसत्सु च सभासु च। एवं ते जीवितं दद्यामेष युद्धजितो विधिः॥ एवमस्त्विति तं राजा क्लिश्यमानो जयद्रथः। प्रोवाच पुरुषव्याघ्रं भीममाहवशोभिनम्॥ तत एवं विचेष्टन्तं बद्ध्वा पार्थो वृकोदरः। रथमारोपयामास विसंज्ञं पांसुगुण्ठितम्॥ ततस्तं रथमास्थाय भीमः पार्थानुगस्तदा। अभ्येत्याश्रममध्यस्थमभ्यगच्छद्युधिष्ठिरम्॥ दासोऽयं मुच्यतां राज्ञस्त्वया पञ्चसटः कृतः।' इति॥

पश्याम्यद्य हि कण्ठे त्वां कालपाशावपाशितम्॥ १८॥
तथा चास्मिन्भयस्थाने न बिभेषि दशानन।
व्यक्तं हिरण्मयान्हि त्वं संपश्यसि महीरुहान्॥ १९॥
नदीं वैतरणीं घोरां रुधिरौघविवाहिनीम्।
खड्गपत्रवनं चैव भीमं पश्यसि रावण॥ २०॥
तप्तकाञ्चनपुष्पां च वैडूर्यप्रवरच्छदाम्।
द्रक्ष्यसे शाल्मलीं तीक्ष्णामायसैः कण्टकैश्चिताम्॥ २१॥

अनेन परदारापहर्तुरचिरात् मृत्युर्भवति। तदनन्तरं वैतरण्यादिनरकानुभवश्च भवतीति सूचितम्। तथा च विष्णुपुराणे—[1]'परदारं (रान्) न गच्छेत मनसापि कदाचन। किमुवाचाक्षिबन्धोपि न तेष्वस्ति व्यवायिनाम्॥ मृतो नरकमभ्येति हीयतेऽत्रापि चायुषः। परदाररतिः पुंसामुभयत्रापि भीतिदा॥' इति।

वैतरण्यादीनां नरकत्वं तत्रैव प्रतिपादितम्—[2]'ततश्च नरका विप्र भुवोऽधः सलिलस्य च। पापिनो येषु पात्यन्ते तान् शृणुष्व महामते॥

1. तृतीयेंशे ११ अध्याये १२३, १२४ श्लोकौ।
2. द्वितीयेंशे ६ अध्याये १—६ श्लोकाः।

रौरवस्सूकरो रोधस्तालो विशसनस्तथा । महाज्वालस्तप्तकुम्भो लवणोऽथ विलोहितः ॥ रुधिरांभो वैतरणिः कृमीशः कृमिभोजनः । असिपत्रवनः कृष्णो लालाभक्षश्च दारुणः ॥ तथा पूयवहः पापो वह्निज्वालोप्यधश्शिरः । सन्दंशः कृष्णसूत्रश्च तमश्चावीचिरेव च ॥ श्वभोजनोऽथाप्रतिष्ठः आवीचिश्च तथापरः । इत्येवमादयश्चान्ये नरका भृशदारुणाः ॥ यमस्य विषये घोराश्शस्त्राग्निविष[भिभय]दायिनः । पतन्ति येषु पुरुषाः पापकर्मरताश्च ये ॥' इति ॥

एवमेव परदारासक्तानामिन्द्रनहुषादीनां विविधानर्थप्राप्तिर्भारते प्रतिपादिता । तत्तु विस्तरभयान्न लिख्यते ॥

इति त्रिपञ्चाशः सर्गः ॥

अथ चतुःपञ्चाशः सर्गः ॥

चतुःपञ्चाशे— इति सकरुणं विलपन्ती रक्षसा नीयमाना सीता रामाय कदाचित् ज्ञापयिष्यतीति बुद्ध्या भूषणजातं कनककपिशे कौशेये निबध्य गिरिशृङ्गसङ्गतप्लवङ्गमपञ्चकसविधे पातयामास । रावणोऽपि गमनसंभ्रमवशेन अविज्ञाततद्वृत्तान्तः समागत्य लङ्कां, अन्तःपुरे राक्षसीभिः संरक्षितां सीतामकरोत् । ततो महाबलानष्टौ राक्षसान् समानीय जनस्थाने सायुधैर्भवद्भिर्भवितव्यम् ॥

वैरञ्च सुमहज्जातं रामं प्रति सुदारुणम् ॥ २३ ॥

निर्यातयितुमिच्छामि तच्च वैरमहं रिपोः ।
न हि लप्स्याम्यहं निद्रामहत्वा संयुगे रिपुम् ॥ २४ ॥

तं त्विदानीमहं हत्वा खरदूषणघातिनम् ।
रामं शर्मोपलप्स्यामि धनं लब्ध्वेव निर्धनः ॥ २५ ॥

इत्यभिधाय तान् प्रेषयामास । अनेन बलवद्विरोधिनो निद्रा न भविष्यतीति सूचितम् । तथा च उद्योगे विदुरः— [1]'अभियुक्तं बलवता दुर्बलं हीनसाधनम् । हृतस्वं कामिनं चोरं आविशन्ति प्रजागराः ॥' इति ॥

इति चतुःपञ्चाशः सर्गः ॥

अथ पञ्चपञ्चाशः सर्गः ॥

पञ्चपञ्चाशे — अथ कदाचिदनङ्गशरपरम्परासमाकुलान्तःकरणो रावणो वैदेहीमेव सततमनुचिन्तयन्नन्तःपुरं प्रविश्य निशाचरीशतपरिवृतां सीतां प्रलोभयितुकामो रम्यहर्म्यवरसम्परमिव महेन्द्रसदनं निजभवनं निजभुजबलसमार्जितामूर्जितां संपदमपि च ज्ञापयन्नेवमवोचत्—

बहूनां स्त्रीसहस्राणां मम योऽसौ परिग्रहः ।
तासां त्वमीश्वरी सीते मम भार्या भव प्रिये ॥ १७ ॥

एतौ पादौ मया स्निग्धौ शिरोभिः परिपीडितौ ।
प्रसादं कुरु मे क्षिप्रं वश्यो दासोऽहमस्मि ते ॥ ३६ ॥

इति पञ्चपञ्चाशः सर्गः ॥

अथ षट्पञ्चाशः सर्गः ॥

षट्पञ्चाशे— ततो रावणवचनश्रवणसंजातकोपा सीता तमेवमशपत्—

गतायुस्त्वं गतश्रीको गतसत्त्वो गतेन्द्रियः ।
लङ्का वैधव्यसंयुक्ता त्वत्कृतेन भविष्यति ॥ १२ ॥

न ते पापमिदं कर्म शुभोदर्कं भविष्यति ।

---

1. ३३ अध्याये १३ श्लोकः ।

साहं नीता विनाभावं पतिपार्श्वात्त्वया वने ॥ १३ ॥
स हि दैवतसंयुक्तो मम भर्ता महाद्युतिः ॥ १३½ ॥
स ते दर्पं बलं वीर्यं उत्सेकञ्च तथाविधम् ॥
अपनेष्यति गात्रेभ्यः शरवर्षेण संयुगे ॥ १५ ॥

अनेन पतिव्रताकोपः शापप्रदानमुखेन अत्यन्तानर्थाधायक इति सूचितम् । तथा चारण्यके नलोपाख्याने—[1]'दमयन्त्यपि तं दुष्टमुपलभ्य पतिव्रता । तीव्ररोषसमाविष्टा प्रजज्वालेव मन्युना ॥ स तु पापमतिः क्षुद्रः प्रधर्षयितुमातुरः । दुर्धर्षां तर्कयामास दीप्तामग्निशिखामिव ॥ दमयन्त्यपि दुःखार्ता पतिराज्यविनाकृता । अतीतवाक्पथे काले शशापैनं रुषा किल ॥ यथाहं नैषधादन्यं मनसापि न चिन्तये । तथायं पततां क्षुद्रः परासुर्मृगजीवनः ॥ उक्तमात्रे तु वचने तथा स मृगजीवनः । व्यसुः पपात मेदिन्यामग्निदग्ध इव द्रुमः ॥' इति ।

स्त्रीपर्वण्यपि —[2]'ततः कोपपरीताङ्गी पुत्रशोकपरिप्लुता । जगाम शौरिं दोषेण गान्धारी व्यथितेन्द्रिया ॥ इच्छतोपेक्षितो नाशः कुरूणां मधुसूदन । यस्मात्त्वया महाबाहो फलं तस्मादवाप्नुहि ॥ पतिशुश्रूषया यन्मे तपः किञ्चिदुपार्जितम् । तेन त्वां दुरवापेन शप्स्ये चक्रगदाधर ॥ यस्मात् परस्परं घ्नन्तो ज्ञातयः कुरुपाण्डवाः । उपेक्षितास्ते गोविन्द तस्मात् ज्ञातीन् वधिष्यसि ॥ त्वमप्युपस्थिते वर्षे षट्त्रिंशे मधुसूदन । हतज्ञातिर्हतामात्यो हतपुत्रो वनेचरः ॥ अनाथवदविज्ञातो लोकेष्वनभिलक्षितः । कुत्सितेनाभ्युपायेन निधनं समवाप्स्यसि ॥ तवाप्येवं हतसुताः निहतज्ञातिबान्धवाः । स्त्रियः परितपिष्यन्ति यथैव भरतस्त्रियः ॥' इति । एतदनुरूपं फलमपि प्राप्तमिति मौसले प्रतिपादितम् । विस्तरभयान्न लिख्यते ॥

---

1. ६३ अध्याये ३५-- ३९ श्लोकाः ।
2. २५ अध्याये ३८, ४०-- ४६ श्लोकाः ।

नेदं शरीरं रक्षिष्ये जीवितं वापि राक्षस ॥ २१ ॥

न हि शक्ष्याम्युपक्रोशं पृथिव्यां दातुमात्मनः ॥ २२ ॥

अनेन प्राणपरित्यागेनापि लोकापवादपरिहरणपूर्वकं यशः संरक्षणीयमिति सूचितम् । तथा च रघुवंशे कालिदासः—[1] 'निश्चित्य चानन्यनिवृत्ति वाच्यं त्यागेन पत्न्याः परिमार्ष्टुमैच्छत् । अपि स्वदेहात् किमुतेन्द्रियार्थात् यशोधनानां हि यशो गरीयः ॥ तदेव[ष] सर्गः करुणार्द्रचित्तैर्न मे भवद्भिः प्रतिषेधनीयः । यद्यर्थिता निर्गतवाच्यशल्यान् प्राणान्मया धारयितुं चिरं वः ॥' इति ॥

इत्यभिधाय तूष्णीमासीनां सीतां यदि मत्सविधं नाभ्येषि वत्सरान्ते सूदास्त्वां छेत्स्यन्तीत्यभिधाय तत्संरक्षणाय राक्षसीः समाज्ञाप्य प्रतिप्रयाते दशानने, तत्क्षणमेव तच्छासनान्निशाचरीभिः निखिलशोकापनोदिकां अशोकवनिकां प्रापिता सीता

पतिं स्मरन्ती दयितं च दैवतं ।
विचेतनाभूद्भयशोकपीडिता ॥

इति षट्पञ्चाशः सर्गः ॥

अथ सप्तपञ्चाशत्प्रभृतित्रिषष्टितमपर्यन्ताः सर्गाः ॥

तेषु—ततः कपटहाटकमृगरूपधारिणं ताटकेयमस्त्रप्रहारेण निर्गलितप्राणं विधाय तूर्णमेवाश्रमाभिमुखं प्रस्थितस्य रामभद्रस्य

क्रूरस्वनोऽथ गोमायुर्विननादास्य पृष्ठतः ।
स तस्य स्वरमाज्ञाय दारुणं रोमहर्षणम् ।
चिन्तयामास गोमायोः स्वरेण परिशङ्कितः ॥ ३ ॥

1. रघुवंशे १४ सर्गे ३५ श्लोकः ४२ श्लोकश्च ।

अशुभं बत मन्येऽहं गोमायुर्वाश्यते यथा ॥ ३½ ॥

अनेन गोमायुस्वरोऽशुभकर इत्युक्तम् । तथा च **सभापर्वणि**—
[1]'ततो राज्ञो धृतराष्ट्रस्य गेहे गोमायुरुच्चैर्व्याजहाराग्निहोत्रे । तं रासभाः प्रत्यभाषन्त राजन् समन्ततः पक्षिगणाश्चैव रौद्राः ॥ तं वै शब्दं विदुरस्तत्त्ववेदी शुश्राव घोरं सुबलात्मजा च । भीष्मद्रोणौ गौतमश्चापि विद्वान् स्वस्ति स्वस्तीत्यपि चैवाहुरुच्चैः ॥ ततो राज्ञी विदुरश्चापि विद्वान् तमुत्पातं घोरमालक्ष्य राज्ञे । निवेदयामासतुरार्तवत्तदा ततो राजा वाक्यमिदं बभाषे ॥' इति ।

एवं परिचिन्तयमानं—

तं दीनमानसं दीनमासेदुर्मृगपक्षिणः ।
सव्यं कृत्वा महात्मानं घोरांश्च ससृजुः स्वरान् ॥ १२ ॥

अनेन मृगपक्षिणां अप्रदक्षिणगमनमशुभकरमित्युक्त्या प्रदक्षिणगमनं शुभकरमिति सूचितम् । तथा च **रत्नमालायां**—'मृगा विहङ्गाश्च गताः प्रदक्षिणं महीभृतां काङ्क्षितकार्यसिद्ध्ये । मृगा व्रजन्तः परमोजसंख्यया नृपावलोके शकुनः प्रयाणवत् ॥ ज्याहिकाहिशशसूकरगोधाकीर्तनं शुभमुदाहृतमाद्यैः । नो रुतं न च विलोकनमेषां अन्यथा कथितमृक्षकपीनाम् ॥' इत्यादि । सर्वशकुनजातं प्रागेव प्रपञ्चितम् ॥

तदनु जनकनन्दिनीमपहाय समागच्छन्तं लक्ष्मणमवलोक्य भृशतरमुद्विग्नहृदयो रामभद्र एवमवादीत् ॥

यथा वै मृगसङ्घाश्च गोमायुश्चैव भैरवम् ।
वाश्यन्ते शकुनाश्चापि प्रदीप्तामभितो दिशम् ॥ २२ ॥

अत्र प्रदीप्तदिगभिमुखतया मृगादिवाशनमशुभकरमित्युक्तम् । तच्च प्रागेव प्रपञ्चितम् ॥

---

1. ७१ अध्याये २२—२४ श्लोकाः ।

मनश्च मे दीनमिहाप्रहृष्टं
चक्षुश्च सव्यं कुरुते विकारम् ।
असंशयं लक्ष्मण नास्ति सीता
हृता मृता वा पथि वर्तते वा ॥ २९ ॥

अनेन पुरुषस्य मनसोऽसन्तोषो वामनेत्रस्फुरणमशुभसूचकमित्युक्त्या दक्षिणनेत्रस्फुरणं मनस्सन्तोषः च शुभकर इति सूचितम् । तथा च **कालिदासः**—[1] 'तस्यां रघोस्सूनुरुपस्थितायां वृणीत वा नेति समाकुलोऽभूत् । वामेतरस्संशयमस्य बाहुः केयूरबन्धोच्छ्वसितो नुनोद ॥' इति ।

तत्किमिति निर्जनवने जानकीं परित्यज्य समागतोऽसीति लक्ष्मणं विगर्हमाणो,

विनिःश्वसन् शुष्कमुखो विवर्णः, प्रहृष्टरोमा व्यथितो बभूव ।

अनेन वैवर्ण्यादिकमशुभकरमिति सूचितम् । तथा च **गीतायां** [2] 'सीदन्ति मम गात्राणि मुखं च परिशुष्यति । वेपथुश्च शरीरे मे रोमहर्षश्च जायते ॥ गाण्डीवं स्रंसते हस्तात् त्वक् चैव परिदह्यते । न च शक्नोम्यवस्थातुं भ्रमतीव च मे मनः ॥' इति ।

ततस्तद्वचनश्रवणसन्तप्तहृदयो लक्ष्मणो राममेवमुवाच — परित्राहीत्यार्तस्वरं आर्यस्वरसदृशमाकर्ण्य विदीर्णहृदयया जानक्या रक्षोवशमागतं भ्रातरं जानीहीत्यभिहितः तामेवमब्रवं —

विगर्हितश्च नीचश्च कथमार्योऽभिधास्यति ।
त्राहीति वचनं सीते यस्त्रायेत् त्रिदशानपि ॥ ११ ॥ इति ॥

---

1. रघुवंशे ६ सर्गे ६८ श्लोकः ।
2. प्रथमाध्याये २९, ३० श्लोकौ ।

अनेन शूराणां वैक्लव्यमनुचितमिति सूचितम् । तथा च **गीतायां** [1]'कुतस्त्वा कश्मलमिदं विषमे समुपस्थितम् । अनार्यजुष्टमस्वर्ग्यमकीर्तिकरमर्जुन ॥ क्लैब्यं मा स्म गमः पार्थ नैतत्त्वय्युपपद्यते । क्षुद्रं हृदयदौर्बल्यं त्यक्त्वोत्तिष्ठ परन्तप ॥' इति ॥

तदधुना मायाविना मारीचेन रामस्वरमवलम्ब्य समुदीरितमार्तस्वरमाकर्णयन्ती भवती न वैक्लव्यं अवलम्बितुमर्हतीति वादिनमपि मामतिदारुणमिदं वचः प्रत्युवाच—

भावो मयि तवात्यर्थं पाप एव निवेशितः ।
विनाशे भ्रातरि प्राप्ते न च त्वं मामवाप्स्यसि ॥ १७ ॥

इति तद्वचनमाकर्ण्य विदीर्णहृदयः तूर्णमेव भवदभ्यर्णमवतीर्णोऽस्मि इति वदन्तं लक्ष्मणं

सर्वथा त्वविनीतं ते सीतया यत्प्रचोदितः ।
क्रोधस्य वशमापन्नो नाकरोः शासनं मम ॥ २४ ॥

इत्यभिधाय,

भृशमाव्रजमानस्य तस्याधो वामलोचनम् ।
प्रास्फुरच्चास्खलद्रामो वेपथुश्चाप्यजायत ॥ १ ॥

अनेन स्खलनकम्पने अशुभकरे इति सूचितम् । अस्मिन्नर्थे 'वेपथुश्च शरीरे मे' इत्यादिगीतावचनं प्रागुदाहृतम् ॥

एवमशुभसंसूचकनिमित्तावलोकनसमाकुलान्तःकरणो रामभद्रः प्रियाविरहितां पर्णशालामवलोक्य किमियं पुष्पापचयाय वनं गता स्यात्; अथवा जलाहरणाय नदीं पद्मिनीं, आहोस्वित् समागतं मां परिहसितुं वृक्षैराच्छाद्यात्मानं निलीना भवेत्;

---

1. द्वितीयाध्याये २, ३ श्लोकौ ।

नात्यर्थं हास्यशीलासि किमर्थं मामुपेक्षसे ।। २७ ।।
विशेषेणाश्रमस्थाने हासोऽयं न प्रशस्यते ।। ७ ।।

अनेन पतिव्रताः कौतुकार्थमपि नातिपरिहसन्तीति सूचितम् । तथा **चोद्योगे** विदुरः—[1] 'अनाम्नायमला वेदा ब्राह्मणस्याव्रतं मलम् । कौतूहलमला साध्वी विप्रवासमलाः स्त्रियः ।।' इति ।।

विवशं शोकसन्तप्तं दीनं भग्नमनोरथम् ।
मामिहोत्सृज्य करुणं कीर्तिर्नरमिवानृजुम् ।। १० ।।

अनेनानृजोः कीर्तिनाश इत्यनेन ऋजोः कीर्तिर्भवतीति सूचितम् । तथा **चोद्योगे** धृतराष्ट्रं प्रति विदुरः—[2] 'सर्वतीर्थेषु च स्नानं सर्वभूतेषु चार्जवम् । उभे ह्येते समे स्यातामार्जवं वा विशिष्यते ।। आर्जवं प्रतिपद्यस्व पुत्रेषु सततं प्रभो । इह कीर्तिं परां प्राप्य प्रेत्य स्वर्गमवाप्स्यसि ।।' इति ।।

इति सुचिरं विलप्य लक्ष्मणमेवमवादीत्—

पूर्वं मया नूनमभीप्सितानि
पापानि कर्माण्यसकृत्कृतानि ।
तत्रायमद्यापतितो विपाको
दुःखेन दुःखं यदहं विशामि ।। ४ ।।

अनेन जन्मान्तरकृतपापानुरूपं फलं भवतीत्ययमर्थः **स्त्रीपर्वणि**— [3] 'नूनं व्यपकृतं किञ्चिन्मया पूर्वेषु जन्मसु । येन मां दुःखभागेषु धाता कर्मसु युक्तवान् ।।' इति ।।

---

1. ३९ अध्याये ५९, ६० श्लोकयोः उत्तरार्धे ।
2. ३५ अध्याये २, ३ श्लोकौ ।
3. प्रथमाध्याये १८, १९ श्लोकयोः उत्तरार्धपूर्वार्धे ।

लक्ष्मणः— शोकं विमुञ्चार्य धृतिं भजस्व
सोत्साहता चास्तु विमार्गणेऽस्याः ।
उत्साहवन्तो हि नरा न लोके
सीदन्ति कर्मस्वतिदुष्करेषु ॥ १९ ॥

इति राममवदत् । अनेन धैर्योत्साहौ शोकमपनुद्य कार्यसाधकाविति सूचितम् । तथा च उद्योगे विदुरः—[1] 'सन्तापाद्भ्रश्यते रूपं सन्तापाद्भ्रश्यते बलम् । सन्तापाद्भ्रश्यते ज्ञानं सन्तापाद्व्याधिमृच्छति ॥ अनवाप्यं च शोकेन शरीरमुपतप्यते । अमित्राश्च प्रहृष्यन्ति मा स्म शोके मनः कृथाः ॥ प्रशाधि पृथिवीं कृत्स्नां हतामित्रो नृपोत्तम ।' इति ॥

द्रोणपर्वण्यपि अभिमन्युवधे धर्मपुत्रं प्रति व्यासः—[2] 'शोचतो हि महाराज ह्यघमेवाभिवर्धते । तस्माच्छोकं परित्यज्य श्रेयसे प्रयतेद्बुधः ॥ प्रहर्षमभिमानं च सुखप्राप्तिं च चिन्तयेत् । एवं ज्ञात्वा स्थिरो भूत्वा जह्यरीन्धैर्यमाप्नुहि ॥' इति ॥

ततो लक्ष्मणेन बहु सान्त्वितोऽपि,

हा प्रिये क्व गता भद्रे हा सीतेति पुनः पुनः ॥ ३५ ॥
इत्येवं विलपन्रामः परिधावन् वनाद्वनम् ॥
क्वचिदुद्भ्रमते वेगात् क्वचिद्विभ्रमते बलात् ।
क्वचिन्मत्त इवाभाति कान्तान्वेषणतत्परः ॥ ३६ ॥
स वनानि नदीः शैलान् गिरिप्रस्रवणानि च ।

---

1. ३६ अध्याये ४४, ४५ श्लोकौ । अन्ते विद्यमानं 'प्रशाधि पृथिवीं' इत्यादिकं श्लोकार्धं तु मुद्रितपुस्तके नात्र दृश्यते ।
2. ७१ अध्याये १९ श्लोकः २० श्लोकस्य पूर्वार्धं च । २१ श्लोकस्य पूर्वार्धं तु कथंचित् भावमात्रेण 'एवं ज्ञात्वा' इत्यन्तिममर्धमनुकरोति ।

काननानि च वेगेन भ्रमत्यपरिसंस्थितः ॥ ३७ ॥
सीतया रहितोऽहं वै न हि जीवामि लक्ष्मण ॥ ६ ॥
इतीव सौमित्रिमुदग्रपौरुषं
ब्रुवन्तमार्तो रघुवंशवर्धनः ।
न चिन्तयामास धृतिं विमुक्तवा
पुनश्च दुःखं महदभ्युपागमत् ॥ २० ॥

नन्वत्र रामस्य दुःखप्रलापादिकं प्रतिपादितम् । तदसङ्गतम् । दुःखप्रलापादेः 'नष्टायामपि वैदेह्यां हृतायामपि चानघ । शोचितुं नार्हसे वीर यथान्यः प्राकृतस्तथा ॥ त्वद्विधा हि न शोचन्ति सततं समदर्शिनः ॥' इति अग्रेतनलक्ष्मणवचनपर्यालोचनया अज्ञानिकार्यत्वावगमेन सर्वज्ञस्य रामभद्रस्य दुःखादेरयुक्तत्वादिति चेन्न । [1]'ज्ञानिनामपि चेतांसि देवी भगवती हि सा । बलादाकृष्य मोहाय महामाया प्रयच्छति ॥' इति मार्कण्डेयपुराणवचनेन, [2]'दैवी ह्येषा गुणमयी मम माया दुरत्यया' इति गीतावचनेन च मायायाः दुरतिक्रमत्वावगमेन मायाप्रयुक्तविषयासक्त्या विद्यमानस्यापि ज्ञानस्य अभिभवेन दुःखानुभवप्रलापादेः संभवात् । अत एव लक्ष्मणकृतं, 'शोकेनाभिप्रसुप्तं ते ज्ञानं संबोधयाम्यहम्' इति प्रबोधनमुपपन्नम् ॥

किञ्च अतिप्रीतिविषया अपि विषयाः परेणापहृताः सन्तो मनस्सन्तापकराः बुद्धिपूर्वकतया स्वयं संत्यक्ताश्चेत् न सन्तापं जनयन्तीति सार्वजनीनमेतत् । एवञ्च परेण सीतापहरणदशायां स्वेनापरित्यक्ततया दुःखप्रलापादिकमुचितमेव । अत एव प्राणसमामप्येतादृशीं सीतां स्वयं परित्यज्य दुःखेन विनैवावस्थानं प्रतिपादितमुत्तररामायणे ॥

---

1. सप्तमाध्याये २४ श्लोकस्य पूर्वार्धः ।
2. ७ अध्याये १३½ श्लोकः ।

अन्यापहरणस्वयंपरित्यागाभ्यां दुःखादुःखे इत्ययमर्थो **मोक्षधर्मे पिङ्गलगीतायाम्** -- [1]'यन्निमित्तो भवेच्छोकस्तापो वा दुःखमेव वा । आयासो वा यतोमूलं एकाङ्गमपि तत्त्यजेत् ॥ यद्यत्त्यजति कामानां तत्सुखस्याभिपूर्यते । कामानुसारी पुरुषः कामाननु विनश्यति ॥ यथा काष्ठं च काष्ठं च समेयातां महोदधौ । समेत्य च व्यपेयातां तद्वद्भूतसमागमः ॥ एवं पुत्राश्च पौत्राश्च ज्ञातयो बान्धवास्तथा । तेषां स्नेहो न कर्तव्यो विप्रयोगो ध्रुवो हि तैः ॥ सुखं निराशः स्वपिति नैराश्यं परमं सुखम् । आशामनाशां कृत्वापि सुखं स्वपिति पिङ्गला ॥' इति ॥

प्राचीना अपि-- 'अवश्यं यातारश्चिरतरमुषित्वापि विषयाः वियोगे को भेदस्त्यजति न जनो यत्स्वयममून् । व्रजन्तः स्वातन्त्र्यादतुलपरितापाय मनसः स्वयं त्यक्ता ह्येते शमसुखमनन्तं विदधति ॥' इति । एवञ्च महापुरुषाणामपि दुःखजनिका विषयासक्तिरित्यतो दुःखभीरुभिः सर्वैरपि विषयासक्तिः प्रयत्नेन परित्याज्येति सिद्धम् ॥

इति सप्तपञ्चाशत्प्रभृतित्रिषष्टितमपर्यन्ताः सर्गाः ॥

अथ चतुष्षष्टितमः सर्गः ॥

चतुष्षष्टितमे— ततस्तद्वचनमाकर्ण्यापि शोकवेगमसहमानेन रामेण सकरुणं क्वेदानीं वैदेहीति पृष्टैर्मृगैर्दक्षिणदिगाभिमुखैः दर्शितं नभःस्थलमवलोक्य तदिङ्गितज्ञो लक्ष्मणो रामेण सह तामेव दिशमभिजगाम । तत्रैव वसुन्धरानिपतितां पुष्पधारामवलोक्य सीतायै मया दत्तानीमानि पुष्पाणीति समाकुलान्तःकरणो रामः सत्वरमग्रतोऽवलोक्य लक्ष्मणमेवमवादीत्— '**राक्षसेन** हृतायास्सीताया इयमग्रे पदपङ्क्तिरालक्ष्यते । इदमग्रे भग्नं धनुः,

---

1. १७४ अध्याये ४३, ४५, १५, १६, ६२ श्लोकाः क्रमेण भवन्ति ।

एतद्विशीर्णं कवचं, अयं चापविद्धो रथः, इमे च विशीर्णा रथाक्षप्रमाणा बाणाः, सोष्णीषकुण्डलौ इमौ चामरग्राहिणौ निपतितौ लक्ष्येते । तन्नूनं मैथिलीनिमित्तं विवदमानयोः वनचरयोः द्वन्द्वयुद्धं वृत्तमालक्ष्यते । तदधुना करुणवेदिनं मां त्रिलोकीनिग्रहणे समर्थमजानन्तो जनाः परिभवन्ति ॥

कर्तारमपि लोकानां शूरं करुणवेदिनम् ।
अज्ञानादवमन्येरन् सर्वभूतानि लक्ष्मण ॥ ५६ ॥

मृदुं लोकहिते युक्तं दान्तं करुणवेदिनम् ।
निर्वीर्य इति मन्यन्ते नूनं मां त्रिदशेश्वराः ॥ ५७ ॥

मां प्राप्य हि गुणो दोषः संवृत्तः पश्य लक्ष्मण ॥ ५८½ ॥

अनेन क्षमावन्तं पुरुषं जनः अज्ञानात् निर्वीर्यं मन्यते । वस्तुतस्तु क्षमागुण एव सूक्तम् । तथा च उद्योगे विदुरः —[1] 'एकः क्षमावतां दोषो द्वितीयो नोपपद्यते । यदेनं क्षमया युक्तं अशक्तं मन्यते जनः ॥ सोऽस्य दोषो न मन्तव्यः क्षमा हि परमं बलम् । क्षमा गुणो ह्यशक्तानां शक्तानां भूषणं क्षमा ॥ क्षमा वशीकृतिर्लोके क्षमया किं न साध्यते ।' इति ॥

तदद्यैव रुक्मपुंखैः विशिखैः निरवकाशमाकाशं कुर्वन् विप्रणष्ट-भास्करं शुष्यमाणसागरं मर्दितमृगद्विजं अखिलं जगत् करिष्यामि ॥

आकर्णपूर्णैरिषुभिः जीवलोकं परावरैः ।
करिष्ये मैथिलीहेतोरपिशाचमराक्षसम् ॥ ६७ ॥

इत्यभिधाय रोषारुणितलोचनो रामभद्रः सशरं धनुरादाय युगान्ताग्निरिव क्रुद्ध इदं वचनमब्रवीत् ॥

---

1. ३३ अध्याये ४८, ४९ श्लोकौ ५० श्लोकस्य पूर्वार्धं च ।

यथा जरा यथा मृत्युर्यथा कालो यथा विधिः ।
नित्यं न प्रतिहन्यन्ते सर्वभूतेषु लक्ष्मण ॥
तथाहं क्रोधसंयुक्तो न निवार्योऽस्मि सर्वदा ॥ ७५ ॥

अनेन मृत्युजरादयोऽशक्यप्रतीकारा इति सूचितम् । तथा च **द्रोणपर्वणि**—[1] 'न ह्येव ब्रह्मचर्येण न वेदाध्ययनेन च । न क्रियाभिर्न चास्त्रेण मृत्योः कश्चिन्निवार्यते ॥ क्रूरस्सर्वविनाशाय कालोऽसौ नातिवर्तते ॥' इति ॥

स्त्रीपर्वणि—[2] 'अयुध्यमानो म्रियते युध्यमानश्च जीवति । कालं प्राप्य महाराज न कश्चिदतिवर्तते ॥ अन्यथा चिन्तिता ह्यर्था नरैस्तात मनस्विभिः । अन्यथैव प्रपद्यन्ते दैवादिति मतिर्मम ॥' इति । 'नौषधानि न शस्त्राणि न होमा न पुनर्जपाः । त्रायन्ते मृत्युनोपेतं जरया वापि भारत ॥' इति च ॥

पुरेव मे चारुदतीमनिन्दितां
दिशन्ति सीतां यदि नाद्य मैथिलीम् ।
सदेवगन्धर्वमनुष्यपन्नगं
जगत्सशैलं परिवर्तयाम्यहम् ॥ ७६ ॥

अनेन शोकसमये दुर्बल इव प्रबलः शोकेन न सीदति । किन्तु तत्प्रतीकारायाग्रहेण महारयः प्रवर्तत इत्युक्तम् । अत एव महापुरुषस्यार्जुनस्य अभिमन्युवधानन्तरं एवं प्रवृत्तिः द्रोणपर्वणि दृश्यते—[3] 'हा पुत्र इति निःश्वस्य व्यथितो न्यपतद्भुवि । प्रतिलभ्य ततस्संज्ञां वासविः क्रोधमूर्छितः ॥ कम्पमानो ज्वरेणेव निःश्वसंस्तु मुहुर्मुहुः । पाणौ पाणिं विनिष्पिष्य

---

1. ११ अध्याये ४४, ४५ श्लोकयोः उत्तरपूर्वार्धे ५० श्लोकस्य पूर्वार्धे च ।
2. द्वितीयाध्याये ५ श्लोकः ।
3. ७३ अध्याये १७, १९, २०, २१—३७, ४५—४९ श्लोकाः ।

श्वसमानोऽश्रुनेत्रवान् ॥ उन्मत्त इव विप्रेक्षन्निदं वचनमब्रवीत् । सत्यं वः प्रतिजानामि श्वोऽस्मि हन्ता जयद्रथम् ॥ धार्तराष्ट्रप्रियकरं मयि विस्मृत-सौहृदम् । पापं बालवधे हेतुं श्वोऽस्मि हन्ता जयद्रथम् ॥ रक्षमाणाश्च तं संख्ये ये मां योत्स्यन्ति केचन । अपि द्रोणकृपौ राजन् छादयिष्यामि तान् शरैः ॥ यद्येतदेवं संग्रामे न कुर्यां पुरुषर्षभाः । मा स्म पुण्यकृतां लोकान् प्राप्नुयां शूरसंमतान् ॥ ये लोका मातृहन्तॄणां ये चापि पितृ-घातिनाम् । गुरुदाररतानां ये पिशुनानां च ये सदा ॥ साधूनसूयतां ये च ये चापि परिवादिनाम् । ये च निक्षेपहर्तॄणां ये च विश्वासघातिनाम् ॥ भुक्तपूर्वां स्त्रियं ये च विन्दतामयशस्विनीम् । ब्रह्मघ्नानां च ये लोका ये च गोघातिनामपि ॥ पायसं वा यवान्नं वा शाकं कृसरमेव वा । संयावा-पूपमांसानि ये च लोका वृथाश्नताम् । तानह्नैवाधिगच्छेयं न चेद्धन्यां जयद्रथम् । वेदाध्यायिनमत्यर्थं शंसितं वा द्विजोत्तमम् । अवमन्यमानो यान् याति वृद्धान्साधून् गुरूनपि । स्पृशतो ब्राह्मणं गां च पादेनाग्निं च या भवेत् ॥ याऽप्सु श्लेष्मपुरीषं च मूत्रं वा मुञ्चतां गतिः । तां गच्छेयं गतिं कष्टां न चेद्धन्यां जयद्रथम् ॥ नग्नस्य स्नायमानस्य या च वन्ध्यातिथेर्गतिः । उत्कोचिनां मृषोक्तीनां वञ्चकानाञ्च या गतिः ॥ आत्मापहारिणां या च या च मिथ्याभिशंसिनाम् । भृत्यैस्संदिश्यमानानां पुत्रदाराश्रितैस्तथा ॥ असं-विभज्य क्षुद्राणां या गतिर्मृष्टमश्नताम् । तां गच्छेयं गतिं घोरां न चेद्धन्यां जयद्रथम् ॥ संश्रितं चापि यस्त्यक्त्वा साधुं तद्वचने रतम् । न बिभर्ति नृशंसात्मा निन्दते चोपकारिणम् । अर्हते प्रातिवेश्याय श्राद्धं यो न ददाति च । अनर्हेभ्यश्च यो दद्याद्वृषलीपतये तथा ॥ मद्यपो भिन्नमर्यादः कृतघ्नो भर्तृनिन्दकः । तेषां गतिमियां क्षिप्रं न चेद्धन्यां जयद्रथम् ॥ धर्मादपेता ये चान्ये मया नात्रानुकीर्तिताः । ये चानुकीर्तितास्तेषां गतिं क्षिप्रमवाप्नु-याम् ॥ यदि व्युष्टामिमां रात्रिं श्वो न हन्यां जयद्रथम् । इमां चाप्यपरां भूयः प्रतिज्ञां मे निबोधत ॥ यद्यस्मिन्नहते पापे सूर्योऽस्तमुपयास्यति । इहैव

संप्रवेष्टाहं ज्वलितं जातवेदसम् ॥ असुरसुरमनुष्याः पक्षिणो वोरगा वा पितृरजनिचरा वा ब्रह्मदेवर्षयो वा । चरमचरमपीदं यत्परं चापि तस्मात् तदपि मम रिपुं तं रक्षितुं नाद्य शक्ताः ॥ यदि विशति रसातलं तदग्र्यं वियदपि देवपुरं दितेः पुरं वा । तदपि शरशतैरहं प्रभाते भृशमभिपत्य रिपोः शिरोभिहन्ता ॥' इति ॥

इति चतुष्षष्टितमः सर्गः ॥

अथ पञ्चषष्टितमः सर्गः ॥

पञ्चषष्टितमे— अथ लक्ष्मणस्सकललोकविनाशाय समुद्यतायुधं अपरमिव पिनाकपाणिं धनुष्पाणिं रामभद्रमवलोक्य परिशुष्यता मुखेन सविनयमिदमुदाजहार—

पुरा भूत्वा मृदुर्दान्तः सर्वभूतहिते रतः ।
न क्रोधवशमापन्नः प्रकृतिं हातुमर्हसि ॥ ४ ॥

चन्द्रे लक्ष्मीः प्रभा सूर्ये गतिर्वायौ भुवि क्षमा ।
एतच्च नियतं सर्वं त्वयि चानुत्तमं यशः ॥ ५ ॥

अनेन आपत्सु प्राप्तं दुःखं सोढ्वैव स्थेयमिति महापुरुषलक्षणमिति सूचितम् । तथा चारण्यके—[1] 'क्षन्तव्यं पुरुषेणेह सर्वापत्सु सुशोभने । क्षमावतो हि भूतानां जन्म चैव प्रकीर्तितम् ॥' इति ॥

नैकस्य तु कृते लोकान् विनाशयितुमर्हसि ।
युक्तदण्डा हि मृदवः प्रशान्ता वसुधाधिपाः ॥ ९ ॥

सदा त्वं सर्वभूतानां शरण्यः परमा गतिः ॥ ९½ ॥

---

1. २९ अध्याये ४२ श्लोकः ।

अनेन अपराधिष्वेव दण्डो नानपराधिषु इति सूचितम्। तथा च मनुः—[1]'अदण्ड्यान्दण्डयन्राजा दण्ड्यांश्चैवाप्यदण्डयन्। अयशो महदाप्नोति नरकं चाधिगच्छति ॥' इति ॥

सरितस्सागराश्शैला देवगन्धर्वदानवाः।
नालं ते विप्रियं कर्तुं दीक्षितस्येव साधवः ॥ ११ ॥

अनेन प्रक्रान्तयज्ञस्य अहिताचरणं न कर्तव्यमित्युक्तम्। तथा च श्रुतिः 'नैनं शल्यं नाभिचरितमागच्छति' इति। तदधुना दुर्गमानपि सकललोकमार्गान् निरर्गलं मार्गमाणः,

शिवेन साम्ना विनयेन सीतां
नयेन न प्राप्स्यसि चेन्नरेन्द्र।
ततस्समुत्पादय हेमपुङ्खैः
महेन्द्रवज्रप्रतिमैः शरौघैः ॥ १६ ॥

अनेन सामाद्युपाय एव प्रयोक्तव्यः। तदसाध्ये दण्ड इत्युक्तम्। तथा च मनुः—[2]'त्रयाणामप्युपायानां पूर्वोक्तानामसंभवे। युद्ध्यते दण्डसंपत्तौ विजयेत रिपूंस्तदा ॥' इति। राजधर्मेपि—[3]'संनिपातो न मन्तव्यः शक्ये सति कथञ्चन। सान्त्वभेदप्रदानानां युद्धमुत्तरमुच्यते ॥' इति।

इति पञ्चषष्टितमः सर्गः ॥

---

1. अष्टमाध्याये १२८ श्लोकः।
2. सप्तमाध्याये २०० श्लोकः।
3. १०२ अध्याये २२ श्लोकः।

अथ षट्षष्टितमः सर्गः ॥

षट्षष्टितमे—तदनु निजानुजेन सविनयमनुनीतोपि रामभद्रः सीतामेव मनसि विचिन्तयन् शोकसन्तप्तमानसो महान्तं मोहमवाप । तथा मुह्यन्तं पादप्रणामपूर्वकं शनैः प्रतिबोध्य सौमित्रिरेवमुवाच—'देव, विदितवेदितव्यस्य अधीतसकलशास्त्रस्यापि तव दुरन्तं चिन्तार्णवावगाहनं अत्याश्चर्यमातनोति । को हि नाम प्राज्ञः प्राकृत इव अल्पसारां संसारवागुरामाविश्य शोकमनुभवेत् ।

यदि दुःखमिदं प्राप्तं काकुत्स्थ न सहिष्यसे ।
प्राकृतश्चाल्पसारश्च इतरः कस्सहिष्यति ॥ ५ ॥

अनेन आपदि महद्भिः प्राप्तः क्लेशः सोढव्य इति सूचितम । तथा **चोद्योगे**—[1] 'प्राप्यापदं न व्यथते कदाचित् उद्योगमन्विच्छति चाप्रमत्तः । दुःखं च काले सहते महात्मा धुरन्धरस्तस्य जितास्सपत्नाः ॥' इति । **कामन्दकेपि**—[2] 'उत्साहं च प्रभावञ्च तथा क्लेशसहिष्णुताम् । धृतिं चैवानुरागं च स्थैर्यं चापदि लक्षयेत् ॥' इति । लोके स्वभाव एवायं यदयं ययातिः शक्रसमपराक्रमोपि स्थानप्रच्युतिमवाप । सकलमहर्षिवरिष्ठोपि वसिष्ठः पुत्रशतमकस्मादेव दिष्टां गतिं गतमपश्यत् ॥

तत्वतो हि नरश्रेष्ठ बुद्ध्या समनुचिन्तय ।
बुद्धियुक्ता महाप्राज्ञा विजानन्ति शुभाशुभे ॥ १६ ॥

अनेन विचार्यैव कर्म आरम्भणीयमिति सूचितम् । तथा **चारण्यके द्रौपदी**—[3] 'तिले तैलं गवि क्षीरं काष्ठे पावकमन्ततः । धिया धरो

---

1. ३३ अध्याये १०७ श्लोकः ।
2. प्रकृतिसंपन्नामके ७ सर्गे ३४ श्लोकः ।
3. ३२ अध्याये २७, २८ श्लोकौ ।

विजानीयादुपायं चास्य सिद्धये ॥ ततः प्रवर्तते पश्चात् कारणैस्तस्य सिद्धये । तां सिद्धिमुपजीवन्ति कर्मजामिह जन्तवः ॥' इति ॥ **कामन्दकेपि** — 'बुद्ध्यैवोपक्रमः श्रेयान् फलनिष्पत्तये सदा ॥' इति ॥

अदृष्टगुणदोषाणां अधृतानां तु कर्मणाम् ।
नान्तरेण क्रियां तेषां फलमिष्टं प्रवर्तते ॥ १७ ॥

अनेन प्राप्तं सुखं दुःखं वा पूर्वकर्माधीनमित्युक्तम् । तथा **चाणक्ये** — [1] 'यानि प्राप्नोति पुरुषः तत्फलं पूर्वकर्मणाम् । धातापि हि स्वकर्मैव तैस्तैर्हेतुभिरीश्वरः ॥ विदधाति विभज्येह फलं पूर्वकृतं नृणाम् ।' इति ॥

मामेवमसकृदनुशासितवतो विदितवेदितव्यस्य भवतोऽनुशासने कः समर्थो भवेत् । तदधुना परिज्ञाय च अमानुषपराक्रममात्मानं सकललोकनाशकादुपक्रमादुपारम्य ते भार्यापहारिणं विज्ञाय समुद्धर्तुमर्हसि इति ॥

इति षट्षष्टितमः सर्गः ॥

अथ सप्तषष्टितमः सर्गः ॥

सप्तषष्टितमे — पूर्वजोऽप्युक्तमात्रस्तु लक्ष्मणेन सुभाषितम् ।
सारग्राही महासारं प्रतिजग्राह राघवः ॥ १ ॥

अनेन बालोदीरितमपि युक्तं वचो ग्राह्यमित्युक्तम् । तथा **चोद्योगे विदुरः** — [2] 'अप्युन्मत्तात्प्रलपतो बालाच्च परिसर्पतः । सर्वतस्सारमादद्यादश्मभ्य इव काञ्चनम् ॥' इति ॥

---

1. ३२ अध्याये २० श्लोकस्य उत्तरार्धं २१ श्लोकश्च ।
2. ३४ अध्याये ३२ श्लोकः ।

ततस्सन्निगृह्य समुज्जृम्भितं कोपं, अवष्टभ्य चामीकरविभूषितं चापं, अनुजेन सह तदेव जनस्थानं विचिन्वन् वसुन्धरानिपतितं धराधरकूटनिभं जटायुषमवलोक्य निश्शङ्कमयमेव मत्प्रियामपहृतवानिति निश्चित्य, तमभिहन्तुं सन्धाय धनुषि शरवरं गृध्रराजमभ्यधावत् । तदनु यथावृत्त-माख्यातवन्तं प्रख्यातपराक्रमं गतायुषं जटायुषं परिष्वज्य, परित्यज्य च कार्मुकं शोकवशो भूमौ निपत्य रामस्सौमित्रिमेवमुवाच—

राज्याद्भ्रंशो वने वासः सीता नष्टा हतो द्विजः ।
ईदृशीयं ममालक्ष्मीर्निर्दहेदपि पावकम् ॥ २५ ॥

इत्यभिधाय कोमलदलाङ्गुलिना करपल्लवेन जटायुषं पस्पर्श ॥

इति सप्तषष्टितमः सर्गः ॥

अथ अष्टषष्टितमः सर्गः ॥

अष्टषष्टितमे — नूनमयमतिक्रूरकर्मणा रावणेन निर्दयमभिहतो दुस्त्यजान्प्राणान् हातुमिच्छति ॥

अयमस्य शरीरेऽस्मिन् प्राणो लक्ष्मण दृश्यते ।
तथाहि स्वरहीनोयं विक्लबस्समुदीक्षते ॥ ३ ॥

इत्यभिधाय केदानीं मत्प्रियेति सकरुणं वदन्तं रामं अवसन्नया वाचा जटायुरेवमुवाच । पौलस्त्यो रावणः सीतामादाय विहायसा दक्षिणां दिशमुत्पतन् मध्येमार्गं निरुन्धानं मां सपक्षच्छेदं पातयामास ॥

उपरुन्धन्ति मे प्राणाः दृष्टिर्भ्रमति राघव ।
पश्यामि वृक्षान्सौवर्णान् उशीरकृतमूर्धजान् ॥ ११ ॥
येन यातो मुहूर्तेन सीतामादाय रावणः ।

विप्रणष्टं धनं क्षिप्रं तत्स्वामी प्रतिपद्यते ॥ १२ ॥
बिन्दो नाम मुहूर्तोऽयं स च काकुत्स्थ नाबुधत् ।

बिन्दो नाम बिन्दुः गुलिकः । तस्मिन् समये आरब्धं कार्यं कर्तुर्विपरीतं भवतीति सूचितम् । तथा चोत्पलपरिमले गौळीप्रकरणे — 'मन्वर्कदिग्दन्तिरसाब्धिनेत्रा सूर्यस्य वारादिविषा मुहूर्ताः । गर्गामरेन्द्रादिमुनीन्द्रवृन्दैः ते निन्दिताः कर्मसु बिन्दसंज्ञाः ॥' इति ॥

प्रियापहारिणं रावणं अन्वेषमाणो मृधे तन्निधनेन मनोरथं साधयिष्यसि भवानित्यभिधाय निक्षिप्तकन्धरो वसुंधरायां प्रसार्य चरणौ दुस्त्यजान् प्राणान् अत्यजत् । तं पितृमित्रभूतं पत्रिणं मान्यतममवगत्य और्ध्वदेहिकेन कर्मणा कृतार्थयितुकामो रामः

या गतिर्यज्ञशीलानामाहिताग्नेश्च या गतिः ।
अपरावर्तिनां या च या च भूमिप्रदायिनाम् ॥ २९ ॥
मया त्वं समनुज्ञातो गच्छ लोकाननुत्तमान् ॥ २९½ ॥

अनेन महदनुज्ञया उत्तमा गतिर्भवतीति सूचितम् । तथा चाथर्वणी श्रुतिः । [1] 'यं यं लोकं मनसा संविभाति विशुद्धसत्वः कामयते यांश्च कामान् । तं तं लोकं जयते तांश्च कामान् तस्मादात्मज्ञं ह्यर्चयेत् भूतिकामः ॥' इति । अत्र भाष्यम् — 'उक्तलक्षणं सर्वात्मानमात्मत्वेन प्रतिपन्नः तस्य सर्वात्मत्वादेव सर्वावाप्तिलक्षणं फलमाह — यं यं लोकं पित्रादिलक्षणं मनसा संविभाति संकल्पयति मह्यमन्यस्मै वा भवेदिति विशुद्धसत्वः क्षीणक्लेशः आत्मविन्निर्मलान्तःकरणः कामयते यांश्च कामान्, प्रार्थयते भोगान्, तं तं लोकं जयते प्राप्नोति तांश्च कामान् सङ्कल्पितांश्च भोगान् । तस्माद्विदुषस्सत्यसङ्कल्पत्वात्, आत्मज्ञं आत्मज्ञानेन विशुद्धान्तःकरणं

1. मुण्डकोपनिषदि तृतीयमुण्डके प्रथमखण्डे १० सूक्तम् ।

ह्यर्चयेत् पूजयेत् । पादप्रक्षालनशुश्रूषणनमस्कारादिभिः भूतिकामो भूतिमिच्छन् । अतः पूजार्ह एवासौ ।' इति ॥

अत एव भूरिश्रवसे उत्तमलोकप्राप्तये कृष्णाभ्यनुज्ञा द्रोणपर्वणि—[1] 'ये लोका मम विमला विभान्त्युग्रा ब्रह्माद्यैस्सुरवृषभैरपीष्यमाणाः । तान् क्षिप्रं व्रजसि सताग्निहोत्रयाजिन् मत्तुल्यो भव गरुडोत्तमाङ्गयानः ॥' इति ॥

तत्रैवाभिमन्युवधानन्तरं सुभद्रानुज्ञापि—[2] 'यज्वनां दानशीलानां ब्राह्मणानां कृतात्मनाम् । चरितब्रह्मचर्याणां पुण्यतीर्थावगाहिनाम् ॥ कृतज्ञानां वदान्यानां गुरुशुश्रूषिणामपि । सहस्रदक्षिणानाञ्च या गतिस्तामवाप्नुहि ॥ या गतिर्युध्यमानानां शूराणामनिवर्तिनाम् । हत्वारीन्निहतानाञ्च सङ्ग्रामे तां गतिं व्रज ॥ गोसहस्रप्रदातॄणां क्रतुदानाञ्च या गतिः । नैवेशिकं चाभिमतं ददतां या गतिश्शुभा ॥ ब्राह्मणेभ्यश्शरण्येभ्यो निधिं निदधतां च या । या चापि न्यस्तदण्डानां तां गतिं गच्छ पुत्रक ॥ ब्रह्मचर्येण यां यान्ति मुनयश्शंसितव्रताः । एकपत्न्यश्च यां यान्ति तां गतिं व्रज पुत्रक ॥ राज्ञां सुचरितैर्या च गतिर्भवति शाश्वती । चातुराश्रमिणां पुण्यैः पावितानां सुरक्षिणाम् ॥ दीनानुकम्पिनां या च सततं संविभागिनाम् । पैशुन्याच्च निवृत्तानां तां गतिं व्रज पुत्रक ॥ व्रतिनां धर्मशीलानां गुरुशुश्रूषिणामपि । अमोघातिथिनां या च तां गतिं व्रज पुत्रक ॥ कृच्छ्रेषु या धारयतामात्मानं व्यसनेषु च । गतिः शोकाग्निदग्धानां तां गतिं व्रज पुत्रक ॥ मातापित्रोश्च शुश्रूषां कल्पयन्तीह ये सदा । स्वदारनिरतानां च या गतिस्तामवाप्नुहि ॥ ऋतुकाले स्वकां भार्यां गच्छतां या मनीषिणाम् । परस्त्रीभ्यो निवृत्तानां तां गतिं व्रज पुत्रक ॥ साम्ना ये सर्वभूतानि पश्यन्ति गतमत्सराः । नारुन्तुदानां क्षमिणां या गतिस्तामवाप्नुहि ॥ मधुमांस-

1. १४३ अध्याये ४८ श्लोकः ।
2. ७८ अध्याये २१—३४ श्लोकाः ।

निवृत्तानां मदाद्दंभात्तथाऽनृतात् । परोपतापं त्यजतां तां गतिं व्रज पुत्रक ॥' इति ॥

नन्वेवं महदनुज्ञया लोकप्राप्तिरित्यङ्गीकारे

गृध्रराज महासत्त्व संस्कृतश्च मया द्विज [व्रज] ॥ ३० ॥

महर्षिकल्पेन च संस्कृतस्तदा

जगाम पुण्यां गतिमात्मनः शुभाम् ॥ ३७ ॥

इति संस्कारहेतुत्वप्रतिपादकवचनविरोध इति चेन्न । प्रतिबन्धकनिवृत्त्यर्थतया संस्कारोपि लोकप्रापक इत्येतत्परत्वात् तस्य वचनस्य । संस्कारस्य प्रतिबन्धकनिवर्तकत्वं च, [1] 'अथ यदु चैवास्मिन् शव्यं कुर्वन्ति यदि च न अर्चिषमेवाभिसंभवन्ति' इत्येतद्व्याख्यानावसरे **छान्दोग्यभाष्ये** प्रतिपादितम् ॥

भाष्यम् — 'यत् यदि उ च एव अस्मिन्नेवंविदि शव्यं शवकर्म मृते कुर्वन्ति । यदि च न कुर्वन्ति ऋत्विजः, सर्वथाप्येवंवित्तेन शवकर्मणा अकृतेनापि प्रतिबद्धो न ब्रह्म प्राप्नोतीति न । न च कृतेन शवकर्मणा कश्चिदभ्यधिको लाभः, 'न कर्मणा वर्धते नो कनीयान्' इति श्रुत्यन्तरात् । शवकर्मण्यनादरं दर्शयन् विद्यां स्तौति । न पुनः शवकर्म एवंविदो न कर्तव्यमिति । अक्रियमाणे तु शवकर्मणि कर्मणां फलारंभे प्रतिबन्धः कश्चिदनुमीयतेऽन्यत्र । यत इह विद्याफलारम्भकाले शवकर्म स्याद्वा न वेति विद्यावतोऽप्रतिबन्धेन फलारंभं दर्शयति' इति । एवञ्चास्मिन् भाष्ये शव्यकर्माकरणे उपकोसलविद्योपासकस्य अप्रतिबन्ध इतरेषां प्रतिबन्धोस्तीति प्रतिपादनात् रामभद्रानुज्ञायामपि प्रतिबन्धनिवृत्त्यै संस्कार उचित एव ॥

इत्यभिधाय सौमित्रिरचितां चितामारोप्य,

---

1. छान्दोग्योपनिषदि चतुर्थाध्याये पञ्चदशखण्डे ५ ऋक् ।

ददाह रामो धर्मात्मा स्वबन्धुमिव दुःखितः ॥ ३१ ॥
स्थूलान् हत्वा समारोहीननुतस्तार तं द्विजम् ॥ ३२ ॥
रोहीमांसानि चोत्कृत्य पेशीकृत्य महायशाः ।
शकुनाय ददौ रामो रम्ये हरितशाद्वले ॥ ३३ ॥
यत्तत्प्रेतस्य मर्त्यस्य कथयन्ति द्विजातयः ।
तत्स्वर्गगमनं तस्य क्षिप्रं रामो जजाप ह ॥ ३४ ॥

अनेन स्वर्गगमनसाधनमन्त्रजप उक्तः । तथा चापस्तम्बः—'अपरेणाग्निं प्राङ्मुख उपविश्य अथैनं याम्येन सूक्तेन नवर्चेन पराचानुशंसति । प्रकेतुनेति नारायणाभ्यामुपस्थानम् । ब्राह्मण एकहोतेति च' इति । स्वर्ग्यत्वं मन्त्रलिङ्गादेव स्पष्टं इति ॥

शास्त्रदृष्टेन विधिना जले गृध्राय राघवौ ।
स्नात्वा तु गृध्रराजाय उदकं चक्रतुस्तदा ॥ ३६ ॥

स गृध्रराजः कृतवान् यशस्करं
सुदुष्करं कर्म रणे निपातितः ।
महर्षिकल्पेन च संस्कृतस्तदा
जगाम पुण्यां गतिमात्मनः शुभाम् ॥ ३७ ॥

नन्वत्र रामेण जटायुषः संस्कारः कृत इति प्रतिपादितम् । तथा 'समुद्रं नेतुमिच्छामि भवद्भिर्वरुणालयम् । प्रदास्याम्युदकं भ्रातुस्स्वर्गतस्य महात्मनः ॥' इत्यग्रे संपातिनापि उदकदानं कृतमिति वक्ष्यते । तथा, 'संस्कृत्य वालिनं ते तु विधिपूर्वं प्लवङ्गमाः । आजग्मुरुदकं कर्तुं नदीं शिवजलां शुभाम् ॥' इत्यनेन वालिनोपि संस्कारो वक्ष्यते । इदं सर्वं नोपपद्यते । शास्त्रस्य मनुष्याधिकारत्वेन तिरश्चां कर्मण्यधिकाराभावात् इति चेत्; तत्र वक्तव्यम् — किं तिरश्चां ज्ञानाभावादनधिकारः, उत सामर्थ्या-

भावात्, अथवा ब्राह्मणत्वाद्यभावात्, आहोस्वित् शूद्रादीनामिव पर्युदासात् उत विधानाभावात् इति ॥

नाद्यः। धर्मानुष्ठानोपयोगिज्ञानरहितानां आहारनिद्राभयमैथुनादिज्ञानमात्रवतां साधारणतिरश्चां अनधिकारेपि ऐहिकामुष्मिकोपयोगिधर्माधर्मज्ञानवतां जटायुवालिप्रभृतीनां अधिकारे बाधकाभावात् ॥

तादृशज्ञानवत्वं च, 'विन्दो नाम मुहूर्तोऽयं' इत्यनेन, 'उवाच वत्स मां विद्धि वयस्यं पितुरात्मनः' इत्यनेन, 'पूर्वकाले महाबाहो ये प्रजापतयोऽभवन्। कर्दमः प्रथमस्तेषां विक्रीतस्तदनन्तरः ॥' इत्यारभ्य 'तस्माज्जातोऽहमरुणात्संपातिस्तु ममाग्रजः' इत्यन्तेन ग्रन्थेन, 'दशग्रीव स्थितो धर्मे पुराणे सत्यसंश्रवः। कथं राजा स्थितो धर्मे परदारान् परामृशेत्। रक्षणीया विशेषेण राजदारा महाबल ॥ निवर्तय मतिं नीचां परदाराभिमर्शनात्। न तत्समाचरेद्धीरो यत्परोऽस्य विगर्हयेत् ॥ यथात्मनस्तथाऽन्येषां दारा रक्ष्या विमर्शता। धर्ममर्थं च कामं च शिष्टाश्शास्त्रेष्वनागतम्। व्यवस्यन्त्यनु राजानं पौलस्त्यकुलनन्दन ॥ राजा धर्मश्च कामश्च धर्माणां चोत्तमो निधिः। धर्मश्शुभं वा पापं वा राजमूलात् प्रवर्तते ॥ पापस्वभावश्चपलः कथं त्वं रक्षसां वर। ऐश्वर्यमिह संप्राप्तो विमानमिव दुष्कृती ॥ कामं स्वभावो यो यस्य न शक्यः परिवर्जितुम्। न हि दुष्टात्मनामार्यमावसत्यालये चिरम् ॥ विषये वा पुरे वा ते यदा रामो महाबलः। नापराध्यति धर्मात्मा कथं तस्यापराध्यसि ॥ यदि शूर्पणखाहेतोर्जनस्थानगतः खरः। अतिवृत्तो हतः पूर्वं रामेणाक्लिष्टकर्मणा ॥ अत्र ब्रूहि यथातत्वं को रामस्य व्यतिक्रमः। यस्य त्वं लोकनाथस्य भार्यां हृत्वा गमिष्यसि ॥ स भारस्सौम्य भर्तव्यो यो नरं नावसादयेत् ॥ तदन्नमपि भोक्तव्यं जीर्यते यदनामयम् ॥ यत्कृत्वा न भवेद्धर्मो न कीर्तिर्वा यशो भुवि। शरीरस्य भवेत्खेदः कस्तत्कर्म समाचरेत्'

इति मुहूर्तं पितृसखत्वस्ववंशरावणधर्मोपदेशप्रतिपादनेन जटायुषो ज्ञानवत्त्वावगमात् । एवं वाल्यादीनामपि द्रष्टव्यम् ॥

न द्वितीयः । अन्धत्वबधिरत्वाद्यभावेन राज्यकरणेन युद्धादिकरणेन च कर्मसामर्थ्यस्याङ्गीकृतत्वात् । राज्यपरिपालनादिकं च, 'षष्टिर्वर्षसहस्राणि मम जातस्य रावण । पितृपैतामहं राज्यं यथावदनुतिष्ठतः ॥ वृद्धोऽहं त्वं युवा धन्वी सरथः कवची गदी । तथाप्यादाय वैदेहीं कुशली न गमिष्यसि ॥ न शक्तस्त्वं बलाद्धर्तुं वैदेहीं मम पश्यतः । हेतुभिर्न्यायसंयुक्तैः ध्रुवां वेदश्रुतीमिव ॥' इत्युक्त्वा 'तस्य तीक्ष्णनखाभ्यां तु चरणाभ्यां महाबलः । चकार बहुधा गात्रे व्रणान् पतगसत्तमः ॥ स राक्षसरथे पश्यन् जानकीं बाष्पलोचनाम् । अचिन्तयित्वा तान् बाणान्राक्षसं समभिद्रवत् ॥ ततोऽस्य सशरं चापं मुक्तामणिविभूषितम् । चरणाभ्यां महातेजा बभञ्ज पतगोत्तमः ॥ तच्चाग्निसदृशं दीप्तं रावणस्य शरावरम् । पक्षाभ्यां च महावीर्यो व्याधुनोत्पतगेश्वरः ॥ काञ्चनोरश्छदान् दिव्यान् पिशाचवदनान्खरान् । तांश्चास्य जवसंपन्नान् जघान समरे बली ॥ वरं त्रिवेणुसंपन्नं कामगं पावकार्चिषम् । मणिहेमविचित्राङ्गं बभञ्ज च महारथम् ॥ पूर्णचन्द्रप्रतीकाशं छत्रं च व्यजनैस्सह । पातयामास वेगेन ग्राहिभी राक्षसैस्सह ॥ सारथेश्चास्य वेगेन तुण्डेनैव महच्छिरः । निपपात भृशं पृष्ठे दशग्रीवस्य वीर्यवान् ॥ केशांश्चोत्पाटयामास नखपक्षमुखायुधः ।' इत्यादिवचनैः स्पष्टतरम् ॥

नापि विशिष्टमातृपितृजन्यत्वाभावेन ब्राह्मणत्वाद्यभावादनधिकार इति तृतीयः पक्षः संभवति । ब्रह्मणो मानसपुत्राणां दक्षादीनां कुंभसंभूतागस्त्यवसिष्ठादीनामिव वाल्यादीनामपि विशिष्टमातृपितृजन्यत्वाभावेपि महाप्रभावत्वात् ब्राह्मणत्वादेः कर्माधिकारस्य च उपपत्तेः । अत एव वालिनः सन्ध्यावन्दनं सूर्यसकाशाद्धनुमतो विद्याग्रहणादिकं चोपपन्नम् ॥

तत्र वालिनस्सन्ध्यावन्दनं उत्तररामायणे — [1] ‘अपाक्षिगण-संपातान्वानरेन्द्रो महाजवः । क्रमशस्सागरान् सर्वान् सन्ध्याकालमवन्दत ॥ सभाज्यमानो भूतैस्तु खेचरैः खेचरो हरिः । पश्चिमं सागरं वाली आजगाम सरावणः ॥ तत्र सन्ध्यामुपासित्वा स्नात्वा जप्त्वा च वानरः । उत्तरं सागरं प्रायाद्वहमानो दशाननम् ॥ बहुयोजनसाहस्रं तदध्वानं महाहरिः । वायुवच्च मनोवच्च जगाम सह शत्रुणा ॥ उत्तरे सागरे सन्ध्यामुपासित्वा दशाननम् । वहमानोऽगमद्वाली पूर्वमम्बुमहोदधिम् । तत्रापि सन्ध्यामन्वास्य वासविः स हरीश्वरः ॥’ इति ॥

हनूमतस्सूर्यसकाशात् विद्याप्राप्तिः उत्तररामायणे — [2] ‘मार्तण्ड-स्त्वब्रवीत्तत्र भगवांस्तिमिरापहा । तेजसोऽस्य मदीयस्य ददामि शतिकां कलाम् ॥ यदा च शास्त्राण्यध्येतुं शक्तिरस्य भविष्यति । तदास्य शास्त्रं दास्यामि येन वाग्मी भविष्यति ॥ न चास्य सदृशः कश्चिद्भविता शास्त्र-दर्शने । ससूत्रवृत्तार्थपदं महार्थं ससंग्रहं साधयति वै कपीन्द्रः । न ह्यस्य कश्चित् सदृशोऽस्ति शास्त्रे वैशारदे छन्दगतौ तथैव ॥’ इति । तथा ‘असौ पुरा व्याकरणं ग्रहीष्यन् सूर्योन्मुखः पृष्ठगतः कपीन्द्रः । उद्यद्गिरेरस्तगिरिं जगाम ग्रन्थं महद्धारयदप्रमेयः ॥ सर्वासु विद्यासु तपोविधाने प्रस्पर्धतेऽयं हि गुरुं सुराणाम् ॥’ इति ॥

किष्किन्धाकाण्डेऽपि सर्वविद्यावत्त्वं हनुमत उक्तम् — [3] ‘अभि-भाषस्व सौमित्रे सुग्रीवसचिवं कपिम् । वाक्यज्ञं मधुरैर्वाक्यैः स्नेहयुक्त-मरिन्दम ॥ नानृग्वेदविनीतस्य नायजुर्वेदधारिणः । नासामवेदविदुषः शक्यमेवं प्रभाषितुम् ॥ नूनं व्याकरणं कृत्स्नमनेन बहुधा श्रुतम् । बहु

1 उत्तरकाण्डे ३४ सर्गे २७ — ३१½ श्लोकाः ।

2. उत्तररामायणे ३६ सर्गे १५ १६, ४९, ४८, ४९½ श्लोकाः क्रमेण ।

3. किष्किन्धाकाण्डे ३ सर्गे २८—३०, ३२-३४ श्लोकाः ।

व्याहरतानेन न किञ्चिदपशब्दितम् ।। अविस्तरमसन्दिग्धं अविलम्बितमद्रुतम् । उरस्थं कण्ठगं वाक्यं वर्तते मध्यमे स्वरे ।। संस्कारक्रमसंपन्नामद्रुतामविलम्बिताम् । उच्चारयति कल्याणीं वाचं हृदयहर्षिणीम् ।। अनया चित्रया वाचा त्रिस्थानव्यंजनस्थया । कस्य नाराध्यते चित्तमुद्यतासेररेरपि ।।' इति ।।

नापि पर्युदासादनधिकार इति **चतुर्थः** पक्षः । 'न स्त्रीशूद्रौ वेदमधीयाताम्', 'तस्माच्छूद्रो यज्ञेऽनवक्लृप्तः' इत्यादिवचनैः शूद्रादिवत् तिरश्चां पर्युदासादर्शनात् ।।

नापि विधानाभावात् इति **पञ्चमः** । तिरश्चां विशिष्य विधानाभावेपि स्वर्गकामादिसामान्यविधिबलादेव अर्थित्वादिमतामधिकारसंभवात् । अत एव स्वर्गकामित्वाविशेषात् प्रसक्तं शूद्राणां वैदिककर्माधिकारं 'तस्माच्छूद्रो यज्ञेऽनवक्लृप्तः' इति प्रतिषेधती श्रुतिः अर्थवती भवति । अन्यथा अप्रसक्तप्रतिषेधप्रसङ्गात् ।।

अत एव चार्थित्वाद्यविशेषेण प्रसक्तमधिकारं शूद्राणां प्रतिषेधति भगवान् **बादरायणः** [1] 'श्रवणाध्ययनार्थप्रतिषेधात् स्मृतेश्च' इति । व्याख्यातं च **भगवत्पादैः** । अस्य **भाष्यम्** — 'इतश्च न शूद्रस्याधिकारो यदस्य स्मृतेः श्रवणाध्ययनार्थप्रतिषेधो भवति । वेदश्रवणप्रतिषेधो वेदाध्ययनप्रतिषेधः तदर्थज्ञानानुष्ठानयोः प्रतिषेधः शूद्रस्य स्मर्यते । श्रवणप्रतिषेधस्तावत् 'अथास्य वेदमुपश्रृण्वतः त्रपुजतुभ्यां श्रोत्रप्रतिपूरणम्' इति 'पद्यु हवा एतत् श्मशानं यच्छूद्रः तस्मात् शूद्रसमीपे नाध्येतव्यम्' इति च । अत एवाध्ययनप्रतिषेधः । यस्य हि समीपेपि नाध्येतव्यं भवति स कथं अश्रुतमधीयीत । भवति चोदाहरणे जिह्वाच्छेदः धारणे शरीरभेद इति । अत एव चार्थादर्थज्ञानानुष्ठानयोश्च प्रतिषेधो भवति 'न शूद्राय मतिं दद्यात्' इति । 'द्विजातीनामध्ययनं

---

1. प्रथमाध्याये तृतीयपादे ३८ सूत्रं ।

इज्या दानम्' इति च । येषां पुनः पूर्वकृतसंस्कारवशात् हि विदुरधर्मव्याधप्रभृतीनां ज्ञानोत्पत्तिः तेषां न शक्यते फलप्राप्तिः प्रतिषेद्धुम्, ज्ञानस्यैकान्तिकफलत्वात् । 'श्रावयेच्चतुरो वर्णान्' इति च इतिहासपुराणाधिगमे चातुर्वर्ण्यस्याधिकारस्मरणात् । वेदपूर्वकस्तु नास्त्यधिकारः शूद्राणामिति स्थितम्' इति ॥

एवं प्रतिषेधाभावात् अर्थित्वादिसद्भावाच्च वालिजटायुप्रभृतीनां सिद्धोऽधिकारः । अत एव स्वस्वशक्त्यनुरोधेन विद्योपदेशकर्मानुष्ठानतपश्चरणादिकं प्रतिपादितं श्रुतिपुराणादिषु ॥

छान्दोग्ये तावत् हंसैर्निशायां प्रासादे स्वपतो राज्ञो जानश्रुतेस्समीपमेत्य कर्मनिन्दापूर्वकं विद्याप्राशस्त्यप्रतिपादनेन विद्याग्रहणे प्रवृत्तिः कारितेति श्रूयते — [1] 'जानश्रुतिर्ह पौत्रायणः श्रद्धादेयो बहुदायी बहुपाक्य आस । स ह सर्वत आवसथान् मापयांचक्रे सर्वत एव मेऽत्स्यन्तीति । अथ ह हंसा निशायामतिपेतुस्तद्धैवं हंसो हंसमभ्युवाद हो हो हि भल्लाक्ष भल्लाक्ष जानश्रुतेः पौत्रायणस्य समं दिवा ज्योतिराततं तन्मा प्रसाङ्क्षीस्तत्त्वा मा प्रधाक्षीः इति । तं ह परः प्रत्युवाच कम्वर एनमेतत्सन्तं सयुग्वानमिव रैक्कमात्थेति यो नु कथं सयुग्वा रैक्क इति यथा कृतायविजितायाधरेयाः संयन्त्येवमेनं सर्वं तदभिसमेति यत्किञ्च प्रजाः साधु कुर्वन्ति यस्तद्वेद यत्स वेद स मयैतदुक्त इति' ॥

तथोपकोसलविद्यायां सत्यकामो जाबालो विद्यार्थं हारिद्रुमतं गौतममेत्य तेन चोपनीतः कृशानां गवां शतचतुष्टयं गृहीत्वा अरण्ये संरक्षणं कुर्विति गुरुणाऽऽज्ञप्तः तथैवाचरन् सहस्रसंपत्तौ ऋषभेणोपदिष्टां ब्रह्मविद्यां जग्राहेति श्रूयते । तथाहि — [2] 'सत्यकामो हि जाबालो जबालां मातरं

---

1. छान्दोग्ये ४ अध्याये प्रथमखण्डे १–४ वाक्यानि ।

2. छान्दोग्ये ४ अध्याये ४ खण्डे १, ३, ४, ५ वाक्यानि, ५ खण्डे १, २, वाक्ये च ।

आमन्त्रयाञ्चक्रे ब्रह्मचर्यं भवति विवत्स्यामि' इत्यारभ्य 'स ह हारिद्रुमतं गौतममेत्योवाच ब्रह्मचर्यं भगवति वत्स्यामि उपेयां भगवन्तमिति स होवाच किंगोत्रो नु सोम्यासि इति । स होवाच नाहमेतद्वेद भोः यद्गोत्रोऽहमस्मि अपृच्छं मातरं सा मा प्रत्यब्रवीत् बह्वहं चरन्ती परिचारिणी यौवने त्वामलभे सा अहमेतन्न वेद यद्गोत्रस्त्वमसि जबाला तु नामाहमस्मि सत्यकामो नाम त्वमसीति सोऽहं सत्यकामो जाबालोऽस्मि भो इति । तं होवाच नैतदब्राह्मणो विवक्तुमर्हति समिधं सोम्याहर उप त्वा नेष्ये न सत्यादगा इति तमुपनीय कृशानामबलानां चतुश्शतं गा निराकृत्योवाच इमास्सोम्यानुसंव्रज इति ता अभिप्रस्थापयन्नुवाच नासहस्रेणावर्तेय इति । स ह वर्षगणं प्रोवास ता यदा सहस्रं संपेदुः अथ हैनमृषभोऽभ्युवाद सत्यकाम३ इति भगव इति ह प्रतिशुश्राव प्राप्तास्सोम्य सहस्रं स्मः प्रापय न आचार्यकुलं ब्रह्मणश्च ते पादं ब्रवाणीति ब्रवीतु मे भगवानिति तस्मै होवाच' इत्यादिना ऋषभाग्निहंसमद्गूनां विद्योपदेष्टृत्वमुक्तम् ॥

तथा विष्णुपुराणे जडभरतो मृगजन्म प्राप्य तस्मिंस्तिर्यग्जन्मनि नियमाद्यनुष्ठानं प्रत्यवायपरिहाराय कृतवानित्युक्तं— 'जम्बूमार्गे महारण्ये जज्ञे जातिस्मरो मृगः । विहाय मातरं भूयः सालग्रामं समाययौ ॥ शीर्णैस्तृणैस्तथा पर्णैः स कुर्वन्नात्मपोषणम् । मृगत्वहेतुभूतस्य कर्मणो निष्कृतिं ययौ ॥' इति ॥

तथा आदिपर्वणि खाण्डवदाहे तिरश्चां तपश्चर्यादिधर्म उक्तः— [1]'शार्ङ्गिकां शार्ङ्गिको भूत्वा जरितां समुपेयिवान् । तस्यां पुत्रानजनयच्चतुरो ब्रह्मवादिनः ॥ जरितारौ कुलं ह्येतज्ज्येष्ठत्वेन प्रतिष्ठितम् । सारिसृक्कः प्रजायेत पितॄणां कुलवर्धनः ॥ स्तम्बमित्रस्तपः कुर्याद्द्रोणो ब्रह्मविदां वरः ।'

---

1. २२९ अध्याये १६, १७ श्लोकयोः उत्तरपूर्वार्धे, २३० अध्याये ९ श्लोकः १० श्लोकस्य पूर्वार्धं च ।

तत्रैवाग्निवचनम् — [1]'ऋषिर्द्रोणस्त्वमसि वै ब्रह्मैतद्व्याहृतं त्वया ॥' पुत्रान् प्रति मन्दपालवचनम् — [2]'ऋषीन्वेद हुताशोपि ब्रह्म तद्विदितं च वः ।' इति ॥

तथा पक्षिणाप्यातिथ्यं कृतं; तेन च स्वर्गोपि प्राप्त इति प्रतिपादितं भारते लुब्धककपोतीये । लुब्धकेन गृहीता पञ्जरस्था कपोती भर्त्रे धर्ममुपदिशति — [3]'हन्त वक्ष्यामि ते श्रेयः श्रुत्वा तु कुरु तत्तथा । शरणागतसन्त्राता भव कान्त विशेषतः ॥ एष शाकुनिकः शेते तव वासं समाश्रितः । शीतार्तश्च क्षुधार्तश्च तस्मै पूजां समाचर ॥ यो हि कश्चिद्द्विजं हन्याद्गां च लोकस्य मातरम् । शरणागतं च यो हन्यात्तुल्यं तेषां च पातकम् ॥ अस्माकं विहिता वृत्तिः कापोती जातिधर्मतः । सा न्याय्याऽऽत्मवता नित्यं त्वद्विधेनानुवर्तितुम् ॥ यस्तु धर्मं यथाशक्ति गृहस्थो ह्यनुवर्तते । स प्रेत्य लभते लोकानक्षयानिति शुश्रुमः ॥ स त्वं सन्तानवानद्य पुत्रवानसि च द्विज । तत्स्वदेहे दयां त्यक्त्वा धर्मार्थौ परिगृह्य च ॥ पूजामस्मै प्रयुंक्ष्व त्वं प्रीयेतास्य मनो यथा । शरीरे मा च सन्तापं कुर्वीथास्त्वं विहङ्गम ॥ शरीरयात्रावृत्त्यर्थं अन्यान् दारानुपास्यसि । इति सा शकुनी वाक्यं पञ्जरस्था तपस्विनी ॥ अतिदुःखान्विता प्रोक्त्वा भर्तारं पुनरैक्षत । स पत्न्या वचनं श्रुत्वा धर्मयुक्तिसमन्वितम् ॥ हर्षेण महता युक्तो बाष्पव्याकुललोचनः । तं वै शाकुनिकं दृष्ट्वा विधिदृष्टेन कर्मणा ॥ स पक्षी पूजयामास यत्नात्तं पक्षिजीविनम् । उवाच स्वागतं तेऽद्य ब्रूहि किं करवाणि ते ॥ सन्तापश्च न

---

1. २३२ अध्याये २१ श्लोकस्य पूर्वार्धं ।
2. २३४ अध्याये ३ श्लोकस्य उत्तरार्धम् ।
3. शान्तिपर्वणि १४५ अध्याये ६ श्लोकमारभ्य १४६ अध्याये २४ श्लोकान्तो भागः, १४७ अध्याये ९ श्लोकमारभ्य १४८ अध्याये प्रथमश्लोकान्तो भागः, १४८ अध्याये १० श्लोकमारभ्य अध्यायान्तो भागश्च । (आहत्य ७+२४+२½+१+३½ = ३८ श्लोकाः)

कर्तव्यः स्वगृहे वर्तते भवान् । तद्ब्रवीतु भवान् क्षिप्रं किं करोमि किमिच्छसि ॥ प्रणयेन ब्रवीमि त्वा त्वं हि नरशरणागतः । अरावप्युचितं कार्यं आतिथ्यं गृहमागते ॥ छेत्तुमप्यागते छायां नोपसंहरते द्रुमः । शरणागतस्य कर्तव्यमातिथ्यमिह यत्नतः ॥ पञ्चयज्ञप्रवृत्तेन गृहस्थेन विशेषतः । पञ्च यज्ञांस्तु यो मोहान्न करोति गृहाश्रमे ॥ तस्य नायं न च परो लोको भवति धर्मतः । तद्ब्रूहि मां सुविश्रब्धो यत्त्वं वाचा वदिष्यसि ॥ तत्करिष्याम्यहं सर्वं मा त्वं शोके मनः कृथाः । तस्य तद्वचनं श्रुत्वा लुब्धको वाक्यमब्रवीत् ॥ बाधते खलु मे शीतं संत्राणं हि विधीयताम् । एवमुक्तस्ततः पक्षी पर्णान्यास्तीर्य भूतले ॥ यथाशक्त्या हि पर्णेन ज्वलनार्थं द्रुतं ययौ । स गत्वाङ्गारकर्मागं(न्तं) गृहीत्वाग्निमथागमत् ॥ ततः शुष्केषु पर्णेषु पावकं सोऽप्यदीपयत् । स संदीप्तं महत्कृत्वा तमाह शरणागतम् ॥ प्रतापय सुविश्रब्धः स्वगात्राण्यकुतोभयः । स तथोक्तस्तथेत्युक्त्वा लुब्धो गात्राण्यतापयत् ॥ अभिप्रत्यागतप्राणस्ततः प्राह विहङ्गमम् । हर्षेण महता-ऽऽविष्टो वाक्यं व्याकुललोचनः ॥ दत्तमाहारमिच्छामि त्वया क्षुद्बाधते हि माम् ।

स तद्वचः प्रतिश्रुत्य वाक्यमाह विहङ्गमः ॥ न मेऽस्ति विभवो येन नाशयेयं क्षुधं तव । उत्पन्नेनैव जीवामो वयं नित्यं वनौकसः ॥ संचयो नास्ति चास्माकं मुनीनामिव भोजने । इत्युक्त्वा स तदा तत्र विवर्ण-वदनोऽभवत् ॥ कथं नु खलु कर्तव्यमिति चिन्तापरस्तदा । बभूव भरतश्रेष्ठ गर्हयन्वृत्तिमात्मनः ॥ मुहूर्ताल्लब्धसंज्ञस्तु स पक्षी पक्षिघातिनम् । उवाच तर्पयिष्ये त्वां मुहूर्तं प्रतिपालय ॥ इत्युक्त्वा शुष्कपर्णैस्तु समुज्वाल्य हुताशनम् । हर्षेण महता युक्तस्स पक्षी वाक्यमब्रवीत् ॥ ऋषीणां दैवतानाञ्च पितॄणां च महात्मनाम् । श्रुतः पूर्वो मया धर्मो महानतिथि-पूजने ॥ कुरुष्वानुग्रहं सौम्य सत्यमेतद्ब्रवीमि ते । निश्चिता खलु मे बुद्धि-रतिथिप्रतिपूजने ॥ ततः कृतप्रतिज्ञो वै स पक्षी प्रहसन्निव । तमग्निं त्रिः

परिक्रम्य प्रविवेश महामतिः ॥ अग्निमध्यं प्रविष्टं तु लुब्धो दृष्ट्वा स पक्षिणम् । चिन्तयामास मनसा किमिदं वै मया कृतम् ॥ दृष्टो धर्मो हि धर्मिष्ठे यादृशो विहगोत्तमे । एवमुक्त्वा विनिश्चित्य रौद्रकर्मा स लुब्धकः ॥ महाप्रस्थानमाश्रित्य प्रययौ शंसितव्रतः । ततो यष्टिं शलाकां च क्षारकं पञ्जरं तथा ॥ तां च बद्धां कपोतीं स प्रमुच्य विससर्ज ह । ततो गते शाकुनिके कपोती प्राह दुःखिता ॥ संस्मृत्य सा च भर्तारं रुदती शोककर्शिता । पतिव्रता संप्रदीप्तं प्रविवेश हुताशनम् ॥ ततश्चित्राङ्गदधरं भर्तारं साध्यपश्यत । विमानस्थं सुकृतिभिः पूज्यमानं महात्मभिः ॥ चित्रमाल्याम्बरधरं सर्वाभरणभूषितम् । विमानशतकोटीभिरावृतं पुण्यकर्मभिः ॥ ततः स्वर्गगतः पक्षी विमानवरमास्थितः । कर्मणा पूजितस्तत्र रेमे स सह भार्यया ’ इति ॥

एवं चार्थित्वादिगुणसत्वात् जटायुवाल्यादीनामधिकारस्सिद्धः । न चैवं तिर्यगधिकरणविरोधः । तथाहि —[1] ‘फलार्थित्वात्तु कर्मणः शास्त्रं सर्वाधिकारं स्यात् । सिद्धेऽधिकारे स किमनुष्ठानसमर्थानां मनुष्याणामेवेति संशयः । तत्र यदि यथाधिकारं अङ्गविनियोगः ततः सर्वेषां, अथ यथाविनियोगमधिकारः ततः समग्रानुष्ठानमेव । तत्र प्रधानवाक्येन सर्वेषामधिकारधीः जायते, तद्वशेनाङ्गवाक्यानामुपवर्णनम् । ‘दर्शपूर्णमासाभ्यां स्वर्गकामो यजेत’ इति हि प्रधानवाक्येन सर्वस्वर्गकामाधिकारं कर्मावगतं; तदनुसारीणि चाङ्गवाक्यानि न तत्सङ्कोचायालम् । अतश्चक्षुष्मन्तं प्रत्याज्यावेक्षणविधिः । अचक्षुष्मतस्तु तद्विध्यभावात् तद्रहितमेव फलसाधनम् । एवं बधिरस्य वाचनरहितं, मूकस्य मन्त्रोच्चारणरहितं पङ्गोश्च विप्लुतिक्रमणरहितमिति सर्वेषामर्थिनां अशक्याङ्गरहितकर्मानुष्ठानात् सिद्धोऽधिकारः ॥

---

1. शास्त्रदीपिकायां षष्ठेऽध्याये प्रथमपादे द्वितीयमधिकरणं समग्रं ।

स्यादेवमर्थिनां । तिरश्चां तु साम्परायिकफलकामनाभावात् कथमधिकारशङ्का । तेषामपि चतुर्दश्युपवासादिदर्शनादस्त्येत्र दृष्टार्थितेति मन्यते । अत्रोच्यते—'नैवाज्यावेक्षणादीनां पुरुषं प्रति चोदना । यतोऽसमर्थस्तच्छून्यं कर्म कृत्वाधिकारभाक् ॥' पुरुषं प्रति हि विधीयमानमसमर्थं प्रत्यविहितत्वात् अनङ्गमेवेति तद्रहितं कर्म अविगुणं समग्रं कर्मफलं साधयेत् ॥

'क्रतुं प्रति विधिस्तेषां तादृशं तं च शक्नुवन् । कृत्वा फलमवाप्नोति ततोऽन्यस्यानधिक्रिया ॥' न हि स्वातन्त्र्येणाङ्गवाक्यानि पुरुषैस्संबध्यन्ते; प्रधानवाक्यशेषत्वात् तेषाम् । तद्युक्तेन तु प्रधानवाक्येन तदङ्गयुक्तः क्रतुः पुरुषैः संबध्यमानोऽसमर्थानपहाय समर्थान् प्रति विज्ञायते । अतोऽन्धस्य क्रतुरेवाविहितः; न त्वाज्यावेक्षणमेवाविहितमितरच्च विहितमिति मन्तव्यम् । न च प्रधानवाक्यविरोधात् सर्वाधिकारनिश्चयः । विशेषाभावाद्धि सर्वाधिकारः स्यात् । अस्ति चात्र विशेषोऽङ्गोपसंहारसामर्थ्यम् । अतः समर्थानामेवाधिकारः ॥

यत्र तु प्रधानवाक्यविरोधो यावज्जीवादौ, तत्र भवत्येव यथाशक्ति प्रयोगादपि फलमिति वक्ष्यते । तदविरोधे तु सर्वाङ्गयुक्तकर्मानुष्ठानादेव फलम् । तिरश्चां तु प्रधानमात्रेऽप्यसामर्थ्यात् न कश्चिदधिकारः । ऋषीणाञ्च अनादौ संसारे पूर्वपूर्वभृग्वादिवरणसंभवादस्त्येवाधिकार इति ऋष्युदाहरणमेवादर्तव्यम् । देवतानां च आत्मोद्देशेन त्यागासंभवात् विग्रहाभावाच्चाशक्तेरनधिकार इति ॥

एवञ्च तिरश्चामनधिकारप्रतिपादनात् कथं तिर्यग्भूतानां जटाय्वादीनामधिकार इति चेन्न । तिर्यगधिकरणस्य हि असमर्था अनधिकारिणः समर्थाश्चाधिकारिण इत्यत्रैव तात्पर्यम् । न तु तिर्यक्त्वाद्देवत्वाद्वा अनधिकार इति । अत एव सिद्धान्ते प्रधानयागे तिरश्चां सामर्थ्याभावादन्धादीनां

च आज्यावेक्षणाद्यङ्गोपसंहारे सामर्थ्याभावात्, देवानाञ्च देवतान्तरोद्देशेन द्रव्यत्यागासामर्थ्यादिति अनधिकारे सामर्थ्याभाव एव हेतुत्वेनोपन्यस्तः। अत एव ऋष्यन्तरवरणसंभवात् सामर्थ्यसत्वादधिकार इत्यप्युक्तम्। एवञ्च असमर्थानां मनुष्याणामनधिकारेऽपि समर्थानां मनुष्याणां यथाधिकारस्तथा असमर्थानांतिरश्चां अनधिकारेऽपि समर्थानां तिरश्चामधिकारे विरोधाभावात्। एवञ्च श्येनकपोतीयाद्याख्यायिकानां प्रामाण्यं साधितं भवति॥

इतिहासपुराणादीनां च स्वार्थे प्रामाण्यमुक्तं **देवताधिकरणे** भगवत्पादैः — 'इतिहासपुराणमपि व्याख्यातमार्गेण संभवन्मन्त्रार्थवादमूलत्वात् भवति देवताविग्रहादि प्रपञ्चयितुम्' इति। **बृहदारण्यकभाष्येऽपि** — 'आचारविध्युपदेशनार्थश्च। एवमाचारवतोः वक्तृश्रोत्रोराख्यायिकानुगतोऽर्थोऽवगम्यते। केवलतर्कनिषेधार्था च आख्यायिका 'नैषा तर्केण मतिरापनेया' 'न शास्त्रदग्धाय मतिं दद्यात्' इति श्रुतिस्मृतिभ्याम्। श्रद्धैव ब्रह्मविज्ञाने परमं साधनमित्याख्यायिकार्थ इति। तस्माज्जटायुवाल्यादीनां संस्कार उपपन्न एवेति॥

इति अष्टषष्टितमः सर्गः॥

अथ एकोनसप्ततितमः सर्गः॥

एकोनसप्ततितमे— अथ सीतां विचेतुं दक्षिणां दिशं काकुत्स्थे प्रस्थिते राक्षसी काचिदयोमुखी नाम रामाग्रतो गच्छन्तं लक्ष्मणमवलम्ब्य 'एहि रंस्यावहे' इति भाषमाणा तदीयखड्गधारया शूर्पणखेव दुर्दशामवाप। ततः क्रौञ्चारण्यसरण्या प्रस्थितं काकुत्स्थं निमित्ताभिज्ञो लक्ष्मणः प्राञ्जलिरेवमवादीत् —

स्पन्दते मे दृढं बाहुरुद्विग्नमिव मे मनः।
प्रायशश्चाप्यनिष्टानि निमित्तान्युपलक्षये॥ २१॥

तस्मात् सज्जीभवार्य त्वं कुरुष्व वचनं हितम् ।
ममैव हि निमित्तानि सद्यश्शंसन्ति संभ्रमम् ॥ २२ ॥

एष वञ्जुलको नाम पक्षी परमदारुणः ।
आवयोर्विजयं युद्धे शंसन्निव विनर्दति ॥ २३ ॥

ततः स्थूलशिरसो महर्षेः शापात् कौणपतामापन्नेन शिरःकण्ठविहीनेनोदरवदनेन कबन्धनाम्ना दनुजेन पन्नगपतिभोगभीषणाभ्यां योजनायताभ्यां भुजाभ्यां दृढमावध्य आकृष्यमाणयोः काकुत्स्थयोः धैर्येण प्राप्तकालमपि दुःखं अविगणयति राघवे बालभावतया तद्दुःखमसहमानेन विषण्णवदनेन लक्ष्मणेन 'रक्षोवशमापन्नं अशक्यमोक्षं मां भूतबलिमुत्सृज्य सत्वरमपसृत्य वैदेहीमितस्ततो विचिन्वन् अधिगम्य च तां, कुलपरम्पराप्राप्तं प्राज्यं राज्यं प्रतिलभ्य मामेवंगतं स्मर्तुमर्हसि' इति सकरुणमुदाहृतं वचनजातमाकर्ण्य द्विगुणीकृतशोकवेगो राघवस्सौमित्रिमेवमवादीत् —

त्वां च मां च नरव्याघ्र व्यसनैः पश्य मोहितौ ॥ ४७ ॥

नातिभारोऽस्ति दैवस्य सर्वभूतेषु लक्ष्मण ।
शूराश्च बलवन्तश्च कृतास्त्राश्च रणाजिरे ।
कालाभिपन्नास्सीदन्ति यथा वालुकसेतवः ॥ ४८ ॥ इति ॥

इति एकोनसप्ततितमः सर्गः ॥

अथ सप्ततितमः सर्गः ॥

सप्ततितमे— अथ निजभुजयुगपरिक्षिप्तौ तावालोक्य 'क्षुधा कर्शितस्य मम भक्षणाय दैवेनोपनीतौ युवां' इति वदति कबन्धे लक्ष्मणो राममवलोक्य बाहुपाशनिश्चेष्टावावां भीषणोऽयमभिहन्तुमिच्छति ॥

तस्मादसिभ्यामस्याशु बाहू छिन्दावहै गुरू ॥ ५ ॥
निश्चेष्टानां वधो राजन् कुत्सितो जगतीपते ।
क्रतुमध्योपनीतानां पशूनामिव राघव ॥ ६ ॥

इत्यवादीत् । अनेन युद्धेन विना क्षत्रियवृत्तिस्थानां वधः कुत्सित इत्युक्तम् । तथा च **राजधर्मे**—[1]'अधर्मः क्षत्रियस्यैव यच्छय्यामरणं भवेत् । विसृजन् श्लेष्मपित्तानि कृपणं परिदेवयन् ॥ अविक्षतेन देहेन प्रलयं योऽधिगच्छति । क्षत्रियो नास्य तत्कर्म प्रशंसन्ति पुराविदः ॥ न गृहे मरणं तात क्षत्रियाणां प्रशस्यते । शौण्डीराणामशौण्डीर्यं अधर्मं कृपणं च तत् ॥ इदं दुःखं महाकष्टं पापीय इति निष्टनन् । प्रतिध्वस्तमुखः पूतिरमात्यानन्वशोचतः (यन्) ॥ अरोगाणां स्पृहयते स्वर्गं मृत्युमपीच्छति । वीरो दृप्तोऽभिमानी च नेदृशं मृत्युमर्हति ॥ रणेषु कदनं कृत्वा शत्रुभिः परिवारितः । तीक्ष्णैः शस्त्रैः सुविक्षिप्तैः क्षत्रियो मृत्युमर्हति ॥ शूरो हि काममन्युभ्यां आविष्टो युध्यते भृशम् । हन्यमानानि गात्राणि परैर्नैवावबुध्यते ॥ स संख्ये निधनं प्राप्य शक्रस्यैति सलोकताम् ।' इति । **स्थलान्तरेऽपि**—[2]'विक्रमेण महीं लब्ध्वा प्रजा धर्मेण पालयेत् । आहवे निधनं कुर्याद्राजधर्मपरायणः ॥' इति ।

ततो विदार्य वदनं भक्षितुमागच्छन् राक्षसः रामलक्ष्मणाभ्यां खण्डितेन भुजयुगलेन सह भूमौ निपतन् आर्तस्वरेण निखिलमपि तदरण्यं विनादितवान् । तदनु कबन्धेन आदरादभ्यर्थितः सौमित्रिः दण्डकावनागमनं अखिलेनाभिधाय 'किन्निमित्तमिदमतिघोरतरं रूपमवलम्ब्य गहने कानने सञ्चरसि' इत्यपृच्छत् । ततो राक्षसः स्मृतिमभिनीय सविस्तरमुवाच ॥

इति सप्ततितमः सर्गः ॥

---

1. ९७ अध्याये २३-३० श्लोकाः ।
2. ९२ अध्याये २२ श्लोकः ।

अथ एकसप्ततितमः सर्गः ॥

एकसप्ततितमे — पुरा खलु दिवाकरनिशाकरतिरस्कारकारिरूपवता मया सकललोकवित्रासनं आसुरं वपुरवलम्ब्य वित्रासितेषु तापसेषु महर्षिणा स्थूलशिरसा एतदेव ते नृशंसं रूपमस्त्विति अभिधाय मत्प्रार्थनया रामशरनिकृत्तभुजः त्वं निजरूपमवाप्स्यसीति कथितं शापविमोक्षकालं मनसि विचिन्त्य, तीव्रतरतपःप्रत्याहितपितामहवरलब्धाशस्त्रवध्यभावदर्पितेन मया रणे विक्रम्य, प्रधर्षितः शक्रः कुलिशेन सक्थिनी शिरश्च शरीरे संप्रवेश्य विरिञ्चिवचनपरिपालनपरो दीर्घकालजीवनाय सकलवनचराकर्षणपटु योजनायतं भुजद्वयं उदरदरीविनिहितं वदनं च परिकल्प्य मुनिसमुदीरितं शापान्तमभिहितवान् ॥

सोऽहमेतावन्तमनेहसं घोरतरशापविमोचको रामोपि कदाचिद्ग्रहणमेष्यतीति बुद्ध्या भुजगभोगभीषणाभ्यां भुजाभ्यां निखिलसत्वाकर्षणं कुर्वन् सफलपरिश्रमोऽस्मि । तदधुना भवद्दत्ताग्निना संस्कृतो भवतोर्बुद्धिसाचिव्यं कुर्वन् कलत्रान्वेषणविचक्षणं मित्रमप्युपदेक्ष्यामि ।

अदग्धस्य हि विज्ञातुं शक्तिरस्ति न मे प्रभो ।
राक्षसं तं महावीर्यं सीता येन हृता तव ॥ २८ ॥

विज्ञानं हि मम भ्रष्टं शापदोषेण राघव ।
स्वकृतेन मया प्राप्तं रूपं लोकविगर्हितम् ॥ २९ ॥

किन्तु यावन्न यात्यस्तं सविता श्रान्तवाहनः ।
तावन्मामवटे क्षिप्त्वा दह राम यथाविधि ॥ ३० ॥

दग्धस्त्वयाहमवटे न्यायेन रघुनन्दन ।
वक्ष्यामि तमहं वीर यस्तं ज्ञास्यसि राक्षसम् ॥ ३१ ॥

तेन सख्यं च कर्तव्यं न्यायवृत्तेन राघव ।

कल्पयिष्यसि ते वीर साहाय्यं लघुविक्रमः । ३२ ॥
न हि तस्यास्त्य विज्ञातं त्रिषु लोकेषु राघव ।
सर्वान् परिसृतो लोकान् पुरासौ कारणान्तरे ॥ ३३ ॥

इति एकसप्ततितमः सर्गः ॥

अथ द्विसप्ततितमत्रिसप्ततितमौ सर्गौ ॥

द्विसप्ततितमत्रिसप्ततितमयोः— तदनु सौमित्रिरचितायां चितायां सर्वतः प्रदीप्तपावकायां दह्यमाने कलेवरे तां चितां विधूय विधूमोऽग्निरिव विरजोम्बरधरो दिव्यपुरुषस्समुत्पत्य भास्वरेण शरीरेण दश दिशो विशदयन् आकाशगे विमाने तिष्ठन् हृष्टचेताः कबन्धः सविनयमेवमवादीत्—

शृणु राघव तत्त्वेन (य) तथा सीतामवाप्स्यसि ॥ ७ ॥
राम षड्युक्तयो लोके याभिस्सर्वं विमृश्यते । ८ ॥

अत्र षड्युक्तयः सन्धिविग्रहयानासनद्वैधीभावसमाश्रयाख्याः षड्गुणा उच्यन्ते । एतेषां राज्ञो नित्यचिन्तनीयत्वं विनियोगप्रकारश्च **मानवे**— [1]'सन्धिं च विग्रहं चैव यानमासनमेव च । द्वैधीभावं संश्रयं च षड्गुणांश्चिन्तयेत्सदा ॥ आसनं चैव यानं च सन्धाय च विगृह्य च । कार्यं वीक्ष्य प्रयुंजीत द्वैधं संश्रयमेव च ॥' इति ॥

तत्र सन्धिष्षोडशविधः — कपालोपहारसन्तानसंह(ग)तोपन्यासप्रतीकारसंयोगपुरुषान्तरादृष्टनरादिष्टात्मादिष्टोपग्रहपरिक्रियोच्छिन्नपर(भू)दूषणस्कन्धोपनेयभेदात् । तत्र समबलयोः परस्परं सन्धिः कपालसन्धिः । द्रव्यप्रदानेन क्रियमाण उपहारः । कन्याप्रदानेन कृतः सन्तानः । सद्भि-

1. ७ अध्याये १६०, १६१ श्लोकौ ।

मैत्रीपूर्वकं कारितस्संह(ग)तः । अयमेव संह(ग)तः यावदायुःक्रियमाण उत्कृष्टत्वात् काञ्चन इति उच्यते । अन्ये तु संपत्तिविपत्त्योर्हेतुभिः यो न भिद्यते स काञ्चन इत्याचक्षते । तेषां मते सप्तदश सन्धयो द्रष्टव्याः ॥

भाविनीमेकार्थसिद्धिमुद्दिश्य क्रियमाण उपन्यासः । मया कृतस्य करिष्यमाणस्य वा उपकारस्य अयं प्रत्युपकरिष्यतीति क्रियमाणः प्रतीकारः । एकार्थसाधनाय यात्रायां क्रियमाणः संयोगः । योधैरेकमर्थं साधयितुं क्रियमाणः पुरुषान्तरः । मदीयोऽयमर्थस्त्वया साधनीय इत्येतदर्थतया क्रियमाणोऽदृष्टनरः । भूम्येकदेशेन क्रियमाण आदिष्टः । सैन्यप्रदानेन क्रियमाण आत्मामिषः (दिष्टः) । सर्वस्वमपि प्रदायात्मसंरक्षणाय क्रियमाण उपग्रहः । कृत्स्नं कोशमेकदेशं वा प्रदाय क्रियमाणः परिक्रयः । सारवद्भूमिदानेन क्रियमाण उच्छिन्नः । उत्कृष्टभूमिफलं प्रदाय क्रियमाणः परदूषणः । प्राप्तफलं विभज्य सेनापतिभिर्ग्राह्य इति क्रियमाणो यः स स्कन्धोपनेयः ॥

तथा **कामन्दके**—[1] 'कपाल उपहारश्च सन्तानस्संहतस्तथा । उपन्यासः प्रतीकारः संयामः (संयोगः) पुरुषान्तरः ॥ अदृष्टनर आदिष्ट आत्माभिष उपग्रह । परिक्रयस्तथोच्छिन्नस्तथा च परदूषणः ॥ स्कन्धोपनेयस्सन्धिश्च षोडशः परिकीर्तितः । इति षोडशकं प्राहुः सन्धिं सन्धिविचक्षणाः ॥ कपालसन्धिर्विज्ञेयः केवलं समसन्धितः । संप्रदानाद्भवति य उपहारः स उच्यते ॥ सन्तानसन्धिर्विज्ञेयो दारिकादानपूर्वकः । सद्भिस्संहतसन्धिस्तु मैत्रीपूर्व उदाहृतः ॥ यावदायुःप्रमाणं तु समानार्थप्रयोजकः । संहतस्सन्धिरेवेह प्रहृष्टत्वात् सुवर्णवत् ॥ संपत्तौ च विपत्तौ च कारणैर्यो न भिद्यते । सोऽपरैः सन्धिकुशलैः काञ्चनः परिकीर्तितः ॥ भव्यामेकार्थसिद्धिन्तु समुद्दिश्य क्रियेत यः । स उपन्यासकुशलैरुपन्यास उदाहृतः ॥ मयास्योप-

---

1. सन्धिविकल्पनामके दशमसर्गे २—१९ श्लोकाः ।

कृतं पूर्वं ममाप्येष करिष्यति । इति यः क्रियते सन्धिः प्रतीकारस्स उच्यते ॥ उपकारं करोम्यस्य ममाप्येष करिष्यति । अयं चापि प्रतीकारो रामसुग्रीवयोरिव ॥ एकार्थं सम्यगुद्दिश्य यात्रां यत्र हि गच्छति[तः]। स संहितप्रमाणस्तु सन्धिस्संयोग उच्यते ॥ आवयोर्योधमुख्याभ्यां अर्थोऽयं साध्यतामिति । यस्मिन्पणः प्रक्रियते स सन्धिः पुरुषान्तरः ॥ त्वयैकेन मदीयार्थः संप्रसाध्यस्त्वसाविति । यत्र शत्रुः पणं कुर्यात् सोऽदृष्टपुरुषः स्मृतः ॥ यत्र भूम्येकदेशेन पणेन रिपुरूर्जितः । सन्धीयते सन्धिविद्भिरादिष्टस्स उदाहृतः । स्वसैन्येन तु सन्धानं आत्मामिष इति स्मृतः । क्रियते प्राणरक्षार्थं सर्वदानमुपग्रहः ॥ कोशांशेनाथ कुप्येन सर्वकोशेन वा पुनः । शेषप्रकृतिरक्षार्थं परिक्रय उदाहृतः ॥ भुवां सारवतीनां तु दानादुच्छिन्न उच्यते । सर्वभूम्युच्छ्रितफलदानेन परदूषणः ॥ परिच्छिन्नं फलं यत्र स्कन्धस्कन्धेन दीयते । स्कन्धोपनेयं तं प्राहुः सन्धिं सन्धिविदो जनाः ॥' इति ॥

अन्ये तु परस्परोपकारमैत्रसंवन्धजोपहारभेदेन चातुर्विध्यमाहुः । **एतदप्युत्तरकामन्दके** – [1] 'परस्परोपहारश्च मैत्रस्संबन्धजस्तथा । उपहारश्च विज्ञेयाश्चत्वारोऽमी सुसन्धयः ॥' इति । इतरे तु मैत्रातिरिक्तं उपसंहारत्वेनैकीकृत्य उपहारमैत्रभेदेन द्वैविध्यमामनन्ति । तत्रापि **कामन्दके**– [2] 'एक एवोपहारस्तु सन्धिरेतन्मतं हि नः । उपहारस्य भेदास्तु सर्वेऽन्ये मैत्रवर्जिताः ॥' इति । अपरस्तु मैत्रमपि उपहारेऽन्तर्भाव्य एकमेवोपहारसन्धिमाह । इदमप्युक्तं **कामन्दके** — [3] 'अभियोक्ता बलीयस्त्वादलब्ध्वा न निवर्तते । उपहारादृते तस्मात् सन्धिरन्यो न विद्यते ॥' इति ॥

अयञ्च सन्धिः बालवृद्धदीर्घरोगज्ञातिबहिष्कृतभीरुकभीरुकजनलुब्धलुब्धजन विरक्त विषयातिसक्तानेकचित्तमन्त्रदेवब्राह्मणनिन्दक दैवोपहतक दैव-

---

1. दशमसर्गे २० श्लोकः । 2. १० सर्गे २१ श्लोकः ।
3. १० सर्गे २२ श्लोकः ।

चिन्तकदुर्भिक्षव्यसनोपेतबलव्यसनसङ्कुलअदेशस्थबहुरिपुअकालयुद्धप्रवृत्तसत्य धर्मव्यपेतैः न कर्तव्यः, तेषां सुखोच्छेद्यत्वात् ॥

बालोऽप्रभुत्वात् सुखोच्छेद्यः । वृद्धदीर्घरोगिणावुत्साहशक्त्यभावात् । ज्ञातिबहिष्कृतः स्वैरेव पराभूतत्वात् । भीरुर्युद्धपरित्यागात् । भीरुपरिजनोऽसहायात् । लुब्धोऽदानात् । लुब्धानुजीवी अनुजीविनां लोभात् । विरक्तप्रकृतिः प्रकृतिभिः परित्यागात् । विषयातिसक्तो विचाराभावात् । अनेकचित्तमन्त्रो मन्त्रिभिरुपेक्षणात् । देवब्राह्मणनिन्दकोऽधर्मप्राबल्यात् । दैवोपहतको दैवानुकूल्याभावात् । दैवचिन्तकोऽनारम्भात् । दुर्भिक्षव्यसन अन्नाभावात् । बलव्यसनयुक्तो बलैर्विरोधात् । अदेशस्थः प्राकारादियुद्धयोग्यदेशाभावात् । बद्धमित्रो [बहुमित्रो] भयाधिक्यात् । अकालयुक्तसैन्यः अकाले युद्धारंभात् । सत्यधर्मव्यपेतोऽसाधुत्वादिति ॥

तथा च कामन्दके—[1] 'बालो वृद्धो दीर्घरोगस्तथा ज्ञातिबहिष्कृतः । भीरुको भीरुकजनो लुब्धो लुब्धजनस्तथा ॥ विरक्तप्रकृतिश्चैव विषयेष्वतिसक्तिमान् । अनेकचित्तमन्त्रश्च देवब्राह्मणनिन्दकः ॥ दैवोपहतकश्चैव दैवचिन्तक एव च । दुर्भिक्षव्यसनोपेतो बलव्यसनसंकुलः ॥ अदेशस्थो बहुरिपुर्युक्तः कालेन यश्च सः । सत्यधर्मव्यपेतश्च विंशतिः पुरुषा अमी ॥ एतैस्सन्धिं न कुर्वीत विगृह्णीयात्तु केवलम् । एते विगृह्यमाणा हि क्षिप्रं यान्ति रिपोर्वशम् ॥ बालस्य ह्यप्रभावत्वात् न लोको योद्धुमिच्छति । योद्धुं स्वयमशक्तस्स[श्च] परार्थे को हि युध्यते ॥ उत्साहशक्तिहीनत्वात् वृद्धो दीर्घामयस्तथा । स्वैरेव परिभूयेते द्वावप्येतावसंशयम् ॥ सुखोच्छेद्यो हि भवति सर्वज्ञातिबहिष्कृतः । त एवैनं विनिघ्नन्ति ज्ञातयः स्वात्मसात्कृताः ॥ भीरुर्युद्धपरित्यागात् क्षिप्रमेव विनश्यति । वीरोपि भीरुपुरुषः संग्रामे तैर्विमुच्यते ॥ लुब्धस्यासंविभागित्वान्न युध्यन्तेऽनुजीविनः । लुब्धानुजीवी

1. दशमसर्गे २३–४१ श्लोकाः ।

तैरेव दानहीनैर्विहन्यते ॥ संत्यज्यते प्रकृतिभिः विरक्तप्रकृतिर्युधि । सुखाभियोगो[ज्यो] भवति विषयेष्वतिसाक्तिमान् ॥ अनेकचित्तमन्त्रस्तु द्वेष्यो भवति मन्त्रिणाम् । अनवस्थितचित्तत्वात् कार्ये तैस्स उपेक्ष्यते ॥ सदा धर्मबलीयस्त्वात् देवब्राह्मणनिन्दकः । विशीर्यते स्वयं चैव दैवोपहतकस्तथा ॥ संपत्तौ च[त्तेश्च] विपत्तौ च[त्तेश्च] दैवमेव हि कारणम् । इति दैवपरो ध्यायन् आत्मना न विचेष्टते ॥ दुर्भिक्षव्यसनी चैव स्वयमेवावसीदति । बलव्यसनयुक्तस्य योद्धुं शक्तिर्न विद्यते ॥ अदेशस्थो हि रिपुणा स्वल्पकेनापि हन्यते । ग्राहोऽल्पीयानपि जले गजेन्द्रमपि कर्षति ॥ बहुमित्रस्तु सन्त्रस्तः शत्रुमध्ये कपोतवत् । येनैव गच्छति पथा तेनैवाशु विनश्यति ॥ अकालयुक्तसैन्यस्तु हन्यते कालयोधिना । कौशिकेन हतज्योतिर्निशीथ इव वायसः ॥ सत्यधर्मव्यपेतेन न सन्दध्यात् कथञ्चन । स संधितोप्यसाधुत्वात् अचिराद्याति विक्रियाम् ॥' इति ॥

सन्धेयाश्च सत्यवानार्यो धार्मिकोऽनार्यो भ्रातृसंघातवान् बलवाननेकविजयी चेति । तत्र सत्यवान् उक्तार्थनिर्वाहकत्वात् सन्धेयः । आर्यः प्राणात्ययेपि कौटिल्याद्यनाचरणात् । धार्मिकोऽनुरक्तप्रजत्वात् । अनार्यो मूलोच्छेदकरत्वात् संघातवान् बहुसहायत्वात् । बलवान् अनेकविजयी सर्वाभिभाविप्रतापवत्वात इति ॥

तथा च कामन्दकः—[1] 'सत्यार्यौ धार्मिकानार्यौ भ्रातृसंघातवान् बली । अनेकविजयी चेति सन्धेयास्सप्त कीर्तिताः ॥ सत्योऽनुपालयन् सत्यं सन्धितो नैति विक्रियाम् । प्राणात्ययेष्वपि व्यक्तमार्यो नायात्यनार्यताम् ॥ धार्मिकस्यापि युक्तस्य सर्व एव हि युध्यते । प्रजानुरागाद्धर्माच्च दुःखोच्छेद्यो हि धार्मिकः ॥ सन्धिकार्यो ह्यनार्येण संप्राप्योत्सादयेद्धि सः । रेणुकायास्सुत इव मूलेष्वपि न तिष्ठति ॥ संघातवान् यथा वेणुः निबद्धः [बिड]

1. दशमसर्गे ४२–५२ श्लोकाः ।

कण्टकैर्वृतः । न शक्यते समुच्छेत्तुं भ्रातृसंघातवांस्तथा ॥ समाक्रान्तस्य बलिना सर्वयत्नवतोऽपि हि । हरिणस्येव सिंहेन शरणं नैव दृश्यते । ईषदायच्छमानोऽपि सिंहो मत्तानिव द्विपान् । हिनस्ति बलवांस्तस्मात् सन्धेयाशिवमिच्छता । बलिना सह योद्धव्यं इति नास्ति निदर्शनम् । प्रतिवातं न हि घनः कदाचिदुपसर्पति । बलीयसि प्रणमतां काले विक्रमतामपि । संपदो नापगच्छन्ति प्रतीपमिव निम्नगाः ॥ जमदग्नेस्सुतस्येव सर्वः सर्वत्र सर्वदा । अनेकयुद्धजयिनः प्रतापादेव भज्यते ॥ अनेकयुद्धविजयी सन्धानं योऽधिगच्छति । तत्प्रतापेन तस्याशु वशं गच्छन्ति शत्रवः ॥' इति ॥

इत्थं प्रबलैः सन्धिरुक्तः । तथा समबलयोः विजयसंशयात् समबलेनापि सन्धिः कर्तव्यः । तदुक्तं **कामन्दके**—[1] 'सन्धिमिच्छेत् समेनापि सन्दिग्धो विजयो युधि । नातिसांशयिकं कुर्यात् इत्युवाच बृहस्पतिः ॥ आसंप्रवृद्धेरसिवृद्धिकामः समेन सन्धानमिहोपगच्छेत् । अपक्वयोर्मृद्घटयोरवश्यं अन्योन्यभेदी समसन्निपातः ॥ युद्धेन नाशो भवति कदाचिदुभयोरपि । सुन्दोपसुन्दावन्योन्यं समवीर्यौ हतौ न किम् ॥' इति । स्वस्य व्यसनदशायां हीनेनापि सन्धिः कर्तव्यः । तथा च **कामन्दकः**—[2] 'विहीनोऽपि हि सन्धेयो व्यसने रिपुरागतः । काले दुनोति हिमवत्तोयबिन्दुरिव क्षते ॥' इति ॥

इति संक्षेपतस्सन्धिनिरूपणम् ।

अथ विग्रहो निरूप्यते । विग्रहश्च कलहः । स च परस्परापकारजनितक्रोधामर्षादिमतां अभ्युदयं अनर्थनिवृत्तिं वा आकाङ्क्षतां भवति । तथा च **कामन्दकः**—[3]'अमर्षोपगृहीतानां मन्युसन्तप्तचेतसाम् । परस्पराप-

---

1. दशमसर्गे ५९—६१ श्लोकाः ।
2. दशमसर्गे ६२ श्लोकः ।
3. विग्रहकल्पनामके एकादशसर्गे १, २ श्लोकौ ।

कारेण पुंसां भवति विग्रहः ॥ आत्मनोऽभ्युदयाकाङ्क्षी पीड्यमानः परेण वा । देशकालबलोपेतः प्रारभेत हि विग्रहम् ॥' इति ॥

विग्रहे च कारणानि राज्यदाराद्यपहारादीनि । तदुक्तं कामन्दके— [1]'राज्यस्त्रीस्थानदेशानां ज्ञानस्य च धनस्य च ॥ अपहारो मदो मानः पीडा वैषयिकी तथा ॥ ज्ञानार्थधर्मशक्तीनां विघातो दैवमेव च । मित्रार्थं चापमानं च तथा बन्धुविनाशनम् ॥ भूतानुग्रहविच्छेदस्तथा मण्डलदूषणम् । एकार्थाभिनिवेशित्वमिति विग्रहयोनयः ॥' इति ॥

विग्रहोपशमनानि च दानप्रणामसामविषयप्रतिपीडनोपेक्षणदमदैवप्रवणपर्यन्तसाधनबहुमानावधिकथनार्थपरित्यागाः तत्तदुचितोपायान्तराणि चेति । तत्र राज्यापहरणप्रयुक्तविग्रहस्य दानेनोपशमः कर्तव्यः । एवं स्त्रीस्थानदेशापहरणप्रयुक्तविग्रहेषु तत्तद्दानेनोपशमः । आचार्याननुज्ञया अध्ययनरूपज्ञानापहरणप्रयुक्तकलहस्य आचार्यनत्या उपशमः । धनापहारप्रयुक्तकलहस्य तत्प्रदानेनोपशमः । अभिमानप्रयुक्तकलहस्य साम्ना प्रणामेन चोपशमः । स्वविषयपीडनप्रयुक्तकलहस्य परविषयपीडनेनोपशमः । परकीयज्ञानशक्तिविघाताचरणप्रयुक्तकलहस्य तदुपेक्षया उपशमः । अर्थागमोपायविघाताचरणप्रयुक्तकलहस्य तद्द्रव्यप्रदानेनोपशमः । धर्मशक्तिविघाताचरणप्रयुक्तकलहस्य दमेनोपशमः । दैवकृतकलहस्य दैवेनोपशमः ।

मित्रप्रयुक्तकलहश्च द्विविधः— अधर्मद्रोहसंयुक्तमित्रप्रयुक्तः अद्रोहमित्रप्रयुक्तश्चेति । तत्राद्ये उपेक्षणमेव । द्वितीये तु प्राणपर्यन्तं साधनीयमिति । परावमानप्रयुक्तकलहस्य परबहुमानेनोपशमः । बन्धुनाशसमुद्भवकलहस्य येन केनचिदुपायेनोपशमः । भूतानुग्रहविच्छेदप्रयुक्तकलहस्य अवधिकथनेनोपशमः । मण्डलदूषणप्रयुक्तकलहस्य सर्वविधोपायैरुपशमः । एकार्थाभिनिवेशप्रयुक्तकलहस्य तदर्थपरित्यागेनोपशम इति ॥

---

1. एकादशसर्गे ३–५ श्लोकाः ।

तदुक्तं कामन्दके — [1] 'राज्यस्त्रीस्थानदेशानां दानेन दमनेन च। विग्रहस्य तु युक्तिज्ञैरिति प्रशमनं स्मृतम् ॥ धनापहारजाते तु धनदानं समाचरेत् । कदाचिद्विग्रहे पुंसां सर्वनाशस्तु जायते ॥ सामपूर्वमुपायो वा प्रणामो वाभिमानजे । विषयध्वंसजे शत्रोर्विषयप्रतिपीडनम् ॥ ज्ञानापहार-संभूते ज्ञानशक्तिविघातजे । समर्था[स्त]दर्थत्यागेन क्षान्त्या वोपेक्षणेन च ॥ एतदेव तु विज्ञेयं स्वार्थधर्मविघातजे । दैवमेव हि दैवोत्थे शमनं साधु-संमतम् ॥ अधर्मद्रोहसंयुक्ते मित्रजात उपेक्षणम् । आत्मवन्मित्रवर्गे तु प्राणानपि परित्यजेत् ॥ अपमानं तु संभूतं मानेन प्रशमं नयेत् । विग्रहं शमयेद्धीरो बन्धुनाशसमुद्भवम् ॥ येन पीडा न जायेत तथा कुर्याद्विचक्षणः । [धनापराधजाते तु निरोधं दत्तमाचरेत् ॥ महाजनसमुत्पन्ने भेदेन प्रशमं नयेत् ॥] भूतानुग्रहविच्छेदजातस्यान्तं वदेद्वशी ॥ मण्डलक्षोभसंभूत-मुपायैः प्रशमं नयेत् । कुर्यादर्थपरित्यागमेकार्थाभिनिवेशजे ॥' इति ॥

एतादृशं विग्रहमूलभूतं वैरं पञ्चविधं—सपत्नजं, वास्तुजं, स्त्रीजं, अज्ञानजं, अपराधजं चेति । तदुक्तं कामन्दके—[2] 'सापत्न्यं वास्तुजं स्त्रीजं चाज्ञात[वाग्जात]मपराधजम् । वैरप्रभेदनिपुणैः वैरं पञ्चविधं स्मृतम् ॥' इति । भूम्युपरोधजातं, शक्तिविघातजातं, भूम्यनन्तरजातं, मण्डलक्षोभजातं चेति चतुर्विधं वैरमिति केचित् । कुलजापराधजभेदेन द्विविधमेव वैरमित्यपरे । एतदुभयमपि कामन्दके— [3] 'जातं भूम्युपरोधेन तथा शक्तिविघातजम् । भूम्यनन्तरजातं च मण्डलक्षोभजं तथा ॥ चतुर्विधं वैरजातं बाहुदन्तिसुतोऽब्रवीत् । कुलापराधजं[जे] प्राहुर्द्वे एवास्थाय मानवाः ॥' इति ॥

---

1. एकादशसर्गे ६—१५ श्लोकाः [श्लोकानां क्रमविपर्यासोपि दृश्यते]
2. एकादशसर्गे १६ श्लोकः ।
3. एकादशसर्गे १७, १८ श्लोकौ ।

वर्ज्यान् षोडश विग्रहानाह स एव—'[1] किञ्चित्फलं निष्फलं च सन्दिग्धफलमेव वा । तदात्वे दोषजननमायत्यां चैव निष्फलम् । ॥ आयत्यां च तदात्वे च दोषसंजननं तथा । अपरिज्ञातवीर्येण परेण क्षोभितेन वा ॥ परार्थं स्त्रीनिमित्तं च दीर्घकालं द्विजोत्तमः । अकालं दैवयुक्तेन बलोद्धतसखेन च ॥ तदात्वे फलसंयुक्तमायत्यां फलवर्जितम् । आयत्यां फलसंयुक्तं तदात्वे निष्फलं तथा ॥ इतीमं षोडशविधं न कुर्यादेव विग्रहम् ॥' इति ॥

विग्रहस्य आरंभकाले परिपाकसमये च शुद्धं विग्रहमाचरेदिति । तदपि तत्रैव—'[2] तदात्वायतिसंशुद्धं आरभेत विचक्षणः । तदात्वायतिशुद्धानि सर्वकर्माणि चिन्तयेत् ॥ तदात्वायतिसंशुद्धमातिष्ठन्नैति वाच्यताम् । साधुलोकद्वयग्राह्यं विद्वान्कर्म समाचरेत् ॥ परित्यजेदमुं लोकं नार्थलेशोपलोभितः । परलोकविरुद्धानि कुर्वाणमितरस्त्यजेत् ॥ इत्यागमप्रमाणत्वात्साधु कल्याणमाचरेत् ।' इति ॥

विग्रहकालमाह स एव—[3] 'यदा मन्येत मतिमान् हृष्टपुष्टं स्वकं बलम् । परस्य विपरीतं च तदा विग्रहमाचरेत् ॥ मित्रमाक्रन्द आसारो यदा स्युर्दृढभक्तयः । परस्य विपरीतं च तदा विग्रहमाचरेत् ॥' इति ॥

भूमिमित्रहिरण्यानि विग्रहफलानि । तदपि तत्रैव—[4] 'भूमिर्मित्रं हिरण्यञ्च विग्रहस्य फलत्रयम् । यदैतन्नियतं भावि तदा विग्रहमाचरेत् ॥' इति । फलानां च तारतम्यं स एवाह—[5] 'गुरु मित्रं ततो वित्तं तस्मात् भूमिर्गरीयसी । भूमेर्विभूतयस्सर्वास्ताभ्यो बन्धु-

1. एकादशसर्गे १९-२२½ श्लोकाः ।
2. एकादशसर्गे २३—२६ श्लोकाः ।
3. एकादशसर्गे २७, २८ श्लोकौ ।
4. एकादशसर्गे २९ श्लोकः ।
5. एकादशसर्गे ३० श्लोकः ।

स्सुहृद्गुणः ॥' इति । समृद्धे शत्रौ तेन विग्रहो न कार्यः । अपि तु उपायेनैव तद्विजयः कर्तव्यः । तदुक्तं तत्रैव —[1] 'सर्वसंपत्समेतश्चेदुपाया-न्निक्षिपेद्बुधः । उपायैरप्यतिव्यूढे समे दण्डोपि शस्यते ॥ आगमं विग्रहं विद्वानुपायैः प्रशमं नयेत् ।' इति ॥

उपाया अपि तत्रैव—[2] 'विजयस्य ह्यनित्यत्वात् रभसेन न संपतेत् । समाक्रान्तो बलवता काङ्क्षन्नभ्रंशिनीं श्रियम् ॥ आश्रयेद्वैतसीं वृत्तिं न भौजंगीं कथञ्चन । क्रमाद्वैतसवृत्तिस्सन् प्राप्नोति विपुलां श्रियम् ॥ भुजङ्ग-वृत्तिराप्नोति वधमेव तु केवलम् ॥ प्रमत्तमप्रमत्तश्च ग्रसेदुत्पत्य पण्डितः । अपरिभ्रंशमानं हि क्रमप्राप्तमृगेन्द्रवत् ॥ कौर्मं सङ्कोचमास्थाय प्रहारमपि मर्षयेत् । काले प्राप्ते तु मतिमान् उत्तिष्ठेत्क्रूरसर्पवत् ॥ काले सहिष्णु-र्गिरिवदसहिष्णुश्च दन्तिवत् । स्कन्धेनापि वहेच्छत्रून् प्रियाणि समुदाहरन् ॥ प्रसादवृत्त्याहितलोकवृत्तया प्रविश्य शत्रोर्हृदयं निरन्तरम् । तथाऽग्रहस्तेन हि काल उत्थितः प्रसह्य कुर्वीत कचग्रहं श्रियः ॥' इति ॥

दुष्प्रसाध्येन विग्रहो न कर्तव्यः । किन्तु सुसाध्यैः स्त्रियादि-व्यसनवद्भिरेव कर्तव्यः । अयमर्थः दुष्प्रसाध्यसुप्रसाध्ययोः स्वरूपकथनपूर्वकं प्रतिपादितः— [3] 'असत्यवाग्निष्ठुरताकृतघ्नता भयं प्रमादोऽलसता विषादिता । तथाभिमानो ह्यतिदीर्घसूत्रता तथाङ्गनाक्षादि विनाशनं श्रियः ॥ इति स्म दोषान्वितमाशु विद्विषं त्रिशक्तियुक्तो विजिगीषया व्रजेत् । अतो-ऽन्यथा साधुजनस्य संमतः करोति विद्वानुपघातमात्मनः ॥ समन्वितो राज्यपदोन्निनीषया चारेक्षणैर्वीक्षितमण्डलक्रियः । इमं नृपो विग्रहमार्ग-मास्थितः स्थिरोद्यमस्संप्रयतेत सिद्धये ॥' इति ॥

---

1. एकादशसर्गे ३१, ३१½ श्लोकौ ।
2. एकादशसर्गे ३२—३८ श्लोकाः ।
3. एकादशसर्गे ४०—४२ श्लोकाः ।

यानञ्च सकलजनसंमतस्य विजिगीषोरुत्कृष्टबलवीर्यस्य यात्रा। तच्च पञ्चविधं—विगृह्य यानं, संधाय यानं, संभूय यानं, प्रसङ्गयानं, उपेक्षायानं चेति॥

तत्र परकीयसेनागणविग्रहपूर्वकयानं विगृह्य यानम्। शत्रुमित्राणां स्वमित्राणां च विग्रहपूर्वकयानमपि विगृह्य यानम्। पृष्ठतः समागच्छतः शत्रोः सन्धानपूर्वकं अन्यस्य शत्रोरुपरि यानं सन्धाय यानम्। सकलसामन्तराज्ञां समाधानपूर्वकं तैस्सह एकस्योपरि यानं संभूय यानम्। अन्यत्र प्रवृत्तस्यान्यत्र यानं प्रसङ्गयानम्। शत्रुं प्रति प्रस्थितस्य प्राप्तकालोपेक्षणेन तन्मित्रं प्रति यानं उपेक्षायानम्। इति॥

तदुक्तं **कामन्दके**—[1] 'उत्कृष्टबलवीर्यस्य विजिगीषोर्जयैषिणः। गुणानुरागात् प्रकृतेः यात्रा यानमिति स्मृतम्॥ विगृह्य सन्धाय तथा संभूयाथ प्रसङ्गतः। उपेक्षा चेति निपुणैः यानं पञ्चविधं स्मृतम्॥ विगृह्य याति हि यदा सर्वान् शत्रोर्गणान् बलात्। विगृह्य यानं यानज्ञास्तदाचार्याः प्रचक्षते॥ अरेर्मित्राणि सर्वाणि स्वमित्रैस्सर्वतो बलात्। विगृह्य चाभिगमनं विगृह्य गमनं स्मृतम्॥ सन्धायान्यत्र या यात्रा पार्ष्णिग्राहेण शत्रुणा। सन्धाय गमनं प्रोक्तं तज्जिगीषोः फलार्थिनः॥ एकीभूय यदैकत्र सामन्तैः सांपरायिकैः। शक्तिशौचयुतैर्यानं संभूय गमनं हि तत्॥ अन्यत्र प्रथितासङ्गादन्यत्रैवावगच्छति। प्रसङ्गयानं तत्प्रोक्तं अत्र शल्यो निदर्शनम्॥ रिपुं वा तस्य बलिनः संप्राप्याविकृतं फलम्। उपेक्ष्य तन्मित्रयानं उपेक्षायानमुच्यते॥ निवातकवचान् हित्वा हिरण्यपुरवासिनः। उपेक्षायानमास्थाय निजघान धनञ्जयः॥' इति। इदं च यानं व्यसनिनं प्रत्येव कर्तव्यम्। तदुक्तं **कामन्दके**—[1] 'स्त्रियोऽथ यानं मृगया तथाक्षाः दैवेन घातश्च

1. मन्त्रविकल्पकनामके द्वादशसर्गे १-९ श्लोकाः।

बहुप्रकारः । (एतत्) प्रदिष्टं व्यसनं ह्यनेन समन्वितो यश्च रिपुः स गम्यः ॥' इति ॥

अरिविजिगीष्वोः परस्परं सामर्थ्यविघातेन तूष्णीमवस्थानमासनमुच्यते । तच्च पञ्चविधं—विगृह्यासनं, सन्धायासनं, संभूयासनं, प्रसङ्गासनं, उपेक्षासनं चेति । परस्परकलहेनान्यतरकलहेन वा दुर्गावस्थिततस्य ग्रहीतुमशक्त्या वा शत्रुव्यथाजननपूर्वकं आसनं विगृह्यासनम् । मनुष्यमुखेन समाधानपूर्वकमासनं सन्धायासनम् । उदासीनमध्यस्थयोः समानत्वभ्रान्त्या तैस्सहासनं संभूयासनम् । क्वचिद्गन्तुमिच्छोः प्रसङ्गादन्तरेणावस्थानं प्रसङ्गासनम् । सङ्ग्रामसमये अधिकशत्रुमवेक्ष्य आसनं उपेक्षासनम् ॥

तदुक्तं **कामन्दके**—[1] 'परस्परस्य सामर्थ्यविघातादासनं स्मृतम् । अरेश्च विजिगीषोश्च तत्पञ्चविधमुच्यते ॥ अरिं विगृह्य चास्थानं विगृह्यासनमुच्यते । अन्योन्याक्रान्तिकरजं विगृह्यासनमुच्यते ॥ यदा दुर्गस्थितः शत्रुर्ग्रहीतुं नैव शक्यते । विगृह्यैनं तदासीत स्थित्वास्य रचयेद्व्यथाम् ॥ विच्छिन्नविविधासारं प्रक्षीणयवसेन्धनम् । विगृह्यमानप्रकृतिं कालेनैव समु[शमं]न्नयेत् ॥ निवातकवचैस्सार्धं रावणः शत्रुरावणः । ब्रह्माणमन्तरा कृत्वा सन्धायासनमास्थितः ॥ उदासीने मध्यमे च समानप्रतिशङ्कया । एकीभूय समुत्थानं संभूयासनमुच्यते ॥ यियासोरन्यमन्यत्र प्रसङ्गेनेह केनचित् । आसनं यत्तदर्थज्ञैः प्रसंगासनमुच्यते ॥ आजौ प्रेक्ष्यारिमाधिकमुपेक्ष्यासनमुच्यते । उपेक्षां कृतवानिन्द्रः पारिजातग्रहं प्रति ॥ उपेक्षितस्य चान्यैस्तु कारणेनेह केनचित् । आसनं रुक्मिण इव तदुपेक्षासनं स्मृतम् ॥' इति ।

परस्परशत्रुभूतयोः अन्यतरपक्षावलम्बनं विना काकाक्षिन्यायेनावस्थानं द्वैधीभावः । स द्विविधः—स्वतन्त्रः परतन्त्रश्चेति । अन्यतर(वेतन)ग्रहणेन

---

1. द्वादशसर्गे ११–१९ श्लोकाः ।

विना मध्यस्थतया अवस्थानं स्वतन्त्रद्वैधीभावः। उभाभ्यां वेतनं गृहीत्वा मध्यस्थतयावस्थानं परतन्त्रद्वैधीभावः ॥

तदुक्तं **कामन्दके**—[1]'पालयेद्यत्नमास्थाय सन्निकृष्टतरं तयोः। उभयोरपि संपाते सेवेत बलवत्तरम्। यद्वा द्वावपि नेच्छेतां संश्लेषं जातसंविदौ ॥ तदोपगच्छेत्तुच्छं वा अधिकं वापि संश्रयेत्। द्वैधीभावो द्विधा प्रोक्तः स्वतन्त्रपरतन्त्रयोः ॥ स्वतन्त्र उक्तो ह्यन्यस्तु यः स्यादुभयवेतनः ॥' इति ॥

प्रबलेन उच्छिद्यमानस्य ततः प्रबलतरपुरुषाश्रयणं समाश्रयणमित्युच्यते। तदुक्तं **कामन्दके**—[2]'उच्छिद्यमानो बलिना निरुपायप्रतिक्रियः। कुलोद्गतं सत्यमार्गं आश्रयेत बलोत्कटम् ॥' इति ॥

एवं सन्ध्यादिषड्गुणयुक्तया बुद्ध्या विचार्यारब्धमेव कर्म शुभोदर्कं भवति। अविचार्यारम्भः पश्चात्तापाय भवेत्। एतदपि **कामन्दके**—[3]'आ[अ]लक्षितनयः सिंहो हन्तीभं केवलं बलात्। तं च धीरो नरस्तेषां शतानि मतिमान् जयेत् ॥ उपायपूर्वं लिप्सेत कालं वीक्ष्य समीहितं। पश्चात्तापाय निर्दिष्टा विक्रमैकरसज्ञता ॥ शक्याशक्यपरिच्छेदं कुर्याद्बुद्ध्या विचक्षणः। केवलं दन्तभङ्गाय दन्तिनः शैलताडनम् ॥ अशक्यारम्भवृत्तीनां कुतः क्लेशादृते फलम्। भवन्ति परितापिन्यो व्यक्तं कर्मविपत्तयः ॥ बुद्ध्या बोध्यानुगतया परीयात्संपदः पदम्। सुविशुद्धपदन्यासः पर्वताग्रमिवोदितम् ॥ दुरारोहं पदं राज्ञां सर्वलोकनमस्कृतम्। अल्पेनाप्यपचारेण ब्राह्मण्यमिव दुष्यति ॥ प्रारब्धानि यथाशास्त्रं कार्याण्यासनबुद्धिभिः। वनानीव मनोहारि प्रयच्छन्त्यचिरात्फलम् ॥' इति ॥

---

1. द्वादशसर्गे २१–२३ श्लोकाः।
2. द्वादशसर्गे २४ श्लोकः।
3. द्वादशसर्गे २६, २८– ३३ श्लोकाः।

परिमृष्टो दशान्तेन दशाभागेन सेव्यते ।
दशाभागगतो हीनस्त्वं हि राम सलक्ष्मणः ॥
यत्कृते व्यसनं प्राप्तं त्वया दारप्रधर्षणम् । ९ ॥
तदवश्यं त्वया कार्यं स सुहृत्सुहृदां वर ।
अकृत्वा हि न ते सिद्धिं अहं पश्यामि चिन्तयन् ॥

अनेन असहायेन कार्यं न किञ्चिदपि साधयितुं शक्यं इति सूचितम् । तथा च राजधर्मे — [1] 'यदप्यल्पतरं कर्म तदप्येकेन दुष्करम् । पुरुषेणासहायेन किमु राज्ञा पितामह ॥' इति ॥

श्रूयतां राम वक्ष्यामि सुग्रीवो नाम वानरः ।
भ्रात्रा निरस्तः क्रुद्धेन वालिना शक्रसूनुना ॥ ११ ॥
ऋष्यमूके गिरिवरे पम्पापर्यन्तशोभिते ।
निवसत्यात्मवान् वीरश्चतुर्भिस्सह वानरैः ॥ १२ ॥
गच्छ शीघ्रमितो राम सुग्रीवं तं महाबलम् ।
वयस्यं तं कुरु क्षिप्रं इतो गत्वाद्य राघव ।
अद्रोहाय समागम्य दीप्यमाने विभावसौ ॥ १७ ॥

अत्र रामसुग्रीवयोस्सन्धिः प्रतीकाराख्यः, [2] 'उपकारं करोम्यस्य ममाप्येष करिष्यति । अयं चापि प्रतीकारो रामसुग्रीवयोरिव ॥' इति कामन्दकोक्तलक्षणात् । इत्यभिधाय ऋष्यमूकनगगमनमार्गमादिश्य स्वर्गमगात् ॥

नन्वत्र सन्धिविग्रहादयः षड्युक्तयः सन्ति । ताश्च कार्यसिद्ध्यर्थाः । ताभिर्विमृश्य कार्यसिद्ध्यर्थं संप्रति भ्रातृमात्रसाहाय्यस्य दुर्दशारंभं प्राप्तस्य

---

1. ८० अध्यायस्य प्रथमः श्लोकः ।
2. दशमसर्गे ११ श्लोकः ।

रामभद्रस्य दृष्टबलेन दैवबलेन चोपेतेन दुर्दशायाः समाप्तिप्राप्तेन सुग्रीवेण सन्धिकरणमेव समुचितमिति कबन्धेनोक्तम् । तदनुपपन्नम् । यतो वाली सुग्रीवादधिकबलः, सकलवानरसेनापरिवृतः, स्वराज्ये सुप्रतिष्ठितो, रामकृत-प्रत्युपकारानिरपेक्षो, रावणनिग्रहचतुरभुजवीर्योपेतश्च । 'मामेव यदि पूर्वं त्वमेतदर्थमचोदयः । मैथिलीमहमेकाह्ना तव चानीतवान् भवेत् ॥ राक्षसं च दुरात्मानं तव भार्यापहारिणम् । कण्ठे बद्ध्वा प्रदद्यान्ते निहतं रावणं रणे ॥' इति तद्वचनेन जीवग्राहं रावणं गृहीत्वा रणे वा तन्निहत्य अहमेवासहायः एकाह्ना मैथिलीमानीय दास्यामीत्येतादृशसामर्थ्यावगमेन स्वकार्यसाधकश्च । अत एव तादृशं वालिनमपहाय अतादृशः सुग्रीवः कथमुपदिष्ट इति चेन्न । सत्यपि सामर्थ्ये दृप्तत्वात् रावणमित्रत्वात् राज्यस्थितत्वात्, रामकृतोपकारानिरपेक्षत्वाच्च रामप्रार्थितो वाली सख्यं नाङ्गीकुर्यादेव । आसन्नमृत्युना वालिना सख्यकरणं निष्फलं च ॥

यत्तु 'मैथिलीमहमेकाह्ना तव चानीतवान्भवेत् ।' इत्यादितद्वचनात् सामर्थ्यावगमेन कार्यसाधक इति; तदपि न, सत्यपि सामर्थ्ये सीतामानीय दास्यामीत्येतादृशबुद्धेः शिक्षणानन्तरभावित्वेन स्वस्थावस्थायां असंभवात् ॥ 'तत्क्षमो न विरोधस्ते सह तेन महात्मना । दुर्जयेनाप्रमेयेन रामेण रण-कर्मसु ॥' इत्यादि युक्ततरमपि तारावाक्यं दृप्ततया पूर्वमनङ्गीकुर्वतः 'तारया हितमुक्तोऽहं सत्यं सर्वज्ञया तया । तदतिक्रम्य मोहेन कालस्य वशमागतः ॥' इति शिक्षणानन्तरकालीनबुद्धिवत् दैवात् शिक्षणात् पूर्वमुत्पन्नया रामस्य कार्यं साधनीयं इति बुद्ध्या तेन कार्यं साधितं चेदपि तद्भुजबलमात्रोपार्जित-कार्याङ्गीकरणं रामस्यायुक्तम् । स्वपराक्रमेण विना अन्येन साधितार्थाङ्गी-करणस्य क्षत्रियाणां अधर्म्यत्वात् ॥

तथा च भारते वनपर्वणि—[1] 'अस्मत्प्रयुक्तैर्विशिखैर्जितारिः ततो

---

1. १२० अध्याये २२ श्लोकस्य पूर्वार्धं ।

महीं भोक्ष्यति धर्मराजः ।' इति वने चरतो धर्मराजस्य वयमेव स्वबलेन राज्यं विजित्य दास्याम इति सात्यकिनोक्तस्य भगवतो वचनं — [1] 'स्वाभ्यां भुजाभ्यामर्जितां तु भूमिं नेच्छेत्कुरूणामृषभः कथञ्चित् । न ह्येष कामान्न भयान्न लोभात् युधिष्ठिरो जातु जह्यात् स्वधर्मम् ॥' इति ॥

सुन्दरकाण्डेऽपि— 'यदि रामो दशग्रीवमिह हत्वा सबान्धवम् । मामितो गृह्य गच्छेत तत्तस्य सदृशं भवेत् ॥' इति । अतः, 'ययोरेव समं मित्रं ययोरेव समं श्रुतम् । तयोर्विवाहो मैत्री च' 'समानशीलव्यसनेषु सख्यम्' इति न्यायेन सख्यं समानसुखदुःखेन सुग्रीवेण सुकरम् । दशांतपरिमृष्टत्वात् तेन मैत्रीकरणं सफलं चेत्यभिप्रायेण भाव्यर्थाभिज्ञेन कबन्धेन सुग्रीव एव उपदिष्टः ॥

कबन्धस्य भाव्यर्थाभिज्ञानं च, 'अदग्धस्य हि विज्ञातुं शक्तिरस्ति न मे प्रभो । किन्तु यावन्न यात्यस्तं सविता श्रान्तवाहनः ॥ तावन्मामवटे क्षिप्त्वा दह राम यथाविधि । दग्धस्त्वयाहमवटे न्यायेन रघुनन्दन ॥ वक्ष्यामि तमहं वीर यस्तं ज्ञास्यति राक्षसम् ॥' इत्यादिवचनैः शापप्रतिबद्धं ज्ञानं विध्युक्तदाहेन प्रतिबन्धे निवृत्ते आविर्भवतीति प्रतिपादनात् अवगम्यते । तस्मात् वालिनं परित्यज्य सुग्रीवेण सन्धिः कार्य इति कबन्धेन यदुक्तं तदुपपन्नमेव इति ॥

तदनु तदुपदिष्टमार्गेण प्रतीचीं दिशं प्रतिपद्य पश्चिमे पम्पातीरे रम्यमाश्रममवगाहमानौ रामलक्ष्मणौ तदाश्रमवासिन्या तपस्विन्या शबर्या सादरमुत्थाय सप्रणामं कृतां सपर्यां परिगृह्य सन्तुष्टमानसौ बभूवतुः । तदनु दाशरथिना रामभद्रेण निष्प्रत्यूहं तपोवृद्ध्यादिकुशलं पृष्टा तपस्विनी रामभद्रमेवमवादीत —

---

1. १२० अध्याये २३, २४ श्लोकयोः उत्तरपूर्वार्धे ।

अद्य प्राप्ता तपस्सिद्धिस्तव सन्दर्शनान्मया ।
अद्य मे सफलं तप्तं कुलं च सफलं मम ॥ ११ ॥

मत्कृतसपर्यासन्तुष्टमानसैः मुनिजनैः,

आगमिष्यति ते रामः सुपुण्यमिममाश्रमम् ॥ १५ ॥
स ते प्रतिग्रहीतव्यः सौमित्रिसहितोऽतिथिः ।
तं च दृष्ट्वा वरान् लोकान् अक्षयांस्त्वं गमिष्यसि ॥ १६ ॥

इत्यभिहितास्मि । अनेन असन्निधानेपि अन्यमुखेनाप्यतिथयः पूजनीया इति सूचितम् । तथा चानुशासनिके पत्नीं प्रति विपुलः—'निष्क्रान्ते मयि कल्याणि तथाऽसन्निहितेऽनघे । नातिथिस्तेऽवमन्तव्यः प्रमाणं यद्यहं तव ॥' इति ॥

तदनु 'कबन्धेन आवेदितं ते प्रभावं प्रत्यक्षतो द्रष्टुमिच्छामि' इति रामेणाभिहिता तापसी इदमेव वनमृगसमाकुलं मतङ्गवनम् । इयमेव च गुहा; अस्यामेव गुहायां गुरुजनैर्मन्त्रप्रभावेन कृतं सप्तसागरं नाम तीर्थं, इयमसौ गुरुजनकृतपुष्पोपहारा प्रत्यक्स्थली वेदिः; एतांश्च,

अशक्नुवद्भिस्तैर्गन्तुं उपवासश्रमालसैः ।
चिन्तितेनागतान् पश्य सहितान् सप्तसागरान् ॥ २५ ॥

तदखिलमवलोकयतु भवान्; अहमपि तवाज्ञया जीर्णं कलेबरं विहाय गुरुजनसमीपं गन्तुमिच्छामि' इत्यवादीत् ॥

तदुदीरितं अतिधर्मिष्ठं वचनमाकर्ण्य हर्षनिर्भरमानसेन रामेण समनुज्ञाता शबरी भुजगीव जीर्णां त्वचं तनुं हुताशने निक्षिप्य दिव्यमाल्याम्बरधरा शिरसा रामं प्रणम्य गुरुजनसमलङ्कृतं पुण्यस्थलं जगाम ॥

इति चतुःसप्ततितमः सर्गः ॥

अथ पञ्चसप्ततितमः सर्गः ॥

पञ्चसप्ततितमे— तत्कर्मविस्मयस्तिमितमानसो रामो मतङ्गाश्रम-मवलोक्य सन्तर्प्य च सप्तसागरेपि पितॄन् कृतकृत्यमिति मन्वानो लक्ष्मणमेव-मवोचत् —

सप्तानां च समुद्राणामेषु तीर्थेषु लक्ष्मण ।
उपस्पृष्टं च विधिवत्पितरश्चापि तर्पिताः ॥ ४ ॥

अनेन समुद्रस्नानं सकलपापक्षयकरमित्युक्तम् । तथा च **वनपर्वणि**— 'आजन्मशतसाहस्रं यत्पापं कुरुते क्वचित् । मुच्यते सर्वपापेभ्यः स्नात्वैव लवणाम्भसि ॥' इति । तत्रैव स्थलान्तरे—[1]'समुद्रास्तत्र चत्वारः कूपे सन्निहिताः सदा । तत्रोपस्पृश्य राजेन्द्र न दुर्गतिमवाप्नुयात् ॥' इति ॥

ततो विचित्रतरनगमृगगणाकीर्णं प्राणिमात्रमनोनयनाभिरामं मतङ्गाश्रमं श्रीजानकीवियोगेन परिम्लायमाननिजाननः शोकापनयनविचक्षणेन लक्ष्मणेन अनुलक्षणं तद्वनं समीक्षमाणः—

विवेश पंपां नलिनीं मनोरमां,
रघूत्तमः शोकविषादयन्वितः ॥ २९ ॥
ततो महद्वर्त्म च दूरसंक्रमं
क्रमेण गत्वा स विलोकयन् वनम् ।
ददर्श पम्पां शुभदर्शकाननां,
अनेकनानाविधपक्षिसङ्कुलाम् ॥ ३० ॥

इति पञ्चसप्ततितमः सर्गः ॥

इत्यार्षे श्रीमद्रामायणे **आरण्यकाण्डः** संपूर्णः ।

---

1. ८४ अध्याये २६, २७ श्लोकयोः उत्तरपूर्वार्धे ।

ये धर्मैकनिसर्गशुद्धरुचयो ये वेदवेद्ये परे
पुंसि ब्रह्मणि मैथिलीसहचरे भक्ता रघूणां वरे ।
ये वा कौतुकिनो रघूद्वहकथाशैलीसमाकर्णने
ये वा मर्मविदस्त एवमुररीकुर्वन्तु तैस्तैर्गुणैः ॥

प्रतिदिनमपि श्रीयज्ञेशप्रसादमुपेयुषा
गुरुवरकृपाधाम्ना श्रीमत्त्रियम्बकयज्वना ।
परमऋषिणारण्ये काण्डे तृतीय इहोदिते
प्रकटितमिदं धर्माकूतं यथामति गृह्यताम् ॥

इति श्रीमत्त्र्यम्बकरायमखिविरचिते
श्रीमद्रामायणधर्मतात्पर्ये धर्माकूते
आरण्यकाण्डः संपूर्णः ॥

श्रीरामार्पणमस्तु ॥